ISSN 0976-8645

# JAHNAVI SANSKRIT E-JOURNAL

*A portal of Sarasvatniketanam*




www.sarasvatniketanam.org www.jahnavisanskritejournal.in

## पञ्चचत्वारिंश-षड्चत्वारिंशसंयुक्ताङ्के भवतां समेषां मङ्गलाभिनन्दनम्।



| | |
|---|---|
| मुख्यसम्पादकः | विद्यावाचस्पति-डा.सदानन्दझाः। |
| सम्पादकाः | डा. मीनाक्षीजोशी, विद्वान् सुमन् आचार्यः, डा. श्लेषा सचिन्द्र, डा. राधावल्लभशर्मा, डा. दीपिका, डा. बिपिनकुमारझा। |
| विशिष्टपुनर्वीक्षकाः | Dr. PK Wendabona, Department of Basic Principles, Institute of Indigenous Medicine University of Colombo, Rajagiriya Sri Lanka |
| प्रकाशकः | डा. बिपिनकुमारझा। |
| प्रतिनिधयः (लोकार्पणसन्दर्भे) | डा. बिपिनकुमारझा। |
| तकनीकिप्रवन्धनसहायकः | रित्ज़ वेब होस्टिंग, बंगलोर |



सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नलनाम्ना विश्वेऽस्मिन् प्रथितः।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 19 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

# विषयानुक्रमणिका


| Sl. | शीर्षकम् | लेखकः |
|---|---|---|
| | मुख्यसम्पादकीयम् | डा. सदानन्द झा |
| | प्रकाशकीयम् | डा. बिपिन कुमार झा |
| 1 | योगदर्शने नञर्थघटितसिद्धान्तविमर्शः | Sankar Mondal |
| 2 | शब्दशुद्धिप्रतिपादने भामहवामनयोः पारस्पारिकं वैमत्यम् : एकमध्ययनम् | Dr. Mrityunjay Gorain |
| 3 | वेद वर्णित हृदयरोग चिकित्सा के विविध आयाम | महेशः |
| 4 | व्याप्तौ तार्किकरक्षाभाषापरिच्छेदग्रन्थयोः मतसमीक्षणम् | प्रणवेशकुमारः |
| 5 | स्त्रीपात्रमनस्तत्त्वाभिदर्शने सिद्धहस्तः कविकालिदासः | डा. दीपिकादीक्षित |
| 6 | महाकवि भर्तृहरि कृत नीतिशतक की प्रासंगिकता | डॉ.कुसुमलता टेलर |
| 7 | Awareness of Air Pollution in Vedic Literature | Dr. Bhagyashree Bhalwatkar |
| 8 | महाभारत में गङ्गा महात्म्य | डा.विवेक शर्मा |
| 9 | महाकविकालिदासस्य विविधशास्त्रपाण्डित्यस्य आधुनिक्युपयोगिता | पवनचन्द्रः |
| 10 | प्रक्रमभेदानौचित्यस्य समीक्षणम् | डा.दिनेशचन्द्रपाण्डेयः |
| 11 | The Need of Union in Indian Subcontinent: A Vedic perspective | Anandhu Krishnan<br>Siva Panuganti |
| 12 | Odia Palm Leaf Medical Manuscript Collection of Ācārya Surendrasūrīswarji Jaina Tatvajñānaśālā –A Bird's Eye View | Dr. Sashibhusan Mishra |
| 13 | प्रत्याहारेष्वितां ग्रहणविषये ज्ञापकाः | पल्लवी-मालिकः |
| 14 | The Cult of Gāyatrī: A Study | Dr. Nilachal Mishra |
| 15 | एकादेशविषये पाणिनीयकातन्त्रव्याकरणयोः तुलनात्मकमध्ययनम् | उत्तम-माझिः |
| 16 | पण्डितराजजगन्नाथकृतगङ्गालहर्याः माहात्म्यनिरूपणम् | दीपङ्कर-मण्डलः |
| 17 | वेङ्कामात्यप्रणीतः लक्ष्मीस्वयंवरसमवकारे रसविचारः | Rabindranath Bar |
| 18 | समग्र-स्वास्थ्य के उपस्तम्भ आहार के विशेष परिप्रेक्ष्य में यौगिक ग्रन्थानुशीलन | डा वेदप्रकाश आर्य |
| 19 | हठप्रदीपिका के विशेष परिप्रेक्ष्य में योगाङ्ग प्राणायाम की अवधारणा | डा. रविशास्त्री |
| 20 | अङ्गवृत्तपरिभाषा | Dr. G.S.V. Dattatreyamurthy |
| 21 | स्पन्दशब्दप्रियो राजानकः कुन्तकः | डा. राधावल्लभशर्मा |

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

# सम्पादकीयम्

शिवशिरसि वसन्ती संविदानन्दनीरा
हृदयकलुषपुञ्जं प्रक्षिपन्ती विदूरे।
सघनतमसि दिव्यं ज्योतिरालोकयन्ती
प्रसरतु भुवि भव्या भारती काऽपि दिव्या॥

अये सुरभारतीसमुपासकाः नानाशास्त्रनिष्णाताः शास्त्रमन्थनसमुत्थ सुधारसास्वाददक्षाः चतुरस्रवैदुष्यमण्डिताः महापण्डिताः महाकवयः संस्कृतानुरागिणः सहृदयपाठकाश्च

संसारस्य सर्वप्रथमान्तर्जालीयसंस्कृतत्रैमासिक-जाह्नव्याः संस्कृतपत्रिकायाः पञ्चचत्वारिंश-षट्चत्वारिंश-संयुक्ताङ्कमिमं सुरभारतीसमुपासकानामनारतं विविधविशिष्टग्रन्थप्रणयनबद्ध-परिकराणामाचार्याणां करकमलयोः सादरं सश्रद्धं सस्नेहं समर्पयन् नितरां प्रमोदमनुभवामि।

पत्रिकायाः प्रारम्भकालादेव सारस्वतसमुपासकानां विविधविद्याविद्योतितान्तःकरणानांमहाविदुषां करकमलाभ्यां लोकार्पणपरम्पराऽस्माभिरङ्गीकृता। एतत्परम्परायांप्रकृताङ्कस्य लोकार्पणाय हरियाणाकेन्द्रीयविश्वविद्यालयस्य कुलपतिपदममलङ्कुर्वद्भिः विविधशास्त्रनिष्णातैः करुणामूर्तिभिः स्वनामधन्यैः श्रीमद्भिः **प्रोफेसर्-टङ्केश्वरकुमारमहाभागैः** विविधप्राशासनिकार्यव्यस्तैरपि स्वकीयाकृपानुमतिः प्रदत्तेति। अत एतेभ्यः महोदयेभ्यः प्रणतिपुरस्सरं सश्रद्धं कार्तज्ञं प्रकटयति सकल जाह्नवीपरिवारः।

प्रकृताङ्के चतुर्विंशतिसङ्ख्याका शोध-आलेखाः विभिन्नप्रान्तेभ्यः नानाशास्त्रीयसम्प्राप्ता। यत्र चयनसमित्यनुशंसया पक्षपातशून्यमनसा पत्रिकायां समावेशिताः । सर्वेऽपि आलेखाः पाण्डित्यपूर्णास्तत्र अङ्गवृत्तपरिभाषा, महाभारत में गङ्गा महात्म्य, पाण्डित्यपूर्णाः आलेखाः सन्ति तेष्वपि- शब्दशुद्धिप्रतिपादने भामहवामनयोः पारस्पारिकं वैमत्यम् : एकमध्ययनम्, प्रत्याहारेष्वितां ग्रहणविषये ज्ञापकाः, Relevance of Yogashastra in Preservation of Human Life, Awareness of Air Pollution in Vedic Literature, योगदर्शने नञर्थघटितसिद्धान्तविमर्शः, The Cult of Gāyatrī: A Study, महाकविकालिदासकृतिषु स्त्रीपात्र-प्रकृतिविमर्शः, समग्र-स्वास्थ्य के उपस्तम्भ आहार के विशेष परिप्रेक्ष्य में यौगिक ग्रन्थानुशीलन, हठप्रदीपिका के विशेष परिप्रेक्ष्य में योगाङ्ग प्राणायाम की अवधारणा इत्यादयः विदुषांमनसि नियतं कवलीकरिष्यति।

प्रकृतशोधनिबन्धेषु नानाशास्त्राणां गूढविवेचनं विद्वद्भिः विहितम्। श्रुतिर्विभिन्ना स्मृतयो विभिन्ना नैको मुनिर्यस्य मतं न भिन्नमित्यभिधानं न केवलं धर्मशास्त्रमवगाहते अपितु ज्यौतिष-काव्य-व्याकरण-दर्शनादिविविधप्रस्थानेषु मतवैभिन्यमाचार्याणां विशिष्टवैदुष्यप्रभवं प्रौढपाण्डित्य-मर्वाचीनविशिष्टविदुषांवैदुष्यानुत्प्रेरयत् समये समये तत्कृतैर्नवीनालोकविभ्राजयति संस्कृतसंसारमिति।

सर्वं द्रष्टुं शक्यतेगहनविवेचनेन प्रकृताङ्कनिबन्धेषु जानन्त्येव शास्त्ररसिकाः पत्रिकायाः मूलमुद्देश्यमस्ति यत् पारम्परिकसंस्कृतविद्यायाः संरक्षणं संवर्द्धनम् सम्प्रसारणम् चेति सदैव राजनीतिविमुखेयं पत्रिका। अत्र ये आलेखाः सम्प्राप्ताः तेषां विशेषज्ञ परीक्षा (पीयर-रिव्यू) प्रक्रिया विधीयते। देशस्य-विदेशस्य च विभिन्नभागेषु वैदुष्यमण्डिताः विद्वांसः शोधालेखानां परीक्षणाय पत्रिकापरिवारैः अनुरुद्धाः । विशिष्टपण्डिता तानुररीकृत्य जाह्नवीपरिवारानन्वगृह्णन्। पुरातनकालादेवेयं प्रक्रिया वर्तत एव।

प्रस्तुतपत्रिका कियदंशतः समीचीनेतिवक्तुमसमर्थोऽहम्। एतद्विषये कविकुलगुरुकालिदासस्यैतद्वचनमेव प्रमाणम्-

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

आ परितोषाद्विषां न साधु मन्ये प्रयोगविज्ञानम्।

यथैव आशुतोषस्य नटराजराजस्य जटातः प्रवहन्ती जाह्नवी त्रैलोक्यं पुनाति मज्जतां निर्मलं प्रसादयति मुक्तिपथं तथैवेयं मदीयेयं जाह्नवी पत्रिका चतुरस्रवैदुष्यमण्डितानां तत्र भवतां श्रीमतां हृदये सौरभं प्रसादं निधत्तामिति साञ्जलिं वयं कामयामहे।

अन्ते सानुनयं निवेदनं च मदीयबुद्धिदोषेण येऽशुद्धयस्त्रुटयस्तान् स्वयं संशोध्य व्यवहरन्तु सूचयन्तु।

श्रुतिध्वनिमनोहरा मधुरसा शुभा पावनी
स्मृताप्यतनुतापहृत् समवगाहसौख्यप्रदा।
निषेव्यपदपङ्कजा विवुधवृन्दमान्याऽमला
समस्तजगतीतले प्रवहतादियं जाह्नवी

झोपाख्यः सदानन्दः

# प्रकाशकीयम्

या श्री: स्वयं सुकृतिनां भवनेष्वलक्ष्मी:
पापात्मनां कृतधियां हृदयेषु बुद्धि:।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नता: स्म परिपालय देवि विश्वम्॥

साम्प्रतं कोविडसङ्क्रमणनिवारणमिनित्तं भारतवर्षद्वाराकृत-कार्यसन्दर्भे विश्वस्मिन् विश्वे सर्वत्र भारतस्य अभिनन्दनं दरीदृश्यते। यद्यपि सङ्क्रमणमिदं पूर्णतया न व्यपगतं तथापि भारते जनाः एतन्निवारणसन्दर्भे जागरुकाः सञ्जाताः। प्रसङ्गेऽस्मिन् चिकित्सकाः नितरां श्लाघार्हाः। यथा प्राचीनकाले भारते ऋषयः नानाविघ्नमध्येपि राष्ट्रसमुन्नत्यर्थं धर्माचरणं विधाय मार्गं प्रादर्शयत्तद्वदेव भारतवर्षीयास्तु एतादृग्विषमस्थितावपि स्वकर्त्तव्यपथि भूत्वा देशसमुन्नतये विविध मार्गान् निर्माय स्वीयं प्रातिभख्यापनं कुर्वन्ति। साम्प्रतिके युगेऽपि भारते नैकाः युवानः विविधक्षेत्रेषु स्वकीयं वैदुष्यं ख्यापयन् विश्वस्मिन् शीर्षस्थपदममलङ्कुर्वन्ति इति महत् प्रमोदास्पदम् ।
भारतस्य कीर्तिजीविनः नैके वीरसेनानयः प्राणार्पणद्वारा भारतमातुः रक्षणं कृतवन्तः। कर्णभारे आचार्यभासः कथयति- हुतं च दत्तं च तथैव तिष्ठति । सभ्याः युवानः भारतवर्षं विहाय अन्यराष्ट्रं प्रति कथं पलायनं कुर्वन्तीति महान् क्लेशः। भारविः सत्यमेव निगदति यत् राजा राष्ट्रसमुनत्यर्थं नितरा गुणग्रहणपूर्वकं सम्मानं दद्यात्- गुणानुरोधेन बिना न सत्क्रिया। चाणक्यनीतावप्युक्तमस्ति-

Since 2010
ISSN- 0976-8645
UGC RN-41039

यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवा:।
न च विद्यागमोऽप्यस्ति वासस्तत्र न कारयेत्।।

इत्थं रीत्या यदि केचिदपि पलायनं कुर्वन्ति तत्र विस्मयस्य का वार्ता? अत्र चिन्तनीयो विषयः । राष्ट्रस्य नीतिनिर्धारकाः एव निराकर्त्तुं शक्नुवन्ति यत् राष्ट्रे योग्यानां चयनं तत्तद्-स्थलेषु भवन्तु अन्यथा पलायनं कुत्रचित् राष्ट्राहिताय एवेति मे मतिः।

यथा भवन्तः जानन्ति एव जाह्नवी-संस्कृत-ई-शोधपत्रिकाद्वारा विविधनूतनप्रयोगम्प्रयुज्य राष्ट्रमंगलाय विश्वशान्तिनिमित्तञ्चाभिनव प्रयोगानामनुष्ठानं विधीयते। तेषु कार्यक्रमेषु अन्यतमः कार्यक्रमः विश्वस्मिन् विश्वे प्रथमतः आयोजितः आसीत् वेबिनारकार्यक्रमः। एवमेव संस्कृतान्तर्वीक्षायाः आयोजनं जातम्। यत्र संस्कृतानुरागिणां मनसि संस्कृतसमुत्कर्षाय किमस्ति, किं तेन विहितमित्यादीनां तत्र अन्तर्वीक्षा द्वारा राष्ट्रपुरतः स्थापनमेव लक्ष्यमस्ति।

महदिदं प्रमोदस्थानं यत् जाह्नवी-संस्कृत-ई-शोधपत्रिकाद्वारा छात्राणां पिपठिषूणामुपयोगाय पञ्चचत्वारिंश-षड्त्वारिंशसंयुक्ताङ्कस्य लोकार्पणमत्र विधीयते। राष्ट्रस्य समुन्नत्यर्थं सारस्वतसाधनारता ये तपस्विनः सन्ति, तेषां मनोभावान् शोधपत्रमाध्यमेन अभिव्यनक्ती निजकर्त्तव्यपथि सर्वान् प्रेरयन्ती अनारतं प्रवहन्ती कलकलनिनादकुर्वन्ती हसन्ती लसन्ती इयं जाह्नवी विश्वशान्तिनिमित्तं कालकूटविषपानं विधाय विश्वरक्षकान् पार्वतीजानीन् प्रार्थयते। अस्माकं ऋषयः एतत् सर्वं मनसिनिधाय विश्वशान्तये राष्ट्रमंगलाय च उक्तवान् अस्ति-

ओ३म् आ ब्रह्मन् ब्राह्मणों ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥

- यजुर्वेद २२, मन्त्र २२

अन्ते सम्पादन-पुनर्वीक्षणकर्मसु ये प्रत्यक्षाप्रत्यक्ष-सहायकाः तेषां हार्दं धन्यवादान् ज्ञापयामि।

विद्वच्चरणचञ्चरीकः
झोपाख्यः बिपिनकुमारः।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

# योगदर्शने नञर्थघटितसिद्धान्तविमर्शः[1]

**प्रमुखशब्दाः**

नञ्, पर्युदासः, प्रसज्यः, अविद्या, असम्प्रज्ञातः

## शोधसारः

पातञ्जलयोगदर्शने बहवो नञर्थघटितसिद्धान्ता वर्तन्ते। नञ् नाम एको निपातः यस्य संस्कृतवाङ्मये विविधा अर्था वर्तन्ते। तत्र च प्रधानम् अर्थद्वयं हि – पर्युदासः प्रसज्यः चेति। तत्र तेषु तेषु सिद्धान्तेषु नञः कीदृगर्थोऽभिप्रेतः, तस्यान्यार्थग्रहणे का हानिः को वा लाभः इत्येतत्सर्वं विचार्यतेऽत्र। तद्यथा द्विविधयोर्योगयोर्मध्येऽन्यतमोऽसम्प्रज्ञातयोगः। न सम्प्रज्ञातः असम्प्रज्ञातः। तत्र नञर्थो यदि पर्युदास आश्रीयते तर्हि अर्थः स्यात् सम्प्रज्ञातसमाधिभिन्नो हि समाधिः असम्प्रज्ञात इति। तथात्वे तु असम्प्रज्ञातस्य अलक्ष्ये भवप्रत्ययेऽतिव्याप्तिः, लक्ष्ये च उपायप्रत्ययेऽव्याप्तिर्दुर्वारा। अत एवात्र नञः प्रसज्य एवार्थो ग्राह्यः। तथा तु अर्थः स्यात् सम्यक् न प्रज्ञायते यस्मिन् तदिति। इत्थं च "अविद्याक्लेशः", "अदर्शनं संयोगनिमित्तं" चेत्यादयो बहवः सिद्धान्ता वर्तन्ते यत्र नञर्थो विचार्यः। तदेवात्र संक्षेपेण प्रस्तूयते।

## मूलप्रबन्धः

इह पातञ्जलयोगशास्त्रे योगो हि समाधिः। स च द्विविधः – सम्प्रज्ञातः असम्प्रज्ञातश्च। ग्रहीतृ-ग्रहण-ग्राह्यरूपाणि तत्त्वानि साक्षात्क्रियन्ते सम्प्रज्ञातयोगे, तस्यापि गुणप्रभवात् तत्रापि विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि। यत्र चिद्रूपः पुरुष एवावतिष्ठते सोऽसम्प्रज्ञातयोगः। अयमेव आत्मसाक्षात्कारः, यः ख्याति-परवैराग्य-निरोधान्तरेण न सिद्धो भवति। असम्प्रज्ञातसमाधिसंस्कारश्च विवर्धमानः शाश्वतिकं चित्तलयं साधयति। पुनरुत्थानहीनचित्तलये सति कैवल्यमन्यदा जीवन्मुक्तिरिति। यदा सम्यज्ज्ञानतः निर्गुणात्मज्ञानं न भवति तदा योगी विदेहप्रकृतिलीनरूपेणावतिष्ठते। योगतः सर्वास्मिभावसिद्धौ सर्वज्ञातृत्वादिसिद्धेः ईश्वरीभाव आविर्भवति, ततश्च तद्वैराग्यादपि दोषबीजक्षये कैवल्यं भवतीति यौगिनां दृष्टिः।

सेयं योगविद्या सर्वशास्त्रोपकारिका सर्वैरभ्युपेता च। तथा हि न्यायदर्शनप्रवक्त्रा गौतमेन – "समाधिविशेषाभ्यासात्" (न्या.सू. 4/2/38) इत्यारभ्य "यमनियमाभ्यासादात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः" (न्या.सू. 4/2/46) इत्यन्तैः सूत्रैः योगविद्याभ्युपगमः कृतः। आह च वात्स्यायनः – "योगशास्त्राच्चाध्यात्मविधिः प्रतिपत्तव्यः। स पुनस्तपः, प्राणायामः, प्रत्याहारः, धारणा, ध्यानमिति...उपायस्तु योगाचारविधानम्"[2] इति। वैशेषिकेऽपि सैव दृष्टिः। किं बहुना, स्वयं कणाद एव योगाचारविभूत्या महेश्वरं तोषयित्वा वैशेषिकशास्त्रं प्रणिनाय इति प्रशस्तपाद एव ब्रूते। उत्तरमीमांसायां योगाभ्यास उररीकृतः – "आसीनः संभवात्", "ध्यानाच्च" (ब्र.सू.4/1/7-11) इत्यादिसूत्रजालैः। व्याकरणे योगविद्या अस्त्येव। यथाह हरिः –

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते।। इति। (वाक्यपदीयम्.1/132)

सेयं योगविद्यादौ कपिलप्रणीतापि भगवता पतञ्जलिना एव

[1] Sankar Mondal, Designation: PhD Scholar
Address: Ramakrishna Mission , Vidyamandira, Belur Math, Howtrah – 711202

[2] न्यायसूत्रभाष्यम् (4/2/46), जयनारायणतर्कपञ्चाननसम्पादितम्, पृ.263

Since 2010
ISSN- 0976-8645
UGC RN-41039

सूत्राणि विरच्य भूमौ प्रचारिता। सा एवाधुना पातञ्जलयोगदर्शननाम्नाभिहिता वर्तते। तत्र च साकल्येन चत्वारः पादाः, 193 सूत्राणि च वर्तन्ते। पादाश्च भवन्ति क्रमेण – समाधिपादः साधनपादः विभूतिपादः कैवल्यपादश्चेति।

अस्मिन् योगशास्त्रे ये तावत् सिद्धान्ता अङ्गीकृताः तेषु बहवः सिद्धान्ता हि नञर्थघटिता दृश्यन्ते। नञस्तु विविधा अर्थाः लोके शास्त्रे च प्रसिद्धाः। तत्र प्रथमतः प्रसज्यः पर्युदासश्चेति नञर्थौ। पुनः पर्युदासेऽपि सादृश्यादयो बहवः अर्थाः सम्भवन्ति। नन्वेतेषु अर्थेषु तत्र तत्र नञर्थघटितयोगशास्त्रीयसिद्धान्ते नञः कस्तावदर्थो विवक्षितः अभिप्रेतो वा, तत्रान्यार्थग्रहणे का हानिः को वा लाभः इत्येतत्सर्वमालोचयिष्यतेऽस्मिन् प्रबन्धे। अत्रेदं वक्तव्यं यद् योगशास्त्रे तादृशाः सिद्धान्ता बहवो वर्तन्ते इति तेषु केषाञ्चन दिग्दर्शनमात्रं कारयिष्यतेऽत्र। तद्यथा -

1. **असम्प्रज्ञातयोगः**

योगानुशासनकर्त्रा महर्षिणा पतञ्जलिना शास्त्रादौ यद् "अथ योगानुशासनम्" (पा.यो.सू.1/1) इति प्रथमं सूत्रं सूत्रितं तत्र योगपदवाच्यो हि समाधिः। 'युजिर् योगे' इति युज्धातोः घञि योगशब्दो निष्पन्नः। समाधिर्हि सार्वभौमश्चित्तस्य धर्मः। चित्तस्य पञ्च भूमयः – क्षिप्तं मूढं विक्षिप्तम् एकाग्रं निरुद्धं चेति। समाधिर्हि यद्यपि सार्वभौमश्चित्तस्य धर्मः तथापि क्षिप्त-मूढ-विक्षिप्तभूमिषु यः समाधिः स तु न योगपक्षे वर्तते। यस्त्वेकाग्रे चेतसि निरुद्धे च चेतसि समाधिर्भवति स एव समाधिः योगपदवाच्यो भवति। अत एवायं सिद्धान्तः कर्तुं शक्यते यत् – योगमात्रं समाधिः, किन्तु समाधिमात्रं न योगः। तत्र योगपदवाच्यो योऽयं समाधिः स द्विविधः – सम्प्रज्ञातः असम्प्रज्ञातश्चेति ।

सम्यक् प्रज्ञायतेऽस्मिन् इति सम्प्रज्ञातः। "यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति च क्लेशान्, कर्मबन्धनानि श्लथयति, निरोधमभिमुखं करोति, स सम्प्रज्ञातयोग इत्युच्यते"[3] इति। वस्तुगत्या अस्य समाधेः सिद्धौ सत्त्वपुरुषयोः यदन्यत्वं तस्य ज्ञानं नाम विवेकख्यातिः इत्युत्पद्यते। तच्च भवति प्रकृष्टं ज्ञानं प्रसंख्यानं वा। तस्मादेवायं समाधिः सम्प्रज्ञात इत्युच्यते। अस्य सिद्धिः चतुर्भिः क्रमैः भवति। ते च क्रमा यथा – वितर्कानुगतः, विचारानुगतः, आनन्दानुगतः, अस्मितानुगतश्चेति। तथा च सूत्रं – "वितर्कविचारानन्दास्मितानुगमात्सम्प्रज्ञातः" (पा.यो.सू. 1/18) इति। द्वितीयश्च समाधिर्योगो वा भवति असम्प्रज्ञातः। चित्तस्य निरुद्धभूमौ घटतेऽयं योगः। तथा च सम्प्रज्ञातयोगवशात् उत्पन्ना या विवेकख्यातिः तस्या अपि सत्त्वगुणात्मकत्वात् चितिशक्तेः विपरीतस्वभावात् तस्यामपि विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि, तदवस्थं चित्तं संस्कारोपगं भवति। अयमेव समाधिः निर्बीजः समाधिः असम्प्रज्ञातसमाधिर्वा।

नन्वत्र असम्प्रज्ञातपदे यः नञ् दृश्यते तस्य कीदृगर्थो ग्राह्य इति विचार्यः। यदि नञः तत्र पर्युदासत्वं स्वीक्रियते तर्हि असम्प्रज्ञातपदस्यार्थः स्यात् – न सम्प्रज्ञातः असम्प्रज्ञातः अर्थात् सम्प्रज्ञातसमाधिभिन्नो हि समाधिः असम्प्रज्ञातसमाधिः इति। तथात्वे तु असम्प्रज्ञातसाधिलक्षणस्य लक्ष्ये उपायप्रत्ययेऽव्याप्तिः, अलक्ष्ये च भवप्रत्ययेऽतिव्याप्तिः। न च "स खल्वयं द्विविधः – उपायप्रत्ययो भवप्रत्ययश्च"[4] इति भाष्यवचनात् भवप्रत्ययोऽपि असम्प्रज्ञातयोग एव इति तस्यापि लक्ष्यत्वेन प्रामादिकीयमतिव्याप्तिशङ्केति वाच्यं तस्य योगाभासत्वात्। यद्यपि प्रथमतः भगवता व्यासेन असम्प्रज्ञातयोगकोटौ एव भवप्रत्ययस्य गणना कृता तथापि तस्य कैवल्यप्रदातृत्वाभावात् सोऽयं न योगः,

---

[3] व्यासभाष्यम् (1/1), पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.1

[4] व्यासभाष्यम्, पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.68

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

अपि तु योगाभास एवेति व्यासस्याशयः। अत एव तेन भवप्रत्ययस्य व्याख्यानावसरे कथितं – "विदेहानां देवानां भवप्रत्ययः। ते हि स्वसंस्कारमात्रोपगेन चित्तेन कैवल्यपदमिवा-नुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमति-वाहयन्ति। तथा प्रकृतिलयाः साधिकारे चेतसि प्रकृतिलीने कैवल्यपदमिवानुभवन्ति, यावन्न पुनरावर्ततेऽधिकारवशाच्चित्तम्"[5] इति।

किञ्च भोजवृत्तौ अयं प्रत्यक्षतः योगाभासशब्देन आख्यायितः। तथाहि – "तेषां परतत्त्वादर्शनाद्योगाभासोऽयम्"[6] इति। अत एव भवप्रत्ययो हि असम्प्रज्ञातयोगलक्षणस्य अलक्ष्यः। तत्र भवः संसारः, स एव प्रत्ययः कारणं यस्य स भवप्रत्ययः इति।

इदानीं यदि सम्पज्ञातभिन्नः असम्प्रज्ञातः इत्युच्यते तदा भवप्रत्ययेऽतिव्याप्तिः निश्चिता। पुनः असम्प्रज्ञातस्य यो लक्ष्यः उपायप्रत्ययः तत्राव्याप्तिः। उपायप्रत्ययो हि समाधिः योगिनां भवति। उपायाः श्रद्धादयः, प्रत्ययः कारणं यस्य स उपायप्रत्ययः। के च ते उपाया इति चेत्सूत्रितं पतञ्जलिना – "श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्" (पा.यो.सू. 1/20) इति। तत्र श्रद्धा नाम चेतसः सम्प्रसादः। श्रद्धापदेन तु यम-नियम-आसन-प्राणायाम-प्रत्याहाराणां परामर्शः। श्रद्दधानस्य पुरुषस्य वीर्यमुपजायते। वीर्यं नाम प्रयत्नः धारणारूप उत्साहो वा। समुपजातवीर्यस्य स्मृतिरुपतिष्ठते। स्मृतिश्च नाम ध्यानम्। स्मृत्युपस्थाने चित्तमनाकूलं समाधीयते। एवं च धारणा-ध्यान-समाधिभ्यः सम्प्रज्ञातयोगसिद्धिर्भवति। उक्तं च –

"तदेवमखिलयोगाङ्गसम्पन्नस्य सम्प्रज्ञातो जायते"[7] इति।

सम्प्रज्ञातयोगात् प्रज्ञाविवेको नाम विवेकख्यातिः उत्पद्यते। तस्य च प्रज्ञाविवेकस्य अभ्यासात् तद्विषयकवैराग्याच्च उपायप्रत्ययसमाधिः असम्प्रज्ञातसमाधिः भवति। एवं च उपायप्रत्ययासम्प्रज्ञातसमाधिरूपकार्यस्य कारणं हि सम्प्रज्ञातसमाधिः। इदानीं सम्प्रज्ञातसमाधिभिन्नो हि असम्प्रज्ञात इत्युक्ते तु तत्र लक्षणस्याव्याप्तिः, यतो हि योगदार्शनिकाः कार्यकारणयोस्तादात्म्यमेवाङ्गीकुर्वन्ति सत्कार्यवादसिद्धान्ताङ्गीकारात्। अत एव तेषां नये कार्यं न कारणादत्यन्तं भिन्नम्। तस्मात् उपायप्रत्ययः न सम्प्रज्ञातसमाधेः अत्यन्तं भिन्नः। अत एवाव्याप्तिः दुर्वारा। ननु पर्युदासे एव तत्सादृश्यरूप एव अर्थो गृह्यतामिति चेन्न तथात्वे उपायप्रत्यये कथञ्चिदव्याप्तिवारणसम्भवेऽपि भवप्रत्यये तु अतिव्याप्तिः यथावदवस्थिता। अत एवात्र नञः पर्युदासपक्षस्त्याज्यः। प्रसज्यत्वाङ्गीकारे तु अर्थः स्यात् न सम्प्रज्ञायते अस्मिन्निति असम्प्रज्ञातः। "असूर्यम्पश्या राजदारा" इत्यादिवदत्र समासः। सम्प्रज्ञातसमाधिवशात् विवेकख्यातीतरचित्तवृत्तीनां निरोधो भवति। असम्प्रज्ञाते तु तस्या विवेकख्यातेरपि निरोधो भवति। अत एव तस्यामवस्थायां चित्तस्य किमपि वृत्तिज्ञानं न तिष्ठतीत्यतः संगच्छते तस्य असम्प्रज्ञातसंज्ञा। अतः असम्प्रज्ञातः इत्यत्र नञः प्रसज्यत्वमेवार्थो भवितुर्हति। मन्ये इदमेवाभिप्रेत्य मुनिना व्यासेन निर्बीजसमाधिस्वरूपवर्णनावसरे कथितं –

"न तत्र किञ्चित्सम्प्रज्ञायते इत्यसम्प्रज्ञातः"[8] इति।

5 व्यासभाष्यम् (1/19), पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.68

6 भोजवृत्तिः(1/19), पातञ्जलयोगदर्शनम्, स्वामिविज्ञानाश्रम-सम्पादितम्, पृ.51

7 तत्त्ववैशारदी, पातञ्जलयोगसूत्राणि, हरिनारायण-आपटेसम्पादितानि, पृ.24

8 व्यासभाष्यम् (1/2), पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.9

Since 2010
ISSN- 0976-8645
UGC RN-41039

2. अविद्याक्लेशः

चित्तस्य पञ्चसु भूमिषु आद्यत्रयं व्युत्थानम् अन्तिमद्वयं च निरुद्धम्। निरुद्धभूमौ अभ्यासवैराग्याभ्यां सम्प्रज्ञातासम्प्रज्ञातसमाधी भवतः। ननु व्युत्थितचित्तस्य का गतिः इति चेदुच्यते तेषामपि क्रियायोगवशात् चित्तं समाधीयते। तत्र तपःस्वाध्याय-ईश्वरप्रणिधानानि क्रियायोगः। तप इति कर्मयोगः, स्वाध्याय इति ज्ञानयोगः ईश्वरप्रणिधानमिति भक्तियोगः। एवं च तेषां त्रयाणां योगानां समुच्चयो हि क्रियायोगः। तस्य हि फलं भवति क्लेशतनूकरणं समाधिभावनं च। तत्र क्लेशा हि अविद्यास्मिता-राग-द्वेषाभिनिवेशाः पञ्च। तेषां तनूकरणं नाम स्वकार्यकरणप्रतिबन्धः क्रियतेऽनेन क्रियायोगेन। तेषां च कार्यं भवति चित्तस्य बाधनालक्षणपरितापोत्पादनम्।

क्लेशेषु आद्यं हि अविद्या। न विद्या अविद्या इति नञ्समासः। अत्र नञर्थः कीदृश इति विचार्यः। यद्युच्यते नञर्थः प्रसज्यः तर्हि अत्र पूर्वपदार्थप्राधान्यमङ्गीकृत्य विद्याया अभावः नाम ज्ञानाभावः इत्येवमर्थः कर्तव्यः। किन्तु तथात्वे योगसूत्रकृता अविद्याया यल्लक्षणमुक्तम् – "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" (पा.यो.सू. 2/5) इति तेन सह सामञ्जस्यं न भवति। तथाहि अविद्या नाम – अनित्ये कार्ये वस्तुनि नित्यख्यातिः, अशुचिषु कायादिषु शचित्वख्यातिः, दुःखेषु विषयेषु सुखत्वख्यातिः, अनात्मनि शरीरे आत्मत्वख्यातिः इति। ख्यातिर्नाम च ज्ञानम्। एवं तर्हि सूत्रकृन्नये या अविद्या सा भावपदार्थ एव न तु अभावपदार्थः। अपि चोक्तं तेन "अविद्या क्षेत्रमुत्तरेषां प्रसुप्त-तनु-विच्छिन्नोदाराणाम्" (पा.यो.सू. 2/4) इति। अत एव अविद्या हि अस्मितादीनां चतुर्णां क्लेशानां कारणम्। तत्र अस्मितादयो हि भावपदार्थाः। योगसिद्धान्ते अभावात् भावोत्पत्तिः नैवाङ्गीक्रियते। यद्यपि न्यायवैशेषिकनये कार्योत्पत्तौ अभावस्य निमित्तकारणत्वमङ्गीकृतं तथापि अभावस्य उपादानकारणत्वं कथमपि नाभ्युपेयम्। अत्र तु अविद्या अस्मितादीनाम् उपादानकारणमेव न तु निमित्तकारणम्। अत एव भोजवृत्तौ "सा क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनाम्"[9] इत्यादिना अविद्याया अस्मितादीनां प्रसवभूमित्वं ख्यापितम्। अत एव अविद्या न हि अभावपदार्थः। अत एव नात्र नञर्थः प्रसज्यः।

पर्युदासस्य भावपरतया अविद्या इति नञ्समासस्य उत्तरपदार्थप्राधान्यम् अन्यपदार्थप्राधान्यं वा कल्प्यम्। तत्र उत्तरपदार्थप्राधान्ये विद्यैव कस्यचिदभावेन विशिष्टा गम्यते, तन्नाम अभावविशिष्टविद्येति। सा तु क्लेशादिपरिपन्थिनी एव न तु तद्बीजम्। "न हि प्रधानोपघाती प्रधानगुणो युक्तः। तदनुपघाताय गुणे त्वन्याय्यकल्पना। तस्माद्विद्यास्वरूपानुपघाताय नञोऽन्यथाकरणमध्याहारो वा निषेध्यस्य"[10] इति।

तत्र अन्यपदार्थप्रधानत्वे तु अविद्यमानविद्या बुद्धिः इति वक्तव्या। तथात्वेऽपि तस्याः क्लेशादिबीजत्वं नैव युक्तं, यतो हि नासौ बुद्धिः विद्याया अभावमात्रेण क्लेशादिबीजं विवेकख्यातिपूर्वकनिरोधसम्पन्नाया अपि तथात्वप्रसङ्गात्। एवञ्च उभयथापि नाविद्यायाः क्लेशादिमूलत्वं सङ्गच्छते। अत एव अविद्या इत्यत्र "न प्रसज्यप्रतिषेधः, नापि विद्यैवाविद्या, न तदभावविशिष्टा बुद्धिः, अपि तु विद्याविरुद्धं विपर्ययज्ञानमेव अविद्या इत्युक्तम्"[11] इति। तस्मादविद्या इत्यत्र अतस्मिन् तत् इति प्रतिभासः, विपर्ययज्ञानं मिथ्याज्ञानं वा। तथा चोक्तं योगभाष्यकृता –

---

[9] भोजवृत्तिः, पातञ्जलयोगदर्शनम्, स्वामिविज्ञानाश्रम-सम्पादितम्, पृ.141

[10] तत्त्ववैशारदी. पातञ्जलयोगदर्शनम्, रामशङ्करभट्टाचार्यसम्पादितम्, पृ.56

[11] तत्त्ववैशारदी. पातञ्जलयोगदर्शनम्, रामशङ्करभट्टाचार्यसम्पादितम्, पृ.56

Since 2010
ISSN- 0976-8645
UGC RN-41039

"तस्याश्च अमित्रागोष्पदवद्वस्तुसतत्त्वं विज्ञेयम्। यथा नामित्रो मित्राभावः, न मित्रमात्रं किन्तु तद्विरुद्धः सपत्नः। तथा चोगोष्पदं न गोष्पदाभावो न गोष्पदमात्रं किन्तु देश एव ताभ्यामन्यद्वस्त्वन्तरम्। एवम् अविद्या न प्रमाणं न प्रमाणाभावः किन्तु विद्याविपरीतं ज्ञानान्तरमविद्या"[12] इति।

शब्दार्थयोः यः सम्बन्धः स तु लोकाधीनावधारणः। लोके च उत्तरपदार्थप्रधानस्यापि न उत्तरपदाभिधेयोपमर्दकस्य तल्लक्षिततद्विरुद्धपरतया तत्र तत्र उपलब्धेः इहापि तद्विरुद्धे वृत्तिः इति आशयः। नञः विरुद्धरूपार्थस्तु लाक्षणिकः। सोऽर्थः पर्युदासे एवान्तर्भुक्तः। तदुच्यते –

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।

इति।

3.अदर्शनं संयोगनिमित्तम्

योगदर्शनस्य प्रधानं तत्त्वद्वयं प्रकृतिः पुरुषश्च। बुद्यादयश्च प्रकृतेरेव परिणामभूताः। साकल्येन तत्र पञ्चविंशतिः तत्त्वानि अङ्गीकृतानि। केषाञ्चिन्नये ईश्वरोऽपि योगदर्शनस्य अधिकं तत्त्वमिति स्वीकृतम्। परन्तु तद्भ्रममात्रं यतो हि ईश्वरो न हि अधिकं किमपि तत्त्वमपि तु पुरुषविशेष एव। सूत्रितं च – "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" (पा.यो.सू.1/24) इति। यद्वा भवतु तत्र प्रकृतिर्हि एका, "प्रकाशस्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्" (पा.यो.सू. 2/18) इति। पुरुषस्तु द्रष्टा नित्यशुद्धबुद्धमुक्तस्वभावो नाना च। तथा च सूत्रं – "द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः" (पा.यो.सू.2/20) इति। तत्र जातविषयोपरागायामेव बुद्धौ सन्निधिमात्रेणैव पुरुषस्य द्रष्टृत्वं नान्यथा। तत्र भिन्नप्रकृतिकयोः द्रष्टृदृश्ययोः संयोग एव दुःखस्य संसारस्य च हेतुः। अत्र संयोगो हि सहजभोग्यभोक्तृभावस्वरूपान्नान्यः। न हि तयोः नित्यव्यापकयोः स्वरूपादतिरिक्तः कश्चित् संयोगः। यदेव भोग्यस्य भोग्यत्वं भोक्तुश्च भोक्तृत्वमनादिसिद्धं स एव संयोगः। अयं च संयोग किंनिमित्तमिति चेदुच्यते सूत्रकृता –

"स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः" (पा.यो.सू.2/23) इति। तत्र स्वं नाम दृश्यं, स्वामी च पुरुषः। तत्र या दृश्यस्य स्वरूपोपलब्धिः सा भोगः, या तु द्रष्टुः स्वरूपोपलब्धिः सोऽपवर्गः। स च संयोगः दर्शनकार्यावसानः। कथं च तत्सम्भवतीति चेदुच्यते – संयोगस्य निमित्तं हि अदर्शनं विपर्ययज्ञानम् अविवेकख्यातिर्वा। तस्य विपरीतं भवति दर्शनम्। एवं च दर्शने सति तद्विरुद्धस्य अदर्शनस्य नाशो भवति, ततश्च संयोगोऽपि निवर्तते। उक्तं च भगवता व्यासेन योगभाष्यकारेण –

"अदर्शनं संयोगनिमित्तम्"[13] इति।

न दर्शनम् अदर्शनम् इति। अत्र नञः पर्युदासप्रसज्ययोः कोऽर्थो भाष्यकृदभिमत इति विचार्यः। पर्युदासनञ् विधौ पर्यवस्यति प्रसज्यश्च निषेधे। तत्र प्रसज्यपक्षे पर्युदासपक्षे च यावन्तः शास्त्रकाराभिमतविकल्पाः सम्भवन्ति तेऽधः प्रस्तूयन्ते ।

प्रसज्यपक्षे

i. अदर्शनं नाम दृशिरूपस्य स्वामिनो दर्शितविषयस्य प्रधानचित्तस्यानुत्पादः स्वस्मिन्दृश्ये विद्यमाने

12 व्यासभाष्यम् (2/5), पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.169

13 व्यासभाष्यम् (2/23), पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.200

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

दर्शनाभावः[14] इति। दर्शितः शब्दादिविषयः सत्त्वपुरुषान्यता च येन चित्तेन तद्धि प्रधानं चित्तम् उत्कृष्टचित्तं वा। तद्विषयस्यानुत्पाद एव अदर्शनमित्याशयः। उक्तं च भास्वत्यां – "विवेकस्य अनुत्पाद एव अदर्शनमित्यर्थः"[15] इति।

पर्युदासपक्षे

i. अदर्शनं गुणानामधिकारः। अधिकारो हि गुणानां कार्यारम्भणसामर्थ्यम्।

ii. अदर्शनम् अर्थवत्ता गुणानाम्। "सत्कार्यसिद्धेः भाविभोगापवर्गयोः अव्यपदेश्ययोः स्वकारणेषु गुणेषु अवस्थानम् इत्यर्थः"।[16]

iii. अदर्शनम् अविद्या स्वचित्तेन सह निरुद्धा स्वचित्तस्योत्पत्तिबीजम्। अविद्या प्रतिक्षणं प्रलये च स्वचित्तेन स्वाधारभूतचित्तस्य प्रत्ययेन सह निरुद्धा संस्काररूपेण स्थिता, स्वचित्तस्य साविद्यप्रत्ययस्य उत्पत्तिबीजमिति निर्गलितार्थः।

iv. अदर्शनं स्थितिसंस्कारक्षये गतिसंस्काराभिव्यक्तिः। प्रधाननिष्ठं हि संस्कारद्वयं स्थितिसंस्कारः गतिसंस्कारश्च। तत्र स्थितिसंस्कारेण सत्त्वरजस्तमसां साम्यावस्थायां प्रकृतिः अपरिणामिनी तिष्ठति। स्थितिसंस्कारस्य क्षये यदा गतिसंस्कारस्याभिव्यक्तिर्भवति तदा सत्त्वरजस्तमसां वैषम्येण महदादिप्रपञ्चोत्पत्तिः भवति। इयं गतिसंस्काराभिव्यक्तिरेवादर्शनम्। तयैव च पुंप्रकृत्योः संयोगो जन्यत इत्याशयः।

v. अदर्शनं दर्शनशक्तिरेव। यथा प्रजापतिव्रते नेक्षेत उद्यन्तमादित्यमत्यनीक्षणप्रत्यासन्नः संकल्पो गृह्यते तद्वदत्रापि दर्शननिषेधे तत्प्रत्यासन्ना तन्मूला शक्तिरुच्यते। अस्य मतस्य परिपोषकाः "प्रधानस्यात्मख्यापनार्था प्रवृत्तिः" इति श्रुतिमेव स्वमतपरिपोषकत्वेन गणयन्ति। तथा च ख्यापनं दर्शनं, तदर्था चेत् अदर्शनरूपा प्रवृत्तिः तदा प्रवृत्तेः शक्तिरूपावस्थैव प्रवृत्तिसामर्थ्यमेव वा अदर्शनमित्येषां राद्धान्तः।

vi. अदर्शनं द्रष्टुः दृश्यस्य चोभयस्य धर्मः। तथाहि अस्य मतस्य उपस्थापयितारः एवमामनन्ति यत् दर्शनं ज्ञानं द्रष्टृदृश्यसापेक्षं तस्मात् तत् दर्शनं , तद्भेदः अदर्शनं चापि तदुभयस्य धर्म इति।

vii. दर्शनज्ञानमेव अदर्शनम्। तन्नाम विवेकव्यतिरिक्तं यद्दर्शनज्ञानं शब्दादिरूपं तदेव अदर्शनम् इति।

अत्र अदर्शनशब्दार्थस्य साकल्येन येऽष्टौ विकल्पा उक्तास्तेषाम् एक एव नञः प्रसज्यत्वमङ्गीकृत्य , अपरे तु सर्वे पर्युदासमधिकृत्य। तेषु च चतुर्थपक्षं विहाय प्रायः सर्वत्रैव दोषा वर्तन्ते। तथाहि स्वास्थ्यस्याभाव एव ज्वर इति ज्वरलक्षणं यथा असमीचीनं तथैव प्रसज्यपक्षे अदर्शनस्य यत् स्वरूपमुक्तं तदपि असमीचीनम्। पर्युदासपक्षे च प्रथमो पक्षो न सम्यक्तया अदर्शनं लक्षयति। तत्र तु यदा गुणकार्यं विद्यते तदा अदर्शनमपि विद्यते इत्येतावन्मात्रमेव यथार्थम्। नेदमदर्शनं सम्यग् लक्षयति यथा यावद्दाहस्तावज्ज्वर

[14] व्यासभाष्यम् (2/23), पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.200
[15] भास्वती (2/23). पातञ्जलयोगदर्शनम्, हरिहरानन्द-आरण्यसम्पादितम्, पृ. 540
[16] योगवार्तिकम् (2/23)

Since 2010
ISSN- 0976-8645
UGC RN-41039

इत्युक्तिर्यथा न सम्यक् ज्वरलक्षणं तद्वत्।

पर्युदासे द्वितीयोऽपि न सम्यक् गुणानामर्थवत्त्वं तथादर्शनञ्च अविनाभावीति वाक्यं यथार्थमपि न तदुल्लेखमात्रमेव सम्यग्लक्षणम्। पर्युदासस्य चतुर्थे विकल्पे मूलकारणस्य स्वभावमात्रमेवोक्तं, न च तन्मात्रकथनं व्यवहितकार्यस्य संयोगस्य स्वरूपं लक्षयेत्। यथा विकारशीलाया मृत्तिकायाः परिणामविशेषो घट इति न चैतद् घटद्रव्यस्य सम्यग्विवरणम्। पञ्चमेऽपि विकल्पे पूर्वदोषप्रसङ्गः आतपाज्जातं शस्यं तण्डुलमित्युक्तिर्यथा न तण्डुलस्य सम्यग् बोधाय भवति तथैव अदर्शनं चित्तधर्मः तस्य व्यवहितमूलकारणस्य प्रधानस्य प्रवृत्तिस्वभावकथनमेव नानवद्यं तल्लक्षणम्। षष्ठे तु द्रष्टृदृश्यापेक्षमदर्शनम् इत्युक्तिर्यथार्थापि न तु तादृश्या दृशा अदर्शनं व्याकर्तव्यम्। पर्युदासपक्षेऽन्तिमे विकल्पेऽपि दोषः। ज्ञानकाले द्रष्टृदृश्ययोः संयोगस्यावश्यम्भावित्वेऽपि इन्द्रियादौ अभिमानरूपस्य विपर्ययस्य फलमेव शब्दादिज्ञानं , तस्मान्न तज्ज्ञानं संयोगहेतोरदर्शनस्य स्वरूपं भवितुमर्हति।

तत्र पर्युदासपक्षे अदर्शनशब्दार्थस्य यः तृतीयो विकल्प उल्लिखितः अविद्या स्वचित्तेन सह निरुद्धा स्वचित्तस्योत्पत्तिबीजम् इति स एव समीचीनो भाति। किञ्च तत्रैव सूत्रकाराणामपि स्वारस्यम्। अत एव तमेव पक्षं समर्थयता सूत्रकृता सूत्रितं –

"तस्य हेतुरविद्या" (पा.यो.सू.2/24) इति।

तस्य नाम अविवेकख्यातिरूपस्य पुंप्रकृतिसंयोगस्य हेतुः कारणं हि अविद्या। एवं च अविद्या संयोगनिमित्तमिति सूत्रकृदाशयः। "अदर्शनं संयोगनिमित्तम्" इति च भाष्यकारेण उक्तम्। एवं च पर्युदासस्य तृतीय एव पक्षः सूत्रकृद्भाष्यकृतोः सामञ्जस्यं विदधाति इत्यतः अत्र सिद्धान्ते अदर्शनपदे नञः पर्युदासरूपार्थ एवाङ्गीकरणीयः।

## 4. विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्

प्रभाकरमीमांसकं व्यतिरिच्य अन्ये सर्वेऽपि दार्शनिकाः विपर्ययज्ञानं स्वीकृतवन्तः। योगदर्शने वृत्तिपञ्चके एवान्तर्भवति विपर्यय इति। अत एव मुनिना पतञ्जलिना विपर्ययस्वरूपं प्रतिपादितं सूत्रेण – "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" (पा.यो.सू.1/8) इति। तत्र विपर्यय इति लक्ष्यनिर्देशः, मिथ्याज्ञानमिति लक्षणम्। तत्र मिथ्याज्ञानस्य स्वरूपमुच्यते – "अतद्रूपप्रतिष्ठम्" इति। तस्य रूपं तद्रूपमिति षष्ठीतत्पुरुषसमासः। न तद्रूपम् अतद्रूपमिति नञ्तत्पुरुषसमासः। अतद्रूपे प्रतिष्ठम् अतद्रूपप्रतिष्ठमिति सप्तमीतत्पुरुषसमासः।

अत्र यदि नञः प्रसज्यरूपार्थः स्वीक्रियते तर्हि अतद्रूपप्रतिष्ठपदस्यार्थः स्यात् तद्रूपे न प्रतिष्ठम् इति। अत्र तद्रूपं नाम कस्यापि वस्तुनः वास्तविकं रूपम्। यथा घपदार्थस्य वास्तविकं रूपं घटत्वविशिष्ट-कम्बुग्रीवाद्यवयवसंस्थानविशिष्ट-जलाहरणपात्रविशेष इति। यदि तस्य ज्ञाने तस्य वास्तविकं यद्रूपं तत् न भासते, अर्थात् तद्रूपं न विषयीकरोति तज्ज्ञानं तर्हि तद्भवति मिथ्याज्ञानं, तच्च विपर्ययपदवाच्यः। भोजवृत्तावुक्तं –

> "अतद्रूपप्रतिष्ठमिति। तस्यार्थस्य यद्रूपं तस्मिन् रूपे न प्रतिष्ठति, तस्यार्थस्य यत् पारमार्थिकं रूपं न तत् प्रतिभासयतीति यावत्"[17] इति।

ननु घटज्ञाने यदि घटपदार्थस्य वास्तवं रूपं न विषयीभवति, अपि च अन्यत् किमपि न विषयीभवति, तर्हि तदपि अतद्रूपप्रतिष्ठमित्येवोच्यते नञः प्रसज्यत्वाङ्गीकारे। तदा तु तादृशो भ्रमः अख्यातिपरक[18] एवोच्यते। परन्तु योगशास्त्रे भ्रमस्थले

---

[17] भोजवृत्तिः, पातञ्जलयोगदर्शनम्, स्वामिविज्ञानाश्रम-सम्पादितम्, पृ.22

[18] ख्याप्यते इति ख्यातिः इति व्युत्पत्त्या ख्यातिशब्दस्यार्थः ज्ञानम्। किन्तु ख्यातिवादान्तर्गतख्यातिशब्दस्तु भ्रमज्ञाने योगरूढम्। अतः

Since 2010
ISSN- 0976-8645
UGC RN-41039

अख्यातिवादो न सिद्धान्तः किन्तु अन्यथाख्यातिरेव। तथा चोक्तं योगवार्तिके विज्ञानभिक्षुणा –

"अत्र च शास्त्रे अन्यथाख्यातिः सिद्धान्तः न तु सांख्यवदविवेकमात्रम्, अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या इत्यागामिसूत्रात्"[19] इति।

तथा च प्रसज्यपक्षाङ्गीकारे स्वसिद्धान्तविरोधापत्तिः। अत एवात्र नञः पर्युदासत्वमङ्गीकार्यम्। पर्युदासेऽपि तदन्यत्वरूपार्थस्वीकारे अतद्रूपप्रतिष्ठमित्यस्यार्थः स्यात् – तद्रूपभिन्ने प्रतिष्ठम् इति। अर्थात् वस्तुनः वास्तविकं यद्रूपं तस्माद् भिन्ने रूपे तज्ज्ञानं यदि प्रतिष्ठितं भवति तर्हि तन्मिथ्याज्ञानमेव विपर्ययपदवाच्यो भवति। यथा – शुक्तौ इदं रजतमिति ज्ञानम्। अत्रेदं शुक्तेः ज्ञानं न शुक्तेः वास्तविकं रूपं विषयीकरोति, किन्तु तद्भिन्नं रजतरूपं विषयीकरोतीति विपर्ययः।

किञ्च अतद्रूपपदस्यैवं व्याख्याने संशयस्यापि विपर्ययेऽन्तर्भावो भवति। तथाहि – स्थाणोर्ज्ञानकाले ज्ञानं स्थाणुरूपभिन्ने स्थाणुर्वा पुरुषो वेति स्थाणुपुरुषोभयरूपे प्रतिष्ठितं भवति, अतः तदतद्रूपप्रतिष्ठम्। अतः सोऽपि विपर्यय एव। अत उक्तं भोजवृत्तौ –

"संशयोऽप्यतद्रूपप्रतिष्ठितत्वान्मिथ्याज्ञानम्"[20] इति।

कथितं च तत्त्ववैशारद्याम्-

"अतः संशयोऽपि संगृहीतः"[21] इति।

## 5. तत्र स्थितौ यत्नोऽभ्यासः

चित्तस्य पञ्चानां वृत्तीनां निरोध एव योगपदवाच्योऽस्मिन् योगशास्त्रे। ननु वृत्तिनिरोधे उपायः क इत्याह – अभ्यासः वैराग्यं चेति। "तत्र वैराग्येण विषयस्रोतः खिलीक्रियते, विवेकदर्शनाभ्यासेन च विवेकस्रोत उद्घाट्यते इत्युभयाधीनश्चित्तवृत्तिनिरोधः"[22] इति। अभ्यासलक्षणकथनावसरे उक्तं मुनिना –

"तत्र स्थितौ यत्नोऽभ्यासः" (पा.यो.सू.1/13) इति।

यत्नो नाम प्रयत्नः चेष्टा वा। स्थितिनिमित्तं स्थित्यर्थं वा यः यत्नः स एव अभ्यासपदवाच्योऽत्रेत्यर्थः। ननु का नाम स्थितिः इति चेदुक्तं भाष्यकृता –

"चित्तस्य अवृत्तिकस्य प्रशान्तवाहिता स्थितिः"[23] इति।

अत्र अवृत्तिकस्य इत्यत्र नञर्थः यदि प्रसज्यः अङ्गीक्रियते तर्हि अर्थः स्यात् – वृत्तिरहितस्य वृत्तिशून्यस्य वा चित्तस्य प्रशान्तवाहिता एव स्थितिः, तदर्थः प्रयत्नः अभ्यासः। अत एव उक्तं भोजवृत्तौ –

"वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः स्थितिः"[24] इति।

हरिहरानन्दकृतभास्वतीटीकायामपि मन्ये इदमेवाभिप्रेत्य कथितं –

"निरुद्धवृत्तिकस्य चित्तस्य या प्रशान्तवाहिता निरुद्धावस्थायाः

---

ख्यातिवादो नाम भ्रमज्ञानवादः। यत्र भ्रमज्ञानं भवति तत्र वस्तुतः कस्य ज्ञानं भवति इति विचारे प्रवृत्ते तु दार्शनिकाः पञ्चधा विभक्ताः पञ्च ख्यातिवादान् उपस्थापितवन्तः। ते हि –

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।
तथानिर्वचनीयख्यातिरित्येतत्ख्यातिपञ्चकम्।। इति।

[19] योगवार्तिकम् 1/8

[20] भोजवृत्तिः, पातञ्जलयोगदर्शनम्, स्वामिविज्ञानाश्रम-सम्पादितम्, पृ.22

[21] तत्त्ववैशारदी. पातञ्जलयोगदर्शनम्, रामशङ्करभट्टाचार्यसम्पादितम्, पृ.12

[22] व्यासभाष्यम् (1/22), पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.50

[23] व्यासभाष्यम् (1/13), पातञ्जलयोगदर्शनम्, सुरेशचन्द्रश्रीवास्तवसम्पादितम्, पृ.53

[24] भोजवृत्तिः, पातञ्जलयोगदर्शनम्, स्वामिविज्ञानाश्रम-सम्पादितम्, पृ.33

Since 2010
ISSN- 0976-8645
UGC RN-41039

प्रवाहः सा हि मुख्या स्थितिः"[25] इति। किन्तु अवृत्तिकपदस्य तादृशोऽर्थः नात्यन्तं संगच्छतेऽत्र, यतो हि अभ्यासेनैव यदि चित्तं निरुद्धवृत्तिकं वृत्तिरहितं वा भवति तर्हि वैराग्येण नास्ति किमपि प्रयोजनम्। तथात्वे तु "अभ्यासवैराग्याभ्यां तन्निरोधः" इत्यस्मिन् योगसूत्रे वैराग्यपदोपादानवैयर्थ्यमापद्यते। किञ्च नैतद् दृश्यतेऽपि। तथाहि चित्तस्य पञ्चसु भूमिषु मध्ये अभ्यासेन तु एकाग्रभूमौ प्राप्तौ सत्यामपि निरुद्धभूम्यर्थं गुणवैराग्यं परवैराग्यं वावश्यकम्। किञ्च निरुद्धे एव भूमौ असम्प्रज्ञातसमाधिः भवति। तथाहि एकाग्रभूमौ विवेकदर्शनाभ्यासेन या विवेकख्यातिः भवति सा तु सत्त्वगुणात्मिका। अत एव तदा रजस्तमोगुणयोः वृत्तिरहितत्वेऽपि सत्त्वगुणस्य वृत्तिस्तु स्यादेव। ततः चित्तं तस्यामपि विरक्तं सत् तामपि ख्यातिं निरुणद्धि इति परवैराग्येण एव चित्तस्य वृत्तिरहितत्वमापद्यते। तदैव द्रष्टुः स्वरूपेऽवस्थानं भवति। अत एव समाध्यर्थम् अभ्यासवैराग्ययोः उभयोरेव अस्ति प्रयोजनम्। अत एव तत्र भाष्यपङ्क्तौ अवृत्तिकपदे नञः प्रसज्यत्वं नाभ्युपेयम्।

एवं तर्ह्यत्र पर्युदासोऽङ्गीकरणीयः। पर्युदासेऽपि सादृश्यादयो विविधा अर्था भवन्ति इति तेषु अल्पतारूपोऽर्थ एवात्र ग्राह्यः। तथा च अवृत्तिकपदस्यार्थो भवति अल्पवृत्तिकस्य इति। रजस्तमोगुणवृत्तिशून्यं हि चित्तम् अल्पवृत्तिकम्। तस्यैव चित्तस्य प्रशान्तवाहिता हि स्थितिः, तन्निमित्तः प्रयत्नः अभ्यासः इत्याशयः। ननु पर्युदासे लक्षणाश्रयणात् लक्षणायाः जघन्यवृत्तित्वात् तत्परित्यज्य अवृत्तिकस्य इत्यत्र नञः प्रसज्यत्वमेवोररीकृत्य तत्र वृत्तिपदस्य लक्षणया वृत्त्यन्तररूपार्थकरणेऽपि वृत्त्यन्तरशून्यत्वरूपार्थसंगतिः स्यादिति चेन्न, प्रसज्यपक्षाङ्गीकारे तु वृत्तिपदे लक्षणा कार्या, पर्युदासाङ्गीकारे तु नञ्पदे। उभयत्रैव लक्षणा तु कार्या एव। एवं च नञः पर्युदासे या लक्षणा सा तु प्रसिद्धैव अतः निरूढलक्षणा। किन्तु वृत्तिपदस्य वृत्त्यन्तररूपार्थे लक्षणा अप्रसिद्धा। अत एव प्रसिद्धलक्षणां विहाय अप्रसिद्धलक्षणाया अङ्गीकारः दोषाय एव। तस्मादत्र नञा पर्युदास एवाङ्गीकरणीयः।

## सन्दर्भग्रन्थसूची

1. Patanjali. *Pātañjalayogadarśana.* Edited by Suresh Chandra Shrivastava, Varanasi, Chaukhamba Surabharati Prakashan, 1973
2. Patanjali. *Pātañjala Yogadarśana*. Edited by Swami Hariharananda Aranya, Kolkata, Paschimbanga Rajyo Pustak Parshad, 2015
3. Patanjali. *Pātañjalayogadarśana*. Edited by Purnachandra Sharma, Kolkata, Paschimbanga Rajjya Pustak Parshad, 2005
4. Patanjali. *Pātañjalayogadarśanam (Bhojavṛttisametam)*. Edited by Swmami Bijnyanashram, Ajmir, The Fine Art Printing House, 1932
5. Patanjali. *Pātañjalayogadarśanam Tattvavaiśaradīsaṃvalita – Vyāsabhaṣyasametam.* Edited by Ramashankara Bhattacharya, Varanasi, Varatiya Vidya Prakashana, 1963
6. Bijnyanabhikshu. *Yogavārtikam.* Edited by Rmakrishna Shastri and Keshava Shastri, Kashi, Medical Hall, 1

[25] भास्वती . पातञ्जलयोगदर्शनम्, हरिहरानन्द-आरण्यसम्पादितम्, पृ. 440

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

# शब्दशुद्धिप्रतिपादने भामहवामनयोः पारस्पारिकं वैमत्यम् : एकमध्ययनम्[26]

## प्रमुखशब्दाः

काव्यशास्त्रम्, अलङ्कारः, सूत्रम्, वृत्तिः, ज्ञापकविधिः, शिष्टप्रयोगः, योगविभागः, बहुलम्, वार्तिकम्, भाष्यम्, गणसूत्रम्, विकरणम्, अनुबन्धः, सुबन्तम्, प्रातिपदिकम्।

## शोधसारः

संस्कृतकाव्यशास्त्रजगति द्वौ महान्तौ आलङ्कारिकौ तावत् भामह-वामनौ। भामहस्तु काव्यालङ्कारग्रन्थप्रणेता तथा च वामनो हि काव्यालङ्कारसूत्रवृत्तिरित्यस्य स्रष्टा। ग्रन्थद्वयं खलु विशेषादृतमलङ्कारशास्त्रे। ग्रन्थद्वयस्य प्रतिपादनशैली सर्वत्र स्वतन्त्रा एव। परन्तु विषयवस्तुदृष्ट्या बहुत्र समानताऽपि दृश्यते तत्र। शब्दशुद्धिरूपविषय उभयोरेव प्रतिपादितः। दिवसे प्रकाशो यथा भगवता भास्करेण भवति तथैव शब्दशुद्धेः सम्यक् ज्ञानमपि व्याकरणेन सम्भवति। अतएव पाणिनीयव्याकरण-सम्प्रदायमवलम्ब्य भामह-वामनयोरुभयोरेव शब्दशुद्धेरालोचना विधीयते। तथापि कदाचित् किञ्चित् व्याकरणसिद्धान्तमाश्रित्य आचार्यद्वयस्य मध्ये महत् वैमत्यमपि प्रकटितम्। ज्ञापकविधि-शिष्टप्रयोग-योगविभाग-शर्वावित्यादीनां पदसिद्धिविषयेषु एवं वैमत्यं स्पष्टतया परिलक्षितम्। एवं वैमत्यानामुपरि प्रबन्धेऽस्मिन् तुलनात्मिकाऽलोचना प्रदीयते।

## मूलप्रबन्धः

सुसमृद्धसंस्कृतकाव्यशास्त्रपरम्परायां भामह-वामनयोर्नाम सश्रद्धं स्मर्य्यते विपश्चिद्भिः। आचार्यद्वयं खलु नितरां सुप्रतिष्ठितमलङ्कारशास्त्रे। एकस्तु अलङ्कारनिकाये प्रसिद्धः। अपरस्तावत् रीतिप्रस्थाने सुविदितः। अनयोराचार्ययोः पौर्वापर्यविषये नास्ति किञ्चित् वैमत्यम्। वामनस्य पूर्ववर्ती आसीत् भामहः- इत्येवं मतं सर्वसम्मतम्। उभयस्यैव एकैकः ग्रन्थोऽलङ्कारशास्त्रे समुपलभ्यते। भामहस्य काव्यालङ्कारः तथा च वामनाचार्यस्य काव्यालङ्कारसूत्रवृत्तिरिति। भरतादनन्तरं काव्यालङ्कारस्तावदलङ्कारशास्त्रस्य सर्वमान्यः ग्रन्थः। समग्रग्रन्थः षड्सु परिच्छेदेषु विभक्तोऽस्ति। तत्र प्रथमे काव्यशरीरनिर्णयः, द्वितीयेऽलङ्कृतिविवेकः, तृतीये विशिष्टालङ्कृतिविचारः, चतुर्थे दोषनिर्णयः, पञ्चमे न्यायविचारः, अन्तिमे तु शब्दशुद्धिविवेकश्च प्रतिपादिताः। अत्र प्रायशः चतुःशतश्लोकाः परिदृश्यन्ते। तथोक्तं भामहेन-

> "षष्ठ्या शरीरं निर्णीतं शतषष्ठ्या त्वलंकृतिः।
> पञ्चाशता दोषदृष्टिः सप्तत्या न्यायनिर्णयः।।
> षष्ठ्या शब्दस्य शुद्धिः स्यादित्येवं वस्तुपञ्चकम्।
> उक्तं षड्भिः परिच्छेदैर्भामहेन क्रमेण वः।।"[1]

शब्दयुगलस्य काव्यत्वं, काव्यहेतुत्वम्, वक्रोक्तेः सकलालङ्कारमूलत्वम् इत्यादयः विषयाः ग्रन्थस्यास्य विशिष्टसिद्धान्ताः। तथा च वामनाचार्यस्य काव्यालङ्कारसूत्रवृत्तिरिति ग्रन्थोऽपि काव्यशास्त्रजगति विशेषादृतः। ग्रन्थोऽयं पञ्चसु अधिकरणेषु द्वादशभिरध्यायैः सह विभक्तोऽस्ति। तत्र शारीरकं नाम प्रथमेऽधिकरणे काव्यप्रयोजनम्, अधिकारिचिन्ता, रीतिनिश्चयः, काव्याङ्गानि, काव्यभेदादयः चित्रिताः। दोषदर्शनं नाम द्वितीयाधिकरणे काव्यदोषाः

[26] **Dr. Mrityunjay Gorain**, Former Ph.D Research Scholar,Department of Sanskrit, Pali & Prakrit, Visva-Bharati, Santiniketan

Since 2010
ISSN- 0976-8645
UGC RN-41039

समुपवर्णिताः। तृतीये गुणविवेचनाख्येऽधिकरणे विविधाः काव्यगुणाः दर्शिताः। आलङ्कारिकाभिधेये चतुर्थाधिकरणेऽलङ्काराणां विस्तृतं विवेचनं कृतमास्ते। अन्तिमे तु प्रायोगिकं नाम अधिकरणे शब्दशुद्धिरूपविषयो वर्णितोऽस्ति। काव्यात्मतत्त्वसन्धाने तथा रीतितत्त्वस्थापने ग्रन्थस्यास्य महती भूमिकाऽतीव प्रशंसनीया। वस्तुतः काव्यालङ्कारे काव्यालङ्कारसूत्रवृत्तौ च उभयोरेव शब्दशुद्धिः प्रतिपादिता। काव्ये सुचारुशब्दप्रयोगस्तावत् सर्वदाऽभिप्रेतः। सुनिश्चितशब्दचयनैरेव काव्यशरीरस्य विनिर्माणं भवतीति मतं सर्वसम्मतम्। अतएव काव्यनिर्माणाय साधुशब्दज्ञानं तु अपरिहार्यम्। काव्ये कस्तावत् शब्दः प्रयोक्तव्यः को वा परिहरणीय इत्येवं संशयः सदा वर्तते। व्याकरणशास्त्रात्तु संशयोऽयं दूरीभवति। यथोक्तं वामनाचार्येण-

**"शब्दस्मृतेः शब्दशुद्धिः।"**[2]

अर्थात् काव्यनिर्माणे व्याकरणज्ञानं खलु सदापेक्षितम्। अनेन कारणेनैव भामह-वामनयोः रचनायां तु शब्दशुद्धिः प्रतिपादिता। पाणिनीयव्याकरणसम्प्रदायमाश्रित्य उभयस्यैवमालोचनं विकशितम्। उभयस्य ग्रन्थस्य भाषागता प्रतिपादनशैलीगता च भिन्नता सर्वदा परिदृष्टा। इयं भिन्नता तु स्वाभाविकी। तथापि व्याकरणसिद्धान्तविषये क्वचित् कदाचित्तु प्रवलं वैमत्यमपि स्पष्टतया परिलक्षितम्। ज्ञापकविधि-शिष्टप्रयोग-योगविभाग-शर्वावित्यादीनां पदसिद्धिविषयेषु एवं वैमत्यमधिकं प्रकटितम्। तुलनात्मकशैलीमाश्रित्य एवं वैमत्यानामुपरि नातिविस्तृतालोचनाऽत्र विधीयते।

**१. ज्ञापकविधिः**

शाब्दिकनिकाये सन्दिग्धप्रयोगाणां सिद्ध्यर्थं ज्ञापकविधिराश्रीयते। भाषायां प्रयुक्तानां केषांचन शब्दानां व्याकरणशृङ्खलया कदाचित् कुत्रचित् समर्थनं नोपलभ्यते। पुनश्च शिष्टजनस्य रचनायां तु एषां प्रयोगः परिलक्ष्यते। तत्र शिष्टप्रयोगं प्रामाण्यं स्वीकृत्वा सन्दिग्धानां शब्दानां साधुत्वं निश्चीयते। शब्दशास्त्रेऽयं विधिस्तु ज्ञापकविधिरूपेणोच्यते। ज्ञापकविधिविषयेऽस्मिन् आचार्यद्वयस्य मध्येऽपि दृश्यते काचित् विप्रतिपत्तिः। भामहाचार्यमतानुसारं स्वल्पमात्रेण ज्ञापकविधिना विहिताः शब्दाः काव्ये न प्रयोक्तव्याः। दृष्टान्तप्रदानेन विषयोऽयं स्पष्टीक्रियते भामहेन-

**"नाप्रतीतान्यथार्थत्वं धात्वनेकार्थतावशात्।**
**न लेशज्ञापकाकृष्टं स हन्ति ध्याति वा यथा।।"**[3]

ज्ञापकविधिना निष्पन्नं 'ध्याति' इत्येवं पदमत्र विचार्य्यते। '**धै चिन्तायाम्**'[4] इति धै-धातोः लटि तिप्-विभक्तौ "**कर्तरि शप्**"(३/१/३८) इत्यनेन सूत्रेण शप्-विकरणे 'ध्यायति' इत्येवं रूपं सम्पद्यते। अत्र भ्वादिगणपठितत्वात्तु शप्-विकरणं निश्चितम्। परन्तु केषांचन मते, गणकार्यं तावदनित्यम्। विकरणप्रत्ययभेदेन गणव्यवस्था विहिता। परन्तु "**व्यत्ययो बहुलम्**"(३/१/८५) इत्यनेन यथायथं विकरणाः शबादयो विहिताः, तेषां छन्दसि विषये बहुलं व्यत्ययो भवति। अनेन ज्ञापकेन गणकार्यं तावत् न खलु नित्यम् अपि तु अनित्यमिति। एवं प्रकारेण यदि कोऽपि गणकार्यमनित्यमिति मत्वा "**अदिप्रभृतिभ्यः शपः**"(२/४/७२) सूत्रेण धै-धातोः शपो लोपं करोति तर्हि 'ध्याति' इत्येवं पदं भविष्यति। एवं पदं तु अप्रशस्तम्। भाषायां कदापि अस्य प्रयोगो नैव करणीयः। अतएव स्वल्पमात्रेण ज्ञापकेन विहितं पदं सर्वदा परिहरणीयमिति भामहाचार्यस्याशयः।

तथा च श्लोकान्तरेऽपि भामहेनोक्तम्-

**"सूत्रज्ञापकमात्रेण वृत्रहन्ता यथोदितः।**
**अकेन च न कुर्वीत वृत्तिं तद्गमको यथा।।"**[5]

अत्र वृत्रहन्ता तद्गमकश्चेति पदद्वयं दृष्टान्तरूपेण विचार्य्यते

Since 2010
ISSN- 0976-8645
UGC RN-41039

भामहेन। 'वृत्रस्य हन्ता' इत्यस्मिन् विग्रहेऽत्र "**षष्ठी**"(२/२/८) सूत्रेण षष्ठीतत्पुरुषसमासो दृश्यते। विग्रहस्थं 'हन्ता' इति पदं तावत् "**ण्वुलतृचौ**"(३/१/१३३)[6] सूत्रेण तृच्-प्रत्ययेन च निष्पद्यते। "**तृजकाभ्यां कर्तरि**"(२/२/१५) इत्यनेन सूत्रेण कर्तरि या षष्ठी सा तृचा अकेन च सह न समस्यते। अतोऽत्र 'वृत्रहन्ता' इत्येवं पदे षष्ठीसमासः कथं समर्थनीयः? विवक्षायामस्यां केनापि ज्ञापकसूत्रमवलम्ब्यते। "**जनिकर्तुः प्रकृतिः**"(१/४/३०) सूत्रस्यास्य 'जनिकर्तुः'(जनेः कर्ता[कृ+तृच]= जनिकर्ता, तस्य) इत्यस्मिन् पदे भगवता पाणिनिनाऽपि षष्ठीसमासो स्वीक्रियते। अतएव ज्ञापकविधिमाश्रित्य 'वृत्रहन्ता'-पदे षष्ठीसमासस्य शुद्धता केनापि आचार्येण मन्यते। एवं प्रकारेण 'तस्य गमकः(गम्+ण्वुल्)= तद्गमकः' इत्येवं षष्ठीसमासेऽपि अकप्रत्ययान्तशब्दः परिदृश्यते। "**तृजकाभ्यां कर्तरि**"(२/२/१५) इति सूत्रेणाप्यत्र षष्ठीसमासस्य निषिद्धताऽस्ति। समालोचकेन अत्रापि ज्ञापकसूत्रमन्वेष्यते। "**तत्प्रयोजको हेतुश्च**"(१/४/५५) इत्यस्य सूत्रस्य 'तत्प्रयोजकः'(तस्य प्रयोजकः[प्र-युज्+ण्वुल्]= तत्प्रयोजक, सः)- पदेऽपि सूत्रकारेण पाणिनिना षष्ठी समर्थ्यते। अनेन ज्ञापकसूत्रेण 'तद्गमकः' इति पदस्यापि समर्थनं दृश्यते। भामहाचार्यस्य मते, 'वृत्रहन्ता' इत्यादयः प्रयोगास्तावत् न तु समीचीनाः। एवं प्रयोगेषु षष्ठीनिषेधस्य स्पष्टविधानं "**तृजकाभ्यां कर्तरि**"(२/२/१५) इति सूत्रेण विहितम्। निषेधविधानं तावत् बलवत्तरं ज्ञापकविधेः। तस्मात् 'वृत्रहन्ता' इत्यादिषु षष्ठीसमासो नैव करणीयः। वस्तुतस्तु सूत्रलाघवार्थं भगवता पाणिनिना एवं प्रयोगः कृतः। यतश्चोक्तं शब्दशास्त्रे- "**अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।**"

वामनाचार्यस्तु ज्ञापकविषये विपरीतं मतं विदधाति। तस्य मते, ज्ञापकस्यैका स्वतन्त्रा भूमिकाऽस्ति शब्दशास्त्रे। दृष्टान्तस्वरूपं तेनोक्तम्- "**वलेरात्मनेपदमनित्यं, ज्ञापकात्।**" "**वलेरनुदात्तेत्त्वादात्मनेपदं यत्, तदनित्यं दृश्यते- 'लज्जालोलं वलन्ती' इत्यादिप्रयोगेषु। तत् कथमित्याह- ज्ञापकात्।**"[7]

वस्तुतो "**अनुदात्तङित आत्मनेपदम्**"(१/३/१२)[8] इत्यनेन सूत्रेण 'वलि' इति धातोरनुदात्तेत्त्वान्नित्यमात्मनेपदस्य प्राप्तिरस्ति। परन्तु '**लज्जालोलं वलन्ती**' इत्यादिप्रयोगेषु वलि-धातोः परस्मैपदमपि दृष्टम्। अत्र वलि-धातोः परस्मैपदं कथं सिद्धम्? विवक्षायामस्यां वामनेनोक्तम्- ज्ञापकात्। किं पुनस्तज्ज्ञापकमत आह-

"**चक्षिङो द्व्यनुबन्धकरणम्।**"

"**चक्षिङ इकारेणैवानुदात्तेन सिद्धमात्मनेपदं, किमर्थं ङित्करणम्? यत् क्रियते, अनुदात्तनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनार्थम्। एतेन, वेदभर्त्सितर्जिप्रभृतयो व्याख्याताः- आवेदयति, भर्त्सयति, तर्जयतीत्यादीनां प्रयोगाणां दर्शनात्। अन्यत्राप्यनुदात्तनिबन्धन-स्यात्मनेपदस्यानित्यत्वं ज्ञापकेन द्रष्टव्यमिति।**"[9]

'**चक्षिङ् व्यक्तायां वाचि**' इति चक्षिङ्-धातोः[10] 'इ', 'ङ्' चानुबन्धद्वयमस्ति। अत्र केवलम् अनुदात्तेत् 'इ'-इत्यनेनानुबन्धेनैव "**अनुदात्तङित आत्मनेपदम्**"(१/३/१२) सूत्रेणात्मनेपदस्य प्राप्तिरस्ति। तथापि 'ङ्' इत्यनुबन्धस्यापि ग्रहणमत्र दृश्यते। शब्दशास्त्रे तु नास्ति किञ्चनाप्यनर्थकम्। अतश्चात्र ङित्करणस्यापि किञ्चित् प्रयोजनमवश्यमेवास्ति। किं तावत् प्रयोजनम्? इत्यत्र आह वामनः- '**अनुदात्तनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनार्थम्**'। अर्थात् अनुदात्तेत् यदात्मनेपदं तत्तु अनित्यम्। ङित्करणरूपज्ञापकेन विषयोऽयं स्पष्टीकृतः। एवं प्रकारेण वलि-धातोः परस्मैपदमपि समर्थितम्। तस्मात् '**लज्जालोलं वलन्ती**' इत्यादिषु शिष्टप्रयोगेषु वलन्ती(वलि+शतृ+ङीप्)-पदमपि न तु दुष्टम्। ज्ञापकविधिमाश्रित्य एवं प्रयोगानां शुद्धता वामनाचार्येण समर्थिता। अतएव वामनाचार्योऽपि ज्ञापकविरुद्धो नास्तीति।

Since 2010
ISSN- 0976-8645
UGC RN-41039

**२. शिष्टप्रयोगः**

काव्यसृजने कवीनां स्वतन्त्रता खलु सदाऽपेक्षिता। अपारे काव्यसंसारे कविरेव प्रजापतिः। काव्ये भावभागीरथीरूपस्वच्छन्दप्रवाहं रक्षितुं कदापि कुत्रापि व्याकरणशृङ्खलामुपेक्षन्ते कवयः। शाब्दिकदृष्ट्येयमुपेक्षता तावत् प्रामादिकत्वरूपेण परिगण्यते। परन्तु श्रद्धावन्तः सहृदया एनामुपेक्षतां सदाऽद्रियन्ते। संस्कृतवाङ्मये एवमुपेक्षणीयप्रयोगस्तावत् सामान्यदृष्ट्या शिष्टप्रयोगः कविप्रयोगो वा कथ्यते। शिष्टप्रयोगस्यास्य यौक्तिकताप्रसङ्गे भामहवामनयोः पारस्पारिकं मतानैक्यमुपलक्षितम्। आचार्यभामहस्य मते, शिष्टप्रयोगं दृष्ट्वाऽशुद्धप्रयोगो नैव करणीयः। तथोक्तं काव्यालङ्कारे भामहेन-

**"न शिष्टैरुक्तमित्येव न तन्त्रान्तरसाधितम्।**
**छन्दोवदिति चोत्सर्गान्न चापि च्छान्दसं वदेत्।।"**[11]

शब्दशुद्धिविषये व्याकरणशास्त्रमेव प्रमाणम्, न तु शिष्टप्रयोगः। अतएव काव्ये पूर्ववर्तिना कविना प्रयुक्तः शिष्टप्रयोगः सदा परिहरणीयः। भामहाचार्यदृष्ट्या विषयोऽयं तावत् युक्तः। साधुकाव्यनिर्माणे कवीनामत्र विशेषसतर्कता प्रतिपादिता। नवीनकविगणं प्रति अयमुपदेशस्तु अतीव प्रशंसनीयः।

अपरं तु शिष्टप्रयोग-प्रसङ्गे वामनाचार्यस्य मतं खलु सदाऽकर्षणीयम्। काव्यालङ्कारसूत्रवृत्तौ कदाचित् विषयेऽस्मिन् कविगणं प्रति वामनेन उदारदृष्टिः प्रकटिता। यस्योत्कृष्टनिदर्शनं वयमत्र पश्यामः-"**मिलिक्लबिक्षपिप्रभृतीनां धातुत्वं, धातुगणस्याऽप्राप्तेः।**""**मिलति, विक्लबति, क्षपयतीत्यादयः प्रयोगाः। तत्र मिलिक्लबिक्षपिप्रभृतीनां कथं धातुत्वम्? गणपाठाद् गणपठितानामेव धातुसंज्ञाविधानात्। तत्राह- धातुगणस्याऽप्राप्तेः। 'वर्धते धातुगण' इति हि शब्दविद आचक्षते। तेनैषां गणपाठोऽनुमतः, शिष्टप्रयोगादिति।**"[12]

मिलति, विक्लबति, क्षपयतीत्यादयः प्रयोगाः संस्कृतसाहित्यजगति बहुत्र परिदृश्यन्ते। किं बहुना, प्रथितयशसः कवयोऽपि एषां सुतरां प्रयोगं कुर्वते। शब्दशास्त्रे धातुसंज्ञाविधानस्य विशेषो नियमः परिदृश्यते। "**भूवादयो धातवः**"(१/३/१) इत्यनेन सूत्रेण गणपाठे पठितानां क्रियावाचिनानामेव धातुसंज्ञा विधीयते। यथोक्तं न्यासटीकायाम्-"**भू इत्येवमादयः शब्दा धातुसंज्ञका भवन्तीत्यनेन गणपाठेनैवेयं धातुसंज्ञा विधीयते इति दर्शयति।**"[13]

परन्तु मिलि-क्लबि-क्षपि-प्रभृतीनां पाठो गणपाठे नैवोपलभ्यते। तर्हि एषां कथं धातुत्वम्। एवं शङ्कानिरसने वामनाचार्यस्य उदारदृष्टिः परिलक्षिता। तस्य मते, धातुगणस्य समाप्तिर्नास्ति। तथा हि '**वर्धते धातुगणः**' इति शब्दविद आचक्षते। वस्तुतोऽयं नियमो यत्र तत्र न दृश्यते। शिष्टप्रयोगस्य समर्थनाय एवं नियमः। 'शिष्टप्रयोगात्' इत्यनेन वामनवचनेन धातुनामतिव्याप्तिः निवारिताऽस्तीति वक्तुं शक्यते शिष्टप्रयोगस्यापरप्रसङ्गोऽपि काव्यालङ्कारसूत्रवृत्तौ स्पष्टतया परिलक्षितः। तत्र शिष्टप्रयोगस्तावत् प्रमाणत्वेन गृह्यते। एवमवधारणा वयं काव्यालङ्कारसूत्रवृत्तौ पश्यामः:-

"**मार्गेरात्मनेपदमलक्ष्म।**"

"**चुरादौ 'मार्ग अन्वेषणे' इति पठ्यते। 'आ धृषाद्वा' इति विकल्पितणिच्कस्तस्माद्यदात्मनेपदं दृश्यते- 'मार्गन्तां देहभारमि'ति, तदलक्ष्म अलक्षणम्, परस्मैपदित्वान्मार्गेः। तथा च शिष्टप्रयोगः- 'करकिसलयं धूत्वा धूत्वा विमार्गति वाससी'।**"[14]

अत्र 'मार्ग अन्वेषणे' इत्यर्थकः मार्गधातुः[15] चुरादौ पठ्यते। धातुरयं तु उभयपदी। "आ धृषाद्वा"(गणसू.२०२) इति गणसूत्रेणात्र णिच्प्रत्ययो विकल्पे विहितः। शिष्टप्रयोगात् हेतोः धातोरस्य सामान्यतया परस्मैपदमेव दृश्यते। अतएवास्य मार्गयति मार्गति वा रूपद्वयं तु स्पष्टतया परिलक्ष्यते। सिद्धान्तकौमुदीकारस्य

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

भट्टोजिदीक्षितस्यापि एवमभिमतम्-**"मार्ग अन्वेषणे' इत्याघृषीयस्य तु मार्गयति मार्गति इति च गतम्।"**[16]

शिष्टप्रयोगदर्शनात् मार्गधातोर्भाषायां केवलं परस्मैपदे प्रयोक्तव्यः। परन्तु **'मार्गन्तां देहभारम्'** इत्येवं आत्मनेपदरूपमपि क्वचित् दृश्यते। वामनाचार्यस्य मते, प्रयोगोऽयं अलक्ष्म दूषितो वा। तथा हि- **'करकिसलयं धूत्वा धूत्वा विमार्गति वाससी'** इत्येवं शिष्टप्रयोगात्। अतः मार्गधातोरस्य परस्मैपदं तावत् भाषायां प्रयोक्तव्यम्। वामनाचार्यस्येवं व्याख्यायां शिष्टप्रयोगस्तावत् प्रमाणत्वेनाङ्गीकृतः।

**३. योगविभागः**

इष्टप्रयोगस्य सिद्धये येषां विधिनां ग्रहणं शब्दशास्त्रे सदा वर्तते तेषां अन्यतमस्तावत् योगविभागः। सन्दिग्धशब्दानां सिद्ध्यर्थं किंचित् सूत्रं पृथक् पृथक् विभज्य तस्मिन् पृथक् पृथक् विशिष्टस्यार्थस्य योगरेव योगविभागः। योगविभागेन किञ्चित् सूत्रं द्विधाविभक्तं भवति। निदर्शनस्वरूपं **"सह सुपा"**(२/१/४) सूत्रं तावत् विचार्य्यते। सूत्रेऽस्मिन् **"सुबामन्त्रिते पराङ्गवत्स्वरे"**(२/१/२) इत्यतः 'सुप्' अनुवर्तते। तेन सुबन्तं सुबन्तेन सह समस्यते इति सूत्रार्थः। अतएव 'पूर्वं भूतः' इत्यस्मिन् विग्रहे 'पूर्वम्' इति सुबन्तं पदं 'भूतः' इत्यनेन समर्थसुबन्तपदेन सह समस्यते। **"भूतपूर्वे चरट्"**(५/३/५३) इति ज्ञापकात् भूतशब्दस्य पूर्वनिपातः। फलतः 'भूतपूर्वः' इति समासयुक्तं पदं भवति।

कुत्रचित् 'पर्यभूषयत्' इत्यादिकः प्राचीनप्रयोगः प्राप्यते। 'परि अभूषयत्' इत्यस्मिन् विग्रहे परि इति पदं सुबन्तमव्ययम् अपरं तु 'अभूषयत्' इति तिङन्तं पदम्। अतएव **"सह सुपा"**(२/१/४) इत्यनेन सामान्यतया समासो न युज्यते। अत्र समाससिद्ध्यर्थं **"सह सुपा"**(२/१/४) इति सूत्रे योगविभागः क्रियते। एवं प्रकारेण सम्पूर्णं सूत्रं तावत् द्विधाविभक्तम्-

क) **"सह"** अर्थात् सुबन्तं केनापि समर्थेन सह समस्यते। अतः 'परि' सुबन्तं पदं 'अभूषयत्' इति समर्थतिङन्तपदेन सह समस्यते। फलतः 'पर्यभूषयत्' इत्येवं समासे नास्ति कश्चन संशयः।

ख) **"सह सुपा"** अर्थात् सुबन्तं सुबन्तेन सह समस्यते। मूलसूत्रस्यानुरूपोऽर्थः वर्तते चात्र।

एवं प्रकारेण योगविभागस्य एकमनवद्यं माहात्म्यं वर्तते शब्दशास्त्रे। परन्तु योगविभागस्यास्य प्रयोगविषये भामह-वामनयोर्मध्येऽस्ति महत् वैमत्यम्। भामहाचार्यमतानुसारं तु योगविभागः सदा परिहरणीयः। तथोक्तं भामहीये काव्यालङ्कारे-

> **"सिद्धो यश्चोपसंख्यानादिष्ट्या यश्चोपपादितः।**
> **तमाद्रियेत प्रायेण न तु योगविभागजम्।।"**[17]

अर्थात् सूत्रेण, वार्तिकेन भाष्येन चैव सिद्धशब्दस्तावत् काव्ये प्रयोक्तव्यः न तु योगविभागादिति भामहस्याभिमतम्। वस्तुतस्तु व्याकरणसिद्धान्तेन येषां प्रयोगानां समर्थनं नैवोपलभ्यते तत्रैव योगविभागोऽवलम्ब्यते। सूत्रं विभज्य केनापि प्रकारेण सन्दिग्धप्रयोगानामत्र समर्थनं क्रियते। अनेन कारणेनैव भामहाचार्येण खलु योगविभागः परिहीयते।

परन्तु योगविभागविषये सम्पूर्णं विरुद्धमतं दर्शितं वामनाचार्येण। तस्य मते, योगविभागः कदापि तु न परिहरणीयोऽपितु वरणीयः। आचार्यस्येत्येवमभिप्रायं दृश्यते तावदस्मिन् सूत्रे- **"नैकशब्दः सुप्सुपेति समासात्।"**

**" 'अरण्यानीस्थानं फलनमितनैकद्रुममिदम्।' इत्यादिषु नैकशब्दो दृश्यते, स च न सिद्ध्यति। नञ्समासे हि 'नलोपो नञः' इति नलोपे, 'तस्मान्नुडचि' इति नुडागमे सत्यनेकमिति रूपं स्यात्। निरनुबन्धस्य नशब्दस्य समासे लक्षणं नास्ति। तत् कथं नैकशब्द**

Since 2010
ISSN- 0976-8645
UGC RN-41039

**इत्याह- सुप्सुपेति समासात्।''**[18]

प्रत्यक्षरूपेणात्र योगविभागस्योल्लेखो न दृश्यते। परन्तु 'नैक'-शब्दस्य सुप्सुपासमाससमर्थनेन योगविभागोऽपि समर्थितः। योगविभागमन्तरेण नैक'-शब्दस्य सुप्सुपासमासोऽसम्भव एव। इत्येवमभिमतं गोपेन्द्रत्रिपुरहरकृतकामधेनुटीकायां स्पष्टतया परिदृष्टम्-''**नञ्समासे हीति। 'नलोपो नञ्' इति नकारलोपे सति, 'तस्मान्नुडचि' इति नुडागमे च कृते, अनेकमिति रूपं स्यान्न तु नैकमिति। ननु न सिद्ध्यति चेन्माऽस्तु नञ्समासः, प्रकारान्तरेण किं न स्यादित्यत आह- निरनुबन्धस्येति। सुप्सुपेति। 'सुबामन्त्रिते पराङ्गवत्स्वरे' इत्यतः सुबित्यनुवृत्तौ, 'सह सुपा' इति योगविभागात् सुबन्तं पदं सुबन्तेन सह समस्यत इति समासे नैकशब्दः सिद्धो भवतीत्यर्थः।**''

वस्तुतः 'न एकधा' इत्यस्मिन् विग्रहे ''**नञ्**''(२/२/६) सूत्रेण नञोऽव्ययस्य 'एकधा' इति सुबन्तपदेन सह तत्पुरुषसमासस्य प्रसङ्गोऽस्ति। नञ्समासत्वात् ''**नलोपो नञ्**''(६/३/७३) सूत्रेण नञो नस्य लोपः स्यादुत्तरपदे। समासेऽस्मिन् अजन्तमुत्तरपदमस्ति। तस्मात् ''**तस्मान्नुडचि**''(६/३/७४) इति सूत्रेण नुडागमे कृते अनेकमिति रूपं स्यान्न तु नैकमिति। तर्हि कथं 'नैकम्' इति रूपं सिद्धम्? सुप्सुपासमासत्वाद्। सुप्सुपासमासेनास्य समासस्य सिद्धिर्भवति। योगविभागेन ''**सह सुपा**''(२/१/४) सूत्रं विभज्य 'एकधा' इति सुबन्तेन सह न-अव्ययस्य सुप्सुपासमासो भवति। अनेन समासेनैव 'नैकम्' इति पदं सिद्धम्। सिद्धान्तकौमुदीकारेण भट्टोजिदीक्षितेनापि एवं व्याख्या समर्थिता-

'' **'नैकधा' इत्यादौ तु नशब्देन 'सहसुपा' इति समासः।**''[19]

एवंप्रकारेण योगविभागोऽपि समर्थितो वामनेन। वस्तुतः शाब्दिकनये योगविभागो गर्हितविधिर्नास्ति। सन्दिग्धपदसमर्थने बहुत्र बहुशः प्रथितयशसः वैयाकरणा अपि योगविभागम् आश्रितवन्तः। ''**सह सुपा**''(२/१/४) सूत्रस्य भाष्ये भगवता पतञ्जलिनाऽपि योगविभाग उल्लिखितः-

''**एवं तर्हि सिद्धे सति यत्सहग्रहणं करोति तस्यैतत्प्रयोजनं योगाङ्गं यथा विज्ञायेत। सति च योगाङ्गे योगविभागः करिष्यते। सह सुप्समस्यते। केन सह? समर्थेन। अनुव्यचलत् अनुप्राविशत्।**''[20]

अतएव योगविभागः न निन्दनीयोऽपितु वरणीयः।

४. 'शर्वौ' इत्यस्य पदव्याख्यायाम्

'शर्वौ' इत्यादीनां पदानां एकशेषविषये आचार्यद्वयस्य मध्येऽस्ति महती विप्रतिपत्तिः। काव्यालङ्कारकारस्य भामहस्य मतेऽत्र एकशेषस्य प्रयोगः सदालंकृतः। ''**पुमान् स्त्रिया**''(१/२/६७) इत्यनेन सूत्रेणात्र एकशेषो विधीयते। तथोक्तं तेन काव्यालङ्कारे-

**''सरूपशेषं तु पुमान् स्त्रिया यत्र न शिष्यते।**
**यथाह वरुणाविन्द्रौ भवौ शर्वौ मृडाविति।।''**[21]

अर्थात् भामहाचार्यस्य मतेऽत्र 'शर्वश्च शर्वाणी च'- इत्यस्मिनर्थे स्त्रीप्रत्ययान्तस्य स्त्रीवाचकस्य 'शर्वाणी' पदेन सह पुंवाचकस्य 'शर्व'-पदस्य ''**पुमान् स्त्रिया**''(१/२/६७)[22] इत्यनेन सूत्रेणैकशेषो विधीयते। ''**सरूपाणामेकशेष एकविभक्तौ**''(१/२/६४) अनेन सूत्रेणात्र एकपदमेव शिष्यते। एवंप्रकारेण 'वरुणौ', 'इन्द्रौ', 'भवौ', 'मृडौ' चेत्यादीनि पदान्यपि प्रयुक्तानि।

वामनाचार्यस्य मते एवं प्रयोगस्तु न युक्तः। शर्वावित्यत्र प्रयोगे एकशेषोऽन्वेषणीयः। यथोक्तं तेन काव्यालङ्कारसूत्रवृत्तौ-

''**रुद्रावित्येकशेषोऽन्वेष्यः।**''

''**रुद्रावित्यत्र प्रयोगे एकशेषोऽन्वेष्योऽन्वेषणीयः। रुद्रश्च रुद्राणी चेति 'पुमान् स्त्रिया' इत्येकशेषः। स च न प्राप्नोति। तत्र हि 'तल्लक्षणश्चेदेव विशेष' इत्यनुवर्तते इति तत्रैवकारकरणात् स्त्रीपुंसकृत एव विशेषो भवतीति व्यवस्थितम्। अत्र तु 'पुंयोगादाख्यायाम्' इति**

Since 2010
ISSN- 0976-8645
UGC RN-41039

**विशेषान्तरमप्यस्तीति। एतेनेन्द्रौ भवौ शर्वावित्यादयः प्रयोगाः प्रयुक्ताः।"**[23]

अर्थात् वामनाचार्यमतानुसारं तु शर्वावित्यादीनां प्रयोगे एकशेषस्तावत् न युक्तः। **"पुमान् स्त्रिया"**(१/२/६७) इत्यनेन सूत्रेणैकशेषोऽत्र न प्रयुज्यते। तत्र हि **"वृद्धो यूना तल्लक्षणश्चेदेव विशेषः"**(१/२/६५) इति सूत्रात् 'तल्लक्षणश्चेदेव विशेषः' इत्यनुवर्तते। तदिति स्त्रीपुंसयोर्निर्देशः। लक्षणशब्दो निमित्तपर्यायः। चेच्छब्दो यद्यर्थे। एवकारोऽवधारणे। विशेषो वैरूप्यम्। अर्थात् स्त्रीपुंसलक्षण एव चेद्विशेषो भवति, स्त्रीपुंसकृतमेव यदि वैरूप्यं भवतीत्यर्थः। अतएव स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् तर्हि **"पुमान् स्त्रिया"**(१/२/६७) इत्यनेन सूत्रेणैकशेषः प्रयुज्यते। एव-कारेण एवं विशेषः स्पष्टतया दर्शितः। परन्तु 'शर्वश्च शर्वाणी च'- इत्यत्र स्त्रीप्रत्ययस्य विशेषं विना विशेषान्तरमपि परिदृश्यते। किमिदं विशेषान्तरम्? कामधेनुटीकायामुच्यतेऽत्र-

**"रुद्राणीत्यत्र 'पुंयोगादाख्यायाम्'(४/१/६८) इत्यनुवर्तमाने, 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्य-यवयवनमातुलाचार्याणामानुक्'(४/१/४९) इत्यादिना ङीष् विधीयते। पुंस आख्याभूतं यत्प्रातिपदिकं पुंयोगात् स्त्रियां वर्तते, तस्मात् ङीष् प्रत्ययो भवतीति। अतस्तल्लक्षणविशेष-व्यतिरेकेण विशेषान्तरस्यापि विद्यमानत्वान्नात्रैकशेषप्राप्तिरिति।"**

अर्थात् शर्वाणी इत्यत्रापि पुंयोगरूपविशेषं सदा वर्तते। यथोच्यते **"इन्द्रवरुण-"**(४/१/४९) इत्यस्य काशिकायाम्-

**"इन्द्रादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीष् प्रत्ययो भवति, आनुक्चागमः। येषामत्र पुंयोग एवेष्यते तेषामानुगागममात्रं विधीयते, प्रत्ययस्तु पूर्वेणैव सिद्धः। अन्येषां तूभयं विधीयते। इन्द्राणी। वरुणानी। भवानी। शर्वाणी। मृडानी।"**

अनेन विशेषान्तरेणैव **"पुमान् स्त्रिया"**(१/२/६७) इत्यनेनात्र एकशेषो न विधीयते। अतएव 'शर्वौ', 'वरुणौ', 'इन्द्रौ', 'भवौ', 'मृडौ' चेत्यादीनि एकशेषपदानि तावदनुचिन्त्यानि। वस्तुतोऽत्र एकशेषस्य प्रयोगो नैव करणीयः। काशिकाकारस्यापि एवमाशयः।

**उपसंहृतिः-** भामह-वामनयो उभयोः ग्रन्थयोरेव शब्दशुद्धिस्तावत् व्याकरणदृष्ट्या सम्यकतया प्रतिपादिता। सामान्यतस्तु उभयालोचनस्य प्रकृतिः भिन्ना एव। काव्ये प्रयोज्याप्रयोज्य-शब्दानामेवालोचनं केवलं काव्यालङ्कारे विवेचितम्। काव्यालङ्कारसूत्रवृत्तौ तु काव्यप्रयुक्तानां शब्दानां साधुत्वासाधुत्वं व्याकरणदृष्ट्या प्रतिपादितम्। वस्तुतः पाणिनीय-व्याकरण-सम्प्रदायमनुसृत्य उभयस्य विचारधारा प्रचलिता। तथापि केनचित् व्याकरणसिद्धान्तेनैव आचार्यद्वयस्य मध्ये महत् वैमत्यं प्रकटितम्। स्वकीयदृक्कोणत उभयस्यैवं वैमत्यमेव युक्तिसङ्गतम्। तथापि व्याकरणशास्त्रस्य निरपेक्ष-विचारधायां तु वामनाचार्यस्य मतमधिकयुक्तिपूर्णं प्रतिभाति। किं बहुना, ज्ञापकविधि-शिष्टप्रयोग-योगविभागादयो विषयाः यत्र सुकठोरेण सह भामहेन तिरस्कृताः, ते विषयाः वामनेनादृताः। व्याकरणं प्रति वामनस्यैवमुदारदृष्टिस्तु सदा प्रशंसनीया। अतएव व्याकरणदृष्ट्या वामनमतं खल्वतीव युक्तिपूर्णमिति वक्तुं शक्यते।

**अन्त्यटीप्पण्यः**

1 काव्यालङ्कारः६/६५-६६।
2 काव्यालङ्कारसूत्रवृत्तिः१/३/४।
3 काव्यालङ्कारः६/२६।
4 धातुपाठः९८०, भ्वादयः, परस्मैपदी, अकर्मकः।
5 काव्यालङ्कारः६/३७।
6 "धातोरिति वर्तते। सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः। कारकः। कर्ता। हारकः। हर्ता।"(काशिकावृत्तिः)
7 काव्यालङ्कारसूत्रवृत्तिः५/२/३।
8 "अनुदात्तेत उपदेशे यो ङित्तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात्।" (सि.कौ./तिङन्तप्रकरणम्)
9 काव्यालङ्कारसूत्रवृत्तिः५/२/४।

Since 2010
ISSN- 0976-8645
UGC RN-41039

10 अदादयः, धा.पा.१०८१, आत्मनेपदी।
11 काव्यालङ्कारः६/२७।
12 काव्यालङ्कारसूत्रवृत्तिः५/२/२।
13 "भूवादयो धातवः"(१/३/१) सूत्रस्य काशिकायाः व्याख्या।
14 काव्यालङ्कारसूत्रवृत्तिः५/२/७।
15 धातुपाठः१९१७, चुरादौ, सेट्।
16 सिद्धान्तकौमुदी/चुरादिप्रकरणम्, मोतिलालबनारसीदाससंस्करणे पृ.४१४ द्रष्टव्या।
17 काव्यालङ्कारः६/२९।
18 काव्यालङ्कारसूत्रवृत्तिः५/२/१२।
19 "तस्मान्नुडचि"६/३/७४ सूत्रस्य भट्टोजिदीक्षितोक्ता वृत्तिः।
20 "सह सुपा"(२/१/४) सूत्रस्य पतञ्जलिकृतं भाष्यम्।
21 काव्यालङ्कारः६/३२।
22 "स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत्।"(सि.कौ./समासप्रकरणम्)
23 काव्यालङ्कारसूत्रवृत्तिः५/२/१।

## सन्दर्भग्रन्थसूची

१. झा, नरेश सम्पादकः। *धातुपाठः।* वाराणसी : चौखम्वा सुरभारती प्रकाशन, २०१७।
२. त्रिपाठी, जयशङ्करलाल सुधाकरमालवीय च सम्पादकौ। *काशिका* (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)। वाराणसी : तारा प्रिण्टिङ्ग वकर्स, प्रथमभागः १९८६, द्वितीयभागः १९८६, चतुर्थभागः१९८४।
३. मिश्र, रमाशंकर, सम्पादकः। *अष्टाध्यायीसूत्रपाठः।* दिल्ली : मोतीलाल बनारसीदास, २००५।
४. वर्णी, वेदव्रत सम्पादकः। *व्याकरण-महाभाष्यम्* (प्रदीप-उद्द्योत-विमर्शैः समलङ्कृतम्)। रोहतक, हरयाणा : हरयाणा साहित्य संस्थान, द्वितीय भाग, १९६३।
५. विश्वेश्वर सम्पादकः। *काव्यालङ्कारसूत्रवृत्तिः।* दिल्ली : आत्माराम एण्ड संस, १९५४।
६. शर्मा, गिरीधर, परमेश्वरानन्दशर्मा च सम्पादकौ। *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्त्वबोधिनी-समेता)। दिल्ली : मोतीलाल बनारसीदासः, प्रथमभागः १९७७, द्वितीयभागः १९८२, तृतीयभागः १९७७, चतुर्थभागः १९७९।
७. शर्मा, रामानन्द सम्पादकः। *काव्यालङ्कारः।* वाराणसी : चौखम्वा संस्कृत सीरीज आफिस, २०१३।
८. शास्त्री, हरगोविन्द सम्पादकः। *काव्यालङ्कारसूत्राणि* (कामधेनु सहिता)। वाराणसी : चौखम्वा सुरभारती ग्रन्थमाला, २०१८।

# वेद वर्णित हृदयरोग चिकित्सा के विविध आयाम[27]

**प्रमुखशब्द**

वेद,प्राकृतिक,औषध,चिकित्सा,हृदय ।

**शोधसार**

वैदिक काल के व्यक्ति सौ वर्ष पर्यन्त निरन्तर वृद्धि करते हुए जीवित रहने की कामना करते हैं ,यह केवल तभी संभव हो सकता है जब मनुष्य पूर्णरुप से स्वास्थय हो ।महाकवि कालिदास ने सत्य कहा है- 'शरीरमाद्यं खलु धर्मसाधनम्' अर्थात् हमारा शरीर धर्म(कर्म) का साधन है।शरीर स्वस्थ है तो हम अपने सामाजिक, नैतिक, धार्मिक, पारिवारिक दायित्वों को पूर्ण कर सकते हैं।वेद में हृदय रोग की चिकित्सा के सम्बन्ध में विस्तृत विवरण प्राप्त होता है,जो वर्तमान में बढते हुए हृदय रोगों को देखते हुए उपयोगी एवं अनुसंधेय है,जिसकी सहायता से प्राकृतिक एवम् सरल तरीकों से हृदय रोगों से बचा जा सकता है और रोग होने पर उनका उपचार भी किया जा सकता है। इससे यह भी ज्ञात होता है कि वर्ष पूर्व ही भारतीय मनीषा हृदय एवं हृदय रोगों से परिचित थी। शरीर के विभिन्न तंत्रों में हृदय परिसंचरण का एक महत्वपूर्ण अंग हैं। हृदय के कार्य की किसी भी तरह की विक्रियात्मक स्थिति, हृदय में जलनकम्प, शूल अथवा पीडा को हृदय रोग माना जाता है। प्रस्तुत शोधपत्र का उद्देश्य वेद वर्णित हृदय विकारों एवम् उनके समाधान हेतु विभिन्न चिकित्सा पद्धतियों, औषधियों एवं रोगनिवारक मणियों को प्रकट करना है।

[27] महेशः, शोधार्थी, संस्कृत एवं प्राच्यविद्या-अध्ययनसंस्था, जवाहरलाल-नेहरु-विश्वविद्यालयः

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

## मूलप्रबन्ध

प्रथम लिखित ग्रंथ वेद मानव जाति के पुस्तकालय का होने के साथ अपने आप में अनुपम धरोहर को संभाले हुए है और ये धरोहर है अगाध ज्ञान। जो भौतिक और आध्यात्मिक है शायद इसीलिए मनु ने मनुस्मृति में इसे सभी प्रकार के ज्ञान का स्रोत कहा है।[28]वैदिक काल के व्यक्ति सौ वर्ष[29] पर्यन्त निरन्तर वृद्धि करते हुए जीवित रहने की कामना करते हैं[30],यह केवल तभी संभव हो सकता है जब मनुष्य पूर्णरुप से स्वास्थय हो ।महाकवि कालिदास ने सत्य कहा है- 'शरीरमाद्यं खलु धर्मसाधनम्' अर्थात् हमारा शरीर धर्म(कर्म) का साधन है।शरीर स्वस्थ है तो हम अपने सामाजिक, नैतिक, धार्मिक, पारिवारिक दायित्वों को पूर्ण कर सकते हैं। आचार्य सुश्रुतानुसार

समदोषः समाग्निश्च समधातु मलक्रियाः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थः इत्यभिधीयते ॥[31]

जिस व्यक्ति के दोष (वात, कफ और पित्त) समान हों, अग्नि सम हो, सात धातुएँ भी सम हों, तथा मल भी सम हो, शरीर की सभी क्रियाएँ समान क्रिया करें, इसके अतिरिक्त मन, सभी इंद्रियाँ तथा आत्मा प्रसन्न हो, वह मनुष्य स्वस्थ कहलाता है )। हजारों वर्ष पूर्व ही भारतीय मनीषा हृदय एवं हृदय रोगों से परिचित थी। शरीर के विभिन्न तंत्रों में हृदय परिसंचरण का एक महत्वपूर्ण अंग हैं। हृदय के कार्य की किसी भी तरह की विक्रियात्मक स्थिति, हृदय में जलनकम्प, शूल अथवा पीडा को हृदय रोग माना जाता है। चरक संहिता के अनुसार - अधिक व्यायाम, तीक्ष्ण पदार्थों का सेवन,अधिक विरेचन, अधिक बस्ति प्रयोग, चिन्ता, भय,त्रास,पूर्वोत्पन्न रोग का उचित उपचार न होना, अधिक वमन, आमदोष वेगों को रोकना, शरीर को कृश बनाने वाले आहार-विहार का सेवन और किसी प्रकार की चोट लगना- यह सब हृदय रोग को उत्पन्न करने वाले कारण है।[32] सुश्रुतानुसार मल-मूत्र आदि वेगों को रोकने से, उष्ण और रूखे अन्न के अतिमात्र उपयोग करने से, अध्याशन, अजीर्ण और विपरीत आहार द्वारा विकृत हुए दोष हृदय में जाकर रस (रक्त) को दूषित करके हृदय में बाधा विकार उत्पन्न कर देते हैं, इसी को हृदय रोग कहते हैं।[33] सर्वप्रथम ऋग्वेद संहिता में हृदय रोग और उसकी चिकित्सा का उल्लेख (150.11)प्राप्त होता है।- हृद्रोगं मम सूर्य हरिमाणं च नाशय।[34]अथर्ववेद के अन्तर्गत हृदय रोगों को हृद्योत,हरिमा[35], हरिमाण[36],हृद्योतन[37] एवं हृदयामय[38] आदि नामों से कहा गया है। सामवेद संहिता में रक्तावरोध रोग (थम्बॉसिस) के बारे में बताया गया है।[39] आचार्य चरक ने हृदय रोग के इन पांच भेदों को स्वीकार किया है।[40]अथर्ववेद में कफज हृदय रोग के लिये बलास शब्द आया है।[41]आचार्य चरक ने हृदय रोग के सामान्य लक्षण

---

28 'सर्व वेदात् प्रसिद्धयति' मनुस्मृति 2.7

29 बुध्येम शरद: शतम् ।अथर्ववेद 19.67.3

30 पूषेम शरद: शतम् । अथर्ववेद 19.67.1

31 सुश्रुत संहिता/सूत्र स्थान 15.42

32 चरक संहिता /चिकित्सास्थान 26.77

33 सुश्रुत संहिता/ उत्तरतंत्र 43.3-4

34 ऋग्वेद संहिता 1.50.11

35 अनु सूर्यमुदयतां हृद्द्योतो हरिमा च ते ।अथर्ववेद संहिता 1.22.1

36 शुकेषु ते हरिमाणं रोपणाकासु दध्मसि । अथर्ववेद संहिता 1.22.4

37 इन्द्रेण गुप्तो विदथा निचिक्यद्धृद्द्योतनो द्विषतां याहि शीभम् । अथर्ववेद संहिता 5.20.12

38 अङ्गभेदो अङ्गज्वरो यश्च ते हृदयामय:। अथर्ववेद संहिता 5.30.9. अस्थिस्रंसं परुस्रंसमास्थितं हृदयामयम् । अथर्ववेद संहिता 6.14.1.

39 कदा वसो स्तोत्रं हर्यत आ अव श्मशा रुधदा: । दीर्घ सुतं वाताप्याय ।। सामवेद संहिता, 228

40 चरक संहिता चिकित्सास्थान, 26.79-103

41 अथर्ववेद संहिता, 4.9.8

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

निम्न बताए हैं :-

शरीर का वर्ण विकृत हो जाना, बेहोशी होना, ज्वर, खांसी, हिचकी,दम फूलना, मुख का स्वाद विरस होना, प्यास लगना, गम्भीर बेहोशी होना, वमन होना बार, -बार कफ थूकना, वक्ष स्थल आदि में पीडा होना, भोजन में अरुचि होना तथा अन्य अनेक प्रकार के लक्षण हृदय रोग के कारण उत्पन्न होते हैं।[42]वेद में हृदय रोग हेतु प्राकृतिक एवं औषध चिकित्सा का वर्णन किया गया है।

1. हृदय रोग के उपचार हेतु प्राकृतिक चिकित्सा :-

(१) **सूर्य किरण चिकित्सा** - वेदों में सर्य किरणों को प्रायः सभी रोगों की अमोघ चिकित्सा माना गया है।[43] उदित होते हुए सूर्य की किरणें हृदय के रोगों को दूर करती है- उद्यन्नद्य मित्रमह ।आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय।।[44] अथर्ववेद में हृदय, हाथ-पैर, मस्तक आदि के रोगों को उदयमान सूर्य रश्मियों द्वारा दूर करने की बात कही गयी है।[45]"

(२) **चन्द्र किरण चिकित्सा** - चन्द्रमा की आरोग्य क्षमता को वैदिक ऋषियों ने पहचाना था और औषधियों का राजा माना- याः औषधयः सोमराज्ञी।[46]चन्द्र किरण चिकित्सा में जलदूध एवं प्रलेप आदि चन्द्रमा की चांदनी में रात्रिभर रखा जाता है और तदनन्तर उसका उपयोग किया जाता है। चन्द्रमा की किरणों के प्रभाव से वह जल या लेप आदि शरीर के ज्ञान-तन्तुओं को शीतलता प्रदान करता है और शरीर के दोषों को दूर करके हृदय रोग आदि का शमन करता है।[47]" अथर्ववेद में चन्द्र किरण चिकित्सा का उल्लेख इस प्रकार मिलता है - सूर्यः कृणोतु भेषजं चन्द्रमा वोऽपोच्छतु।[48] अथर्ववेद में अन्यत्र सूर्य और चन्द्र किरणों को क्षेत्रिय रोग (आनुवंशिक हृदय रोग) को दूर करने वाला कहा गया है।[49]

(३) **जल चिकित्सा** :-जल नामक औषध सब प्रकार के रोगों को निवारण करने वाला है -

आप इद् वा उ भेषजीरापो अमीवचातनीः।
आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ।।[50]

अन्यत्र भी कहा गया है कि जल सभी रोगों की औषधि है।

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा।
अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः।।[51]

जल में निहित औषधियाँ समस्त रोगों को दूर करने की क्षमता रखती हैं अतः जल में अमृत का वास माना गया है - अप्स्वन्तरमृतमप्सु भेषजम्[52] "जल सर्वोत्तम औषधि है, जो सारे रोगों को बाहर निकाल देती है। हिमालय से निकलकर समुद्र में मिलने वाली नदियों के जल में दिव्य गुण हैं, उसके प्रयोग से हृदय रोग, नेत्र रोग एवं पैरों की पीडा दूर होती है।[53]

(४) **वायु चिकित्सा** वायु समस्त रोगों को दूर करने वाला और प्राकृतिक शक्तियों का दूत है। यह व्याधियों को शान्त करने वाली

---

42 'चरकसंहिता चिकित्सास्थान26.78

43 अथर्ववेद 9.8.1-22
अथर्ववेद संहिता, 98192122

44 ऋग्वेद संहिता – 1.50.11,य अन्यत्र दृष्टव्य, अनु सूर्यमुदमतां हृद्द्यतो हरिमा च ते।गो रोहितस्य वर्णन तेन त्वा परि दध्मसि।। अथर्ववेद, 122.1

45 अथर्ववेद 9.8.21-22

46 वाजसनेयी संहिता 12.92

47 वेदों में आयुर्वेद - डा. कपिल देव द्विवेदी, पृष्ठ, 91

48 अथर्ववेद संहिता, 6.83.1

49 अमू ये दिवि सुमो विबृतौ नाम तारके।
विक्षेत्रियस्य मुञ्चतामधमं पाशमुत्तमम्। वही, 3.74

50 ऋग्वेद संहिता, 10.1376,अथर्ववेद संहिता, 3.7.5

51 वही, 123.20

52 वही, 1.23.19अथर्ववेद संहिता, 1.4.4

53 अथर्ववेद संहिता, 6.24.1–2

Since 2010
ISSN- 0976-8645
UGC RN-41039

औषधियों को लाता है और जो रोग कीटाणु हैं उन्हें विविध प्रकार से निकालता है।

आ वात वाहि भेषजं विवात वाहि यद्रपः।
त्वं हि विश्वभेषजो देवानां दूत ईयसे।।[54]

वायु के भीतर अमृत की निधि है।[55] ऐसा वायु भेषज रूप और हृदय के लिये शांतिदायक व सुखकारक होता है।

वात आ वातु भेषजं शम्भु मयोभु नो हृदे । प्रण आयूषि तारिषत् ।।[56]

रक्तावरोधक रोग का उपचार प्राणायाम द्वारा संभव है।[57]ऋग्वेद के ऋषि राहुगण का मानना है कि जिस घर में वायु की निर्बाध उपस्थिति रहती है, वह सबसे अधिक सुरक्षित मनुष्य है अर्थात् रोग और मृत्यु उसका अहित नहीं सकते।[58]

**(५) अग्नि एवं हवन चिकित्सा**

अग्नि भी प्राकतिक पदार्थों में भेषज रूप है।आयुर्वेद में तेरह प्रकार की शरीरस्थ अग्नियों का वर्णन किया गया है।शरीर का महत्त्वपूर्ण अङ्ग होने के कारण अग्नि शरीर को बल प्रदान करने में भी सहायक है। अग्नि से रोगी का रुग्ण शरीर या अंग एवं निवास स्थान को गर्म करना अग्नि चिकित्सा है।अग्नि भेषज है। - अग्निष्कृणोतु भेषजम्।[59] यह विश्व का अमृत औषधि है -विश्वस्य दूतममृतम्।[60] अग्नि में घृत एवं अन्य हवनीय औषधियों की आहुति डाली जाती है, तब उससे उठी हुई औषधगन्ध वायु के माध्यम से रवास द्वारा हमारे फेफडों में पहुँचती है तथा बार-बार श्वास प्रश्वास करने रक्तशोधन होता है और औषध शरीर में प्रवेश करके शरीर को रोगमुक्त करती है।अथर्ववेद में उल्लेख है कि धृत की आहुति समस्त शारीरिक रोगों को दूर करने में सक्षम है।[61]वैदिक ऋषि मानते हैं कि यज्ञ में सहस्रों शक्तियाँ हैं, सैकड़ों वीर्य है. वह दीर्घायुष्य और शतायुष्य को प्रदान करने वाला है।

सहस्राक्षेण शतवीर्येण शतायुषा हविषा हार्षमेनस्।[62]

आरोग्य के लिए नवीन अथवा पुराने रोगों के निवारण के लिए वैदिक ऋषि नैषज्य यज्ञ ऋतु संधियों में करते थे।[63]

**2. हृदय रोग के उपचार हेतु औषध चिकित्सा**

औषध द्वारा उपचार करने को औषध चिकित्सा कहते हैं, औषधियाँ अनेक प्रकार की होती हैं - फल देने वाली, फल नहीं देने वाली, बिना पुष्प वाली और पुष्पों वाली इसके अतिरिक्त औषधी का कौन सा भाग औषधरुप में ग्रहण किया जा सकता है यथा जड़,तना,पुष्प,फल,बीज,पत्तियाँ,बादाँ इत्यादि। इन सब औषधियों में रोग निवारक शक्ति होती है।[64] वेद में विभिन्न रोगों के निवारणार्थ विभिन्न ओषधियों के प्रयोग का उल्लेख मिलता है। वेद में निम्न प्रमुख औषधियाँ हृदय रोग को दूर करने में उपयोगी बतायी गयी है: -

1. अर्जुन - अर्जुन वृक्ष हृदय के लिए हितकारी होता है- ककुभः शीतलो हृद्यः।[65]वृक्ष के काण्ड क्षेत्रिय रोगनाशक अथर्ववेद में अर्जुन को माना गया है- बभ्रोरर्जुनकाण्डस्य ......

---

54 ऋग्वेद संहिता, 10.137.3
55 वही, 10.186.3
56 वही, 10.186
57 सामवेद संहिता, 228
58 ऋग्वेद संहिता, 1.86.1
59 अथर्ववेद संहिता, 6.31.06
60 वाजसनेयी संहिता, 15.33
61 अथर्ववेद संहिता, 6.3.21
62 वही, 3.11.3
63 . गोपथ ब्राह्मण, 3.511
64 याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्वत्वंहसः ।। वाजसनेयी संहिता, 12.89
65 भावप्रकाश निघण्टु. वटादिवर्ग, 27

Since 2010
ISSN- 0976-8645
UGC RN-41039

क्षेत्रियमुच्छतु।[66] भैषज्य रत्नावली में हृदय रोग की शान्ति हेतु अर्जुन वृक्ष के अनेक उपयोग बताए गए हैं।[67]

2. हारिद्रव - ऋग्वेद में हृदय रोग एवं हरिमा (पीलिया) रोग की चिकित्सा हरिद्रवेषु[68] पद द्वारा संकेतिक की गयी है।

3.आञ्जन- आञ्जन खनिज भी होता है और एक वृक्ष भी है। इसे त्रिककुद पर्वत पर उत्पन्न होने के कारण त्रैककुद और यमुना में उत्पन्न होने से यामुन कहा जाता है।[69] यह कफज हृदय रोग (बलास) में हितकारी है।इसके लिए कहा गया है- त्रयो दासा आंजनस्य तक्मा बलास आदहिः।[70]

4.मृगभंग - मृगभंग हृदय रोग का नाशक है।[71] अथर्ववेद में मृग के भृग द्वारा हृदय रोग की चिकित्सा के उल्लेख प्राप्त होते हैं।

हरिणस्य रघुष्यदोऽधि शीर्षणि भेषजम् । स क्षेत्रियं विषाणया विधूचीनमनीनशत् ।।
अनु त्वा हरिणो वृषा पद्धिश्चतुर्भिरक्रमीत् । विषाणे विष्य गुष्पितं यदस्य क्षेत्रियं हृदि ।।[72]

3 **हृदय रोगनिवारक मणियाँ** - समस्त हृदय रोग को हटाने के लिये अथर्ववेद में आञ्जन मणि[73], जंगिड मणि[74], वरण मणि[75] का सेवन उपयोगी बताया गया है। आधुनिक समाज में उभरे हृदय रोग का एक प्रमुख कारण की कमी है।इस समस्या के समाधान हेतु अथर्ववेद ने अरण्य से युक्त भूमि को सुखदायक माना[76] तथा भूमि के ऊंचे-नीचे तथा समतल सभी क्षेत्रों को औषधियों से युक्त होने चाहिए।[77]अथर्ववेद का मत है कि पर्वतों एवं मैदानों में विद्यमान दूध वाली व कल्याण वाली औषधियाँ हृदय के लिए शान्ति दायक होती हैं।[78]

वेद में हृदय रोग की चिकित्सा के सम्बन्ध में विस्तृत विवरण प्राप्त होता है। जो वर्तमान में बढ़ते हुए हृदय रोगों को देखते हुए उपयोगी एवं अनुसंधेय है,जिसकी सहायता से प्राकृतिक एवम् सरल तरीकों से हृदय रोगों से बचा जा सकता है और रोग होने पर उनका उपचार भी किया जा सकता है क्योंकि आयुर्वेद का विस्तार जिन तत्वों पर हुआ उनका मूल संहिताओं एवं ब्राह्मण ग्रंथों में उपलब्ध होता है जैसे अथर्ववेद में आरोग्य, वनस्पति, दीर्घायु प्राप्ति सूक्तों इत्यादि अनेक सूक्तों में प्राकृतिक संसाधनों को किस प्रकार प्रकृति ने जीव के साथ ही अनेकानेक औषधियाँ, वनस्पतियाँ तथा अनेक प्रकार के औषधीय वृक्ष उत्पन्न किए जिनके औषधीय गुणों को हमारे ऋषियों ने पहचान कर मंत्रों के माध्यम से लोक प्रसारित किया । तत्पश्चात उनके शिष्यों तथा वेद संबंधित आचार्यों ने आयुर्वेदादि उपवेदों की रचना की जिनमें आयुर्विज्ञान का विस्तार हुआ और आयुर्वेद पद्धति अपने विराट स्वरूप में प्रकट हुआ ।

---

66 अथर्ववेद संहिता, 2.8.3
67 भैषज्य रत्नावली, हृद्रोगाधिकार 32-34
68 ऋग्वेद संहिता, 1.52.0
69 अथर्ववेद संहिता, 4.9.10
70 वही, 4.98
71 भैषज्य रत्नावली, शूलरोगाधिकार 54
72 अथर्ववेद संहिता, 3.7.1-2
73 वही, 4.98
74 वही. 19.34.10
75 वही 10.3.3
48 अथर्ववेद संहिता, 12.1.11
77 वही, 12.1.2
78 वही, 8.7.17

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

## सन्दर्भग्रन्थसूची


- अथर्ववेद संहिता:(भाग1,2),भाष्यकार पंडित श्रीराम शर्मा आचार्य सम्पादक :ब्रह्मवर्चस् शान्तिकुञ्ज,हरिद्वार :2016.
- ऋग्वेद संहिता: (भाग 1,2,3,4)श्रीमत्सायणाचार्यविरचित-माधवीयवेदार्थप्रकाश सहिता,सम्पादक: श्रीमन्मोक्षमूलरभट्टः,चौखम्बा संस्कृत सीरीज आफ़िस,वाराणसी:1966.
- ऋग्वेद संहिता:(भाग1,2,3,4),भाष्यकार पंडित श्रीराम शर्मा आचार्य सम्पादक :ब्रह्मवर्चस् शान्तिकुञ्ज,हरिद्वार :2016.
- चरकसंहिता : शुक्ल, आचार्य विद्याधर, त्रिपाठी, प्रो०रविदत (व्याख्याकार), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली: 2015.
- भाव प्रकाश, भाग 1, मिश्र (व्याख्याकार) श्री ब्रह्मशंकर, चौखम्बा संस्कृत भवन, वाराणसी.
- भैषज्य रत्नावली,शास्त्री अम्बिका दत्त,चौखम्बा वाराणसी :2015.
- मनुस्मृति,जायसवाल सुरेश(सम्पादक ),साधना पब्लिकेशन्स,दिल्ली:2017.
- यजुर्वेद संहिता,भाष्यकार पंडित श्रीराम शर्मा आचार्य सम्पादक :ब्रह्मवर्चस् शान्तिकुञ्ज,हरिद्वार :2016.
- सामवेद संहिता,भाष्यकार पंडित श्रीराम शर्मा आचार्य सम्पादक :ब्रह्मवर्चस् शान्तिकुञ्ज,हरिद्वार :2015.
- सुश्रुत संहिता (प्रथम भाग), शास्त्री ;व्याख्याकारद्ध अम्बिकादत्त, मेहता (प्रस्तावक), प्राणजीवन मणिकचन्द, चौखम्बा संस्कृत संस्थान, पुनर्मुद्रण, वाराणसी 2007.


# व्याप्तौ तार्किकरक्षाभाषापरिच्छेदग्रन्थयोः मतसमीक्षणम्[79]

**प्रमुखशब्दाः**

व्याप्तिः, तार्किकरक्षा, भाषापरिच्छेदः, नव्यन्यायाश्रितग्रन्थः

**शोधसारः**

व्याप्तिः न्यायशास्त्रे अतिमहत्त्वपूर्णविषयरूपेण समाद्रियते न्यायप्रवरैः। तस्याः व्याप्तेः स्वरूपं यथा प्राचीनन्याये विवेचितमस्ति, नास्ति तथा नव्यन्याये। अतः अस्मिन् शोधनिबन्धे नव्यप्राचीनयोः न्यायतन्त्रयोः मतसमीक्षणं यथामति उपस्थाप्यते। अस्मदनुश्रिता वरदराजप्रणीता 'तार्किकरक्षा' प्राचीनन्यायाश्रितग्रन्थः, तथा च विश्वनाथविरचितः 'भाषापरिच्छेदः' नव्यन्यायाश्रितग्रन्थः। अपि चात्र व्याप्तिविषयोपपादने अस्मदनुश्रितयोः ग्रन्थयोः मतवैशाद्दश्यं कथंङ्कारं संगच्छते, तदपि विचार्यते यथायुक्ति। परन्तु भाषापरिच्छेदग्रन्थानुसारं सिद्धान्तमुक्तावलीटीकाग्रन्थानुसारं वा व्याप्तिविषयकस्य प्रत्येकविषयस्य विवेचनं नास्माकं लक्ष्यम्; अस्मदनुश्रितयोः ग्रन्थयोः यावत् व्याप्तिविषयकं मतसाद्दश्यं, वैशाद्दश्यं वा समुपलभ्यते तद्विचार्यते अत्र। अयमेव विषयः। अत्र तुलनात्मकगवेषणापद्धतिः, विश्लेषणात्मकगवेषणापद्धतिश्च अनुश्रियेते।

## मूलप्रबन्धः

शब्दशास्त्रानुसारं वि-आप्-धातुना क्तिन्प्रत्यतयोगे स्वादिकार्ये च व्याप्तिः पदं निष्पद्यते। सा च व्याप्तिः ज्ञानरूपा सम्बन्धरूपा वा न्यायवैशेषिकतन्त्रप्रसिद्धा। परन्तु अत्र 'व्याप्तौ' नाम व्याप्तिविषये।

---

79 प्रणवेशकुमारः

Since 2010
ISSN- 0976-8645
UGC RN-41039

ननु व्याप्तेः शास्त्रसिद्धार्थानध्याहारे का युक्तिः? तत्र प्रथमपक्षे तादृशव्याप्तेः समीक्षणासम्भवात् नः लेखनेनापरज्ञानोपपत्तये शोधनिर्माणरूपप्रयत्नोयं न सिध्यति। यतः निखिलज्ञानसमवायिकारणे आत्मनि व्याप्तिज्ञानस्यापि वृत्तित्वात् तस्य समीक्षणमसम्भवः। आत्मवृत्तिव्याप्तिज्ञानस्य समीक्षणमत्र न सम्भव इत्यभिप्रायः। न तु द्वितीयपक्षः, साध्यसाधनयोः तादृशस्य सम्बन्धस्य लेखनेन विश्लेषणमसिद्धत्वात्। यथा यत्र धूमस्तत्र वह्निः - इत्यत्र वह्निधूमयोः सहचारसम्बन्धस्य समीक्षणं लेखनेन न सम्भवः। बुद्धिगोचरात् तादृशसम्बन्धस्य। न तु व्याप्तिज्ञानरहितस्य तादृशसम्बन्धज्ञानं कदापि जायत इति। विशेष्यतानवच्छेदकज्ञानस्यासिद्धत्वात् व्याप्तिज्ञाने विशेष्यत्वेन व्याप्तिः, तत्प्रकारत्वेन च तदवच्छेदकं व्याप्तित्वं सदैव वर्तते। न तावत् व्याप्तित्वप्रकारतानवच्छिन्नं ज्ञानं व्याप्तिज्ञानमिति कथ्यते। सा व्याप्तिः साध्यसाधनयोः सहचारसम्बन्धः, तादृशसम्बन्धविशिष्टज्ञानं व्याप्तिज्ञानमिति। एतयोः ज्ञानसम्बन्धयोः व्याप्तिरिति नाम्ना विषयरूपेणास्मिन् निबन्धे प्रतिपाद्यते। वस्तुतः शास्त्रेषु सर्वेषु व्याप्तिविषय एव लिखितमस्ति। तेन समीक्षणपदार्थेन व्याप्तिपदार्थस्यान्वये व्याप्तिविषयकं समीक्षणमत्र संगच्छते। तदेव व्याप्तिसमीक्षणमिति मध्यपदलोपिकर्मधारयः। तार्किकरक्षाग्रन्थश्च भाषापरिच्छेदग्रन्थश्चेति तार्किकरक्षा-भाषापरिच्छेदग्रन्थावेति इतरेतरद्वन्द्वसमासः। तयोः (षष्ठी) तार्किकरक्षाभाषापरिच्छेदग्रन्थयोः। मतानां समीक्षणमिति षष्ठीतत्पुरुषः। ननु कीदृशं तावत् मतसमीक्षणम्? उच्यते द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते – इति न्यायानुसारमुक्ते द्वन्द्वसमासनिष्पन्नपदान्ते मतसमीक्षणपदस्य प्रयुक्तत्वात् तस्यैवाभिसम्बन्धप्रसङ्गः। तेन तार्किकरक्षाग्रन्थे सिद्धान्तमुक्तावलीग्रन्थे च युगपत् व्याप्तिविषयकमतानां समीक्षणमस्मिन् संक्षिप्तनिबन्धे उपस्थाप्यते यथामति। अयमेव निबन्धस्य विषयः।

उक्तविषयप्रतिपादनात् निबन्धेनानेन समं प्रतिपाद्यविषयस्य प्रतिपाद्यप्रतिपादकभावसम्बन्धः। अपि च निबन्धस्याध्ययनेन न्यायवैशेषिकतन्त्रस्य विशेषज्ञानं जायते। तादृशज्ञानानुसन्धिनां समीपे निबन्धोऽयं साधनं, जायमानं ज्ञानञ्च साध्यमित्यत्र साध्यसाधनसम्बन्धोऽपि संगच्छते। सम्यक् ईक्षणं विश्लेषणं विचारः वा समीक्षणम्। तच्च प्रस्तुतग्रन्थप्रतिपादितव्याप्तिविषयकमत-निरूपितम्। अतिदुर्बोधस्य व्याप्तिविषयस्य सुलभविश्लेषणं, तथा विभिन्नानां संशयानां निराकरणं निबन्धस्यास्य प्रयोजनमिति।

- प्रमाणे मतसमीक्षणम्

प्रमाणाधीनसिद्धत्वात् तदितरपदार्थेष्वादौ प्रमाणपदार्थोपादानं महर्षिगौतमेनोपन्यस्तं न्यायसूत्रग्रन्थे। तदनुसृत्य न्यायसूत्रानुसारिणाचार्यवरदराजेन तार्किकरक्षायां प्रमाणपदार्थनिरूपणार्थमुक्तम् - 'तत्र प्रमाणं प्रमया व्याप्तं प्रमितिसाधनम्। प्रमाश्रयो वा तद्व्याप्तो यथार्थोनुभवः प्रमा'[80] - इति। 'तत्र' नाम तेषु प्रमाणादिनिग्रहस्थानान्तेषु पदार्थेषु इति। प्रमया अयोगव्यवच्छेदसम्बन्धावच्छिन्नत्वं प्रमाव्याप्तत्वम्। तद्वत्प्रमाणम्। तच्च प्रमाणं प्रमितिसाधनं प्रमाश्रयरूपञ्च। नन्वत्र प्रमाणस्य द्वैविध्ये का युक्तिः? करणासम्भवात् नित्यप्रमाश्रयः परमात्मा वा प्रमाणम्। ध्वंसाभावाप्रतियोगित्वं नित्यत्वमिति। परमात्मवृत्तिज्ञानानां नित्यत्वात् कारणाजन्यत्वाच्च न तत्र करणप्रसङ्गः। अपि च तादृशज्ञानानां ध्वंसाभावप्रतियोगित्वेन परमात्मनः नित्यत्वहानिप्रसङ्गः, तच्छास्त्रविरुद्ध इति यावत्। नित्यप्रमाश्रत्वेन नित्यप्रमासमवायिकारणं परमात्मा सिध्यतीति। अनित्यप्रमायास्तु करणमेव प्रमाणम्, जन्यत्वात्। तस्मात्

[80] ता. र. पृ0सं0 6.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

करणत्वेनाश्रयत्वेन च प्रमाणस्य प्रामाण्यतात्र प्रतिपादिता वरदराजेन। अत्र साधनाश्रयोरन्यतरत्वे सति प्रमाव्याप्तत्वं प्रमाणत्वमिति परिष्कृतं स्वरूपम्। साधनाश्रयोरन्यतरत्वं तावत् तदुभयव्यतिरिक्त-त्वमनधिकरणत्वम्। सति - इत्यत्र सामानाधिकरण्यार्थे सप्तमी। प्रमाणज्ञानस्य प्रमाज्ञानसापेक्ष्यत्वात् प्रमालक्षणं प्रतिपाद्यते ग्रन्थकारेण यथार्थेत्यादिना। यथार्थपदाध्याहारात् अयथार्थत्वाच्च तर्कसंशयादीनां व्युदासः। तत्र तर्के तावत् व्यापकपदार्थाभावाधिकरणे व्याप्यलिङ्गारोपप्रयुक्तस्य व्यापकपदार्थस्यारोपात् तदयथार्थः। संशयस्य हि विरुद्धानियतकोटिनानाधर्मावच्छिन्नत्वात् पुनः अयथार्थप्रसङ्गः। यथार्थपदोपादानात् विपर्ययस्यापि निरासः बाधयोग्यविषयस्य निश्चयात्मकज्ञानादिति। वस्तुतः प्रकृतप्रकारतावच्छिन्नविशेष्यपदार्थविषयकज्ञानं यथार्थानुभवः। रज्जौ सर्पः - इत्यत्र सर्पत्वावच्छिन्नेन रज्जुविषयकज्ञानं भ्रमः। रज्जुत्वरूपप्रकृतप्रकारतानवच्छिन्नत्वात्। लक्षणे प्रकृतपदाध्याहाराभावात् भ्रमे तस्यातिव्याप्तिः स्यादिति। अवच्छिन्नत्वं समवायेन विशेष्यपदार्थवृत्तित्वम्। न च सर्पत्वस्य कदापि समवायेन रज्जुवृत्तित्वं सिध्येत्। अपि च अनुभवपदाध्याहाराभावात् लक्षणस्य स्मृतावतिव्याप्तिप्रसङ्गः, तादृशस्य यथार्थज्ञानस्य भावनाख्यसंस्कारजन्यत्वात्। तस्मात् स्मृतिभिन्नं ज्ञानमनुभव इति।

भाषापरिच्छेदग्रन्थे कारिकावल्यां प्रमाणस्य सामान्यलक्षणं विश्वनाथपञ्चाननभट्टाचार्य्येण न प्रतिपादितम्। परन्तु प्रमानां विशेषाध्यनेन पृथक् पृथक् प्रमाणज्ञानं जायत इति। यथा जन्यज्ञानं प्रति अतिशयितमसाधारणं कारणं साधनं वा करणम्। तदेव प्रमाणमिति। न्यायसारग्रन्थे भाष्यकारेण वासुदेवसूरिणा निगदितम् -'सम्यक् चासावनुभवश्चेति सम्यगनुभवः, तस्य साधनं करणं प्रमाणम्'- इति। ननु अनेन जन्यज्ञानस्य सर्वेषां साधनानां करणत्वापत्तिः, तेषां साधनत्वधर्मावच्छिन्नत्वात्। यथा पर्वतो वह्निमान्– इत्यनुमितौ परामर्शादीनां साधनत्वं प्रसिद्धम्। न तत्रैकस्याभावात् अनुमितिर्जायत इति पूर्वपक्षः। एतन्न। साक्षात्साधनत्वप्रसङ्गादत्र। तदेव ग्रन्थकारविवक्षितः। तच्च साक्षात्साधनत्वमव्यवहितपूर्वत्वसम्बन्धेन कार्याधिकरणीभूतक्षणनिष्ठात्यन्ताभाव-प्रतियोगितानवच्छेदकान्यथासिद्धिनिरूपकधर्मवत्त्वम्। अनेन परामर्शमात्रस्य साधनत्वं प्रतिपन्नं भवति। अनुमित्यात्मकज्ञानाव्यवहितपूर्वक्षणा-वच्छिन्नत्वादिति, एतदेव तस्यातिशयितत्वम्। अतः अनुमितेः परामर्श एव करणं प्रमाणं वा। वस्तुतः एतादृशस्य संशयस्य विश्लेषणं न न्यायसारे प्रतिपादितमस्ति। सिद्धमिदानीं प्रमाकरणमेव प्रमाणमिति। भाषापरिच्छेदग्रन्थानुसारं करणत्वं तावत् व्यापारवत्त्वे सति कारणत्वम्। यथा अनुमितेः व्याप्तिज्ञानं करणम्। अत्र व्याप्तिज्ञानजन्यत्वे सति परम्परया तज्जन्यानुमितेः साक्षात् जनकत्वात् परामर्शः व्यापारः। तेन व्याप्तिज्ञानं प्रमाणम्। सिद्धान्तमुक्तावल्यामुक्तम् -'यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात्'[81] – इति। इदानीमनुभवपदविश्लेषणम्। तार्किकरक्षाटीकाकारेण ज्ञानपूर्णेन लघुदीपिकायामुक्तम् 'प्रत्युत्पन्नासाधारणकारणप्रसूतप्रत्ययत्वं वा तदविदूरप्राक्कालोत्पत्तिनियतासाधारण-कारणप्रसूतप्रत्ययत्वं वा'[82] - इति। असाधारणकारणजन्यं प्रत्यग्रप्रतीतिः चेदनुभवः, तेन स्मृतावतिव्याप्तिप्रसङ्गः संस्कारमात्रजन्यत्वात् तस्यैवासाधारणकारणापत्तेः। तस्मात्तदविदूरादिद्वितीयं

[81] कारि. पृ0सं0 481.
[82] ता. र. पृ0सं0 10.

Since 2010
ISSN- 0976-8645
UGC RN-41039

लक्षणमुपदिष्टम्। विदूरमतिदूरस्थं, तद्विपरीतम् अविदूरमिति यावत्। अविदूरपूर्वक्षणावच्छिन्नः नियतव्याप्त्यवच्छिन्नः असाधारणकारणजन्यपदार्थस्तावदनुभवः, तदेव प्रमेति। प्रत्ययत्वं ज्ञानत्वं, तत्पदोपादानात् विपर्ययादीनां व्युदासः। सर्वदा वर्त्तमानकालीनमात्रस्य पदार्थस्यानुभवः जायते। स्मृतिस्तु सदातीतकालीन-पदार्थविषयका। अतः कालवैलक्षण्यादनुभवः स्मृतिभिन्नः। भाषापरिच्छेदे प्रत्यक्षादीनां गूणनिरूपणार्थं विश्वनाथेन भ्रमभिन्नज्ञानस्य प्रमात्वं प्रतिपादितम्। परन्तु अनेन रज्जुसर्पयोः सर्पोऽयम् – इति भ्रमज्ञाने जाते रज्जोः यथा यथार्थानुभवः न भवेत्, तद्वत् सर्पस्यापि। यतः रज्जुसर्पयोरेकं सम्मिलितज्ञानं जायते, तन्न भ्रमभिन्नम्। तेन च सर्पांशे तज्ज्ञानस्य प्रमात्वानुपपत्तिप्रसङ्गः। तस्मात् ग्रन्थकारेण सिद्धान्तमुक्तावल्यां द्वितीयं प्रमालक्षणं निरूपितम् - 'तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः'[83] - इति। तद्वद्विशेष्यकत्वावच्छिन्नं तत्प्रकारकत्वज्ज्ञानं प्रमेति। तत्पदेन विवक्षितपदार्थव्याप्यजातिः बोध्यव्या। यथा पटोऽयम् - इत्यत्र समवायसम्बन्धावच्छिन्नपटत्वप्रकारतावच्छेदकावच्छिन्नेन पटविशेष्यकं ज्ञानं यथार्थानुभवः प्रमा वा। अनेन स्मृतेरपि प्रमापत्तेः प्रमालक्षणे सम्बन्धस्य निवेशः। अतः येन सम्बन्धेन यद्वत्ता तेनैव सम्बन्धेन तद्विशेषकत्वं तत्प्रकारकत्वञ्च बोध्यव्यमित्यभिप्रेतः। यथा पटस्य समवायेन तन्तुवृत्तित्वात् पटवत् तन्तुः। तेन समवायेन पटप्रकारविशिष्टं तन्तुविशेष्यकज्ञानं यथार्थानुभवः।

- व्याप्तिप्रतिपादने सङ्गतिविचारः अनुमाननिरूपणञ्च

प्रस्तावितग्रन्थयोः व्याप्तिविषयकविश्लेषणं कथङ्कारं समारभ्यते तद्विश्लेषणमेवात्र प्रतिपाद्यमस्ति। तत्र तार्किकरक्षायां वरदराजेन अनुमानलक्षणनिरुपणे एव व्याप्तिपदमध्याहृतम्। 'व्याप्तिग्रहणसापेक्षं प्रमितेः साधनं विदुः। अनुमानमिति...'[84] - इत्यादि। व्याप्तिज्ञानसापेक्षत्वे सति प्रमितिसाधनत्वम् अनुमानत्वमित्यर्थः। अत्र व्याप्तिपदाध्याहारात् का व्याप्तिः? – इति जिज्ञासानिराकरणार्थं तथा च स्मृतिविषयस्य व्याप्तेः स्पष्टीकरणार्थमुद्दिष्टलणक्षनिरूपणान्तरमेव व्याप्तिलक्षणमुपन्यस्तं ग्रन्थकारेण। 'व्याप्तिः सम्बन्धो निरूपाधिकः'[85] – इति। अतः स्मृतस्य विषयस्य व्याप्तेः विवेचनादत्र प्रसङ्गसङ्गतिः। तत्सरूपं यथा उपोद्घातादिभिन्नस्मरणप्रयोजकसम्बन्धः प्रसङ्गः - इति। व्याप्तिग्रहणसापेक्षेण प्रत्यक्षादीनां, प्रमितिना प्रमाभासादीनाञ्च व्युदासः। तच्च साधनं सिद्धिजनकम्। सिद्धिः अनुमितिः। जनकत्वञ्चात्र जनकज्ञानविषयत्वमित्यभिप्रेतः। तथा चेरतकारणेषु यदतिशयितं तत्साधनं भवेत्। तस्मात् परामर्श एवानुमानमिति। यतः व्याप्तिज्ञानमात्रेण साक्षादनुमितिर्न जायते व्याप्तिविशिष्टपक्षधर्मताज्ञानाभावात्। व्याप्तिग्रहणसापेक्षं व्याप्तिस्मरणज्ञानजन्यं ज्ञानं परामर्शः, तज्जन्यं ज्ञानं तावदनुमितिः इत्याशयः। अतः लक्षणस्थितेन प्रथमविशेषणेन व्याप्तिग्रहणसापेक्षेण परामर्श एव सूचितः सन् तस्यैवानुमितिसाधनत्वं ग्रन्थकारेणोपस्थापितमस्ति। वस्तुतः अत्र फलायोगव्यवच्छिन्नत्वं कारणत्वं करणत्वम् - इति प्राचीनन्यायानुसारमनुमितेः करणस्वरूपं निरूपितम्।

भाषापरिच्छेदे अनुमानखण्डे प्रथमकारिकायामुक्तं ग्रन्थकारेण - 'व्यापारस्तु परामर्शः, करणं व्याप्तिधीर्भवेत्। अनुमायां ...'[86] - इत्यादि। परन्तु अनेन व्याप्तिपदस्य प्रयोगस्थलं नावगम्यते। तन्न

---

[83] कारि. पृ0सं0 481.

[84] ता. र. पृ0सं0 64.

[85] ता. र. पृ0सं0 65.

[86] कारि. पृ0सं0 284.

Since 2010
ISSN- 0976-8645
UGC RN-41039

प्रतिबोधात् संगतिः विचार्यत इति। अतः ग्रन्थकारेण प्रथमकारिकानुसारमादौ परामर्शलक्षणमुपन्यस्तम्। तन्मते 'व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते'[87] – इति। व्याप्यस्य व्याप्तिविशिष्टस्येति तेन मुक्तावल्यां स्पष्टीकृतम्। तस्मात् व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। अनन्तरं पूर्वश्रुतविषस्या व्याप्तेः यथार्थतया विश्लेषणार्थं पुनः तद्विषयोपन्यासः विश्वनाथेन कृतः। तेन चिन्तितं व्याप्तिपदश्रवणात् तद्विषयिणी चिन्ता भवितुमर्हति शिष्याणां, तस्मात् उद्दिष्टविषयः स्पष्टीकरणीय इति। 'व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः'[88] – इति। अतः शिष्याणां स्मृतिजन्यविषयस्य व्याप्तेः विवेचनादत्र प्रसङ्गसङ्गतिः। भाषापरिच्छेदे अनुमानलक्षणं साक्षान्न लिखितं विश्वनाथेन। परन्तु 'अनुमायां अनुमितौ व्याप्तिज्ञानं करणं, परामर्शो व्यापार:'[89] - इति वचनादवगम्यते सिद्धान्तमुक्तावलीकारविश्वनाथमते अनुमितिकरणत्वात् व्याप्तिज्ञानमेव अनुमानप्रमाणम्। नव्यन्यायानुगामिना ग्रन्थकारेण व्यापारवत् कारणं करणम् - इति न्यायेनानुमितिकरणं निरूपितम्। तज्जन्तत्वे सति तज्जन्यजनकत्वं व्यापारत्वं, तद्वत्वात् परामर्शज्ञानावच्छिन्नत्वाद्वा व्याप्तिज्ञानमनुमितिकरणमिति। व्याप्तिज्ञानजन्यत्वे सति (परम्परया) व्याप्तिज्ञानजन्यानुमितिजनकत्वात् परामर्शस्तु व्यापार:। यथा पर्वत: वह्निमान्, धूमात् - इत्यनुमाने वह्निधूमयो: व्याप्तिज्ञानजन्यसंस्कारे जाते धूमो वह्निव्याप्य इति व्याप्तिस्मरणेन वह्निव्याप्यधूमवानयं पर्वत: इत्यकारकं व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श: जायते। तज्जन्यानुमिति पर्वतो वह्निमान् - इति। अत्र संशयः यथा, परामर्शविश्लेषणे ग्रन्थकारेण स्वार्थानुमितिमात्रस्य क्रमं प्रतिपादितम्। ननु परार्थानुमानेऽपि परामर्शस्योपयोगिता विद्यते। परन्तु तन्न प्रतिपादिता ग्रन्थकारेण। तस्मादसिद्धा तावत् परार्थानुमिति: इति चेत्, न। सत्प्रतिपक्षादिहेत्वाभासाङ्गीकारात्। वादिप्रतिवादिनो: कथास्वेव हेत्वाभासप्रसक्तिः। न तु वादिप्रतिवादिनो: स्वार्थानुमितिप्रसङ्गः, परार्थानुमितिः हि तदित्याशय:। तस्मात् परार्थानुमितिरपि ग्रन्थकारसम्मतेति सिध्यति।

- व्याप्तौ मतसमीक्षणम्

वरदराजमते 'व्याप्ति: सम्बन्धो निरूपाधिक:' - इति। हेतावुपाधिविशिष्टत्वात् व्याप्त्यसिद्धत्वाच्च व्याप्यत्वासिद्धहेत्वाभास: जायत इति। तस्मात् वरदराजेन निरूपाधिकपदोपदानेन हेत्वाभासानां निराश: कृत:। सा च व्याप्ति: व्याप्यव्यापकयो: उपाधिरहितः सम्बन्धविशेष इत्यभिप्रेत:। ननु तादृशसम्बन्धस्य द्विष्ठवृत्तित्वात् अनुमितिं प्रति कारणत्वं कथङ्कारं सिध्यति? यथा यत्र धूमस्तत्र वह्निः – अत्र वह्निधूमयोः सहचरसम्बन्धः संयोगः गुणत्वात् समवायेन तदुभयवृत्तिः। तस्मात् अनुमित्युपपत्तेः अव्यवहितपूर्वक्षणे आत्मनि व्याप्तिसम्बन्धस्य वृत्तित्वाभावात् तयोः कार्यकारणभावापत्तिः। परन्तु व्याप्तिज्ञानाभावात् अनुमितिर्न जायत इति। तच्च पूर्ववृत्तित्वमत्र कार्यतावच्छेदकसम्बन्धेन समवायेन आत्मनि अनुमितिज्ञानोपपत्त्यव्यवहितप्राक्क्षणावच्छेदेन वृत्तित्वमिति। परन्तु न च समवायेन व्याप्तिसम्बन्धस्य आत्मवृत्तित्वं कदापि सिध्यति। तस्मादसिद्धं व्याप्तेः कारणत्वमिति चेत्, न। वस्तुतः अनुमितिं प्रति व्याप्तिसम्बन्धस्य कारणता साक्षात् नास्तीति सत्यम्। परन्तु तत्र व्याप्तिसम्बन्धविषयकस्य ज्ञानस्य कारणता। तादृशज्ञाने विशेष्यतया व्याप्तिसम्बन्धस्योपस्थितत्वात्। ननु कथं तर्हि तार्किकरक्षायाम् अनुमितिसाधनत्वेन व्याप्तिसम्बन्धः

---

87 कारि. पृ0सं0 287.

88 कारि. पृ0सं0 293.

89 कारि. पृ0सं0 284.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

संगच्छते? यतः वरदराजेनोक्तम् 'व्याप्तिग्रहणसापेक्षं प्रमितेः साधनं विदुः। अनुमानमिति' – इति। उच्यतेऽत्र अनुमानलक्षणनिरूपणान्तरं व्याप्तिसम्बन्धविषयकस्योपन्यासः कृतः ग्रन्थकारेण। यतः विशेष्याभावज्ञानस्यासिद्धत्वात् आदावत्र व्याप्तिज्ञानस्य विषयस्य व्याप्तिसम्बन्धस्य प्रतिपादनम्। तेन तादृशसम्बन्धविशिष्टं ज्ञानं व्याप्तिज्ञानमिति बोध्यव्यम्। तच्चानुमितिसाधनमिति न संशयः। परन्तु भाषापरिच्छेदे अनुमानखण्डे आदावेव विश्वनाथेन ज्ञानत्वेन व्याप्तेरुपन्यासः कृतः। यथा 'व्यापारस्तु परामर्शः, करणं व्याप्तिधीर्भवेत्।। अनुमायां...'- इत्यादि। व्याप्तिसम्बन्धविश्लेषणात् प्रागेव तस्य प्रयोगस्थलं परामर्शनिरूपणेन तेन निरूपितम्। सिद्धान्तमुक्तावल्यां परामर्शस्य स्वरूपं विश्वनाथेन परिष्कृतम् 'व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ठ्यावगाहि ज्ञानमनुमितौ जनकम्'[90] - इत्यनेन। व्याप्तिसम्बन्धनिरूपकत्वेन व्यापकं, व्याप्तिसम्बन्धावच्छिन्नत्वेन व्याप्यञ्च सिध्यतः। यथा वह्निव्याप्यो धूमः इत्यत्र वह्निनिरूपितसंयोगसम्बन्धावच्छिन्नव्याप्यत्वेन धूमस्य (हेतोः) व्याप्तिविशिष्टत्वज्ञानं जायते। तस्मात् व्याप्तिविशिष्टस्तावद्धेतुः। व्याप्तिविशिष्टपदस्यैकदेशेन व्याप्तिपदार्थेन वैशिष्ठ्यावगाहिपदार्थस्यान्वये सति व्याप्तिवैशिष्ठ्यावगाहिपदार्थसिद्धे च ज्ञानपदार्थेन तदन्वये व्याप्तिवैशिष्ठ्यावगाहिज्ञानमिति सिध्यति। तस्यार्थः व्याप्तिसम्बन्धावगाहिज्ञानमिति। पुनः व्याप्तिविशिष्टपदस्योक्तार्थग्रहणेन व्याप्तिविशिष्टपदार्थस्य समस्तस्य पक्षपदार्थेन अन्वये हेतुविशिष्टपक्षरूपपदार्थज्ञानं जायते। तच्छरूपं तावत् पक्षे हेतुः, हेतुवान् पक्षः इति पक्षधर्मताज्ञानमिति। तेन व्याप्तिसम्बन्धावच्छिन्नपक्षधर्मताज्ञानं परामर्श इति परिष्कृतं स्वरूपम्। स च परामर्शः अनुमितेः साक्षात् जनकम्। परामर्शज्ञानान्तरमेवानुमितिर्जायत इत्याशयः।

वाचस्पत्युदयनाचार्यादीनां पूर्वन्यायप्रवराणामभिमतानां सारसंक्षेपरूपेण तार्किकरक्षायाः 'सारसंग्रहम्' - इति टीका वरदराजेन स्वयं लिखिता। अतः तार्किकरक्षायां प्राचीननैयायिकानां मतविश्लेषणानि उपलभ्यन्ते। यथा 'लिङ्गपरामर्शोऽनुमानमित्याचार्याः'[91] - इत्यनेन उदयनाचार्याणां मतमुपस्थाप्यते वरदराजेन तार्किकरक्षाटीकायां सारसंग्रहे। परन्तु तत्र परामर्शलक्षणं न लक्षितम्। स च परामर्शः प्रतिसन्धानात्मकं तृतीयलिङ्गज्ञानमिति। व्याप्यस्य लिङ्गस्य पक्षधर्मतानुसन्धानमेव प्रतिसन्धानं, तदात्मकमित्यर्थः। साध्यव्याप्यहेतुमान् पक्षः इति निश्चयात्मकव्याप्तिप्रकारकपक्षधर्मताज्ञानं हि परामर्शः। अतः विशेष्यत्वेन पक्षधर्मताज्ञानं, तत्प्रकारत्वेन व्याप्तिज्ञानं परामर्शे विद्यते। यथा वह्निव्याप्यधूमवान् पर्वतः - इति परामर्शे धूमवान् पर्वतः - इति पक्षधर्मताज्ञानं विशेष्यं, तत्प्रकारः साध्यवह्निव्याप्यः धूमः - इति व्याप्तिज्ञानमिति यावत्। लिङ्गेनात्र साध्यसाधनं हेतुस्तावत् प्रतिपादितोऽस्ति। तच्च हेतुः विभक्त्यन्तः साधनत्वाभिव्यञ्जकः साधनत्वधर्मावच्छिन्न इति। न्यायवैशेषिकतन्त्रे हेतुपदस्य पञ्चम्यन्तमेव प्रसिद्धं, परन्तु तस्य तृतीयान्तमपि भवितुमर्हति शाब्दिकाभिमतानुसारम्।[92] महानसादौ वह्निधूमयोः सहचारप्रत्यक्षात् वह्निव्याप्यत्वेन धूमज्ञानं प्रथमलिङ्गज्ञानम्। अनन्तरं पर्वतादौ पक्षे वह्न्यनुमित्सायां प्रत्यक्षजन्यधूमज्ञानं द्वितीयलिङ्गज्ञानम्। ततश्चोक्तं परामर्शज्ञानं तृतीयलिङ्गज्ञानम्। तार्किकरक्षायां परामर्शज्ञानमिदम-नुमितिकरणत्वेन, भाषापरिच्छेदे चानुमितिकारणव्याप्तिज्ञानस्य व्यापारत्वेन प्रतिपादितमस्ति।

---

90 कारि. पृ0सं0 287.

91 ता. र. पृ0सं0 65.

92 'हेतौ' (२/३/२३) – इति सूत्रानुसारम्।

Since 2010
ISSN- 0976-8645
UGC RN-41039

सम्बन्धः, विषयः, ज्ञानञ्चेति त्रिविधाः व्याप्तिपदार्थाः। तत्र साध्यसाधनयोरैकाधिकरण्यनियमः व्याप्तिसम्बन्धः, शास्त्रेषु तद्विषयकविश्लेषणं व्याप्तिविषयः,तादृशसम्बन्धविषयकं ज्ञानञ्च व्याप्तिज्ञानमिति। एतेषु त्रिविधेषु पदार्थेषु व्याप्तेः मुख्यार्थस्तावत् सम्बन्ध इति। तस्मात् शास्त्रेषु प्रथमतया सम्बन्धरूपव्याप्तेः विचारः समुपलभ्यते। अस्तु तावत्, परन्तु तेन भाषापरिच्छेदे तस्य व्यातिरेक इति चेत्, न। वस्तुतः ग्रन्थकारेण अनुमानखण्डे प्रथमकारिकायामनुमितेः करणमेव निरूपितम्। तच्च करणं कदापि सम्बन्धः न भवितुमर्हतीत्युक्तम्। अतः न तत्र सम्बन्धनिवेशः। अनन्तरं तस्य चानुमितिकरणस्य व्याप्तिज्ञानस्य स्वरूपं ग्रन्थकारेण विश्वनाथेन प्रतिपादितम् 'व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः' – इति।

तत्र वरदराजमतानारं निरूपाधिके सति सम्बन्धविशेषः व्याप्तिः। सतीत्यत्र सामानाधिकरण्ये सप्तमी। निरुपाधिकः उपाधिरहितः, तच्चोपाधिविषयसापेक्षत्वात् ननु कस्तावदुपाधिः? उप समीपस्थे अव्यवधाने स्वधर्ममादधाति यः स उपाधिरुच्यत इति यौगिकार्थः। परन्तु साधनाव्यापकत्वावच्छिन्नं साध्यव्यापकत्वमित्युपाधेः रूढार्थः। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्, साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वञ्च साध्यव्यापकत्वम्। वस्तुतः तार्किकेषु उपाधेः स्वरूपविषये मतभेदाः विद्यन्ते। साध्यसमव्याप्तपदार्थ उपाधिरिति प्राचीनन्यायसम्मतः, साध्यविषमव्याप्तपदार्थ उपाधिरिति नवीनन्यायसम्मतश्च। तत्रोपाधेः योगरूढार्थः प्राचीनन्यायसम्मतः। प्राचीनन्यायमतानुगामिना तार्किकरक्षाकारेण वरदराजेन 'साधनाव्यापकाः साध्यसमव्याप्ता उपाधयः'[93] - इत्यनेन स्वमतमुपस्थाप्यते। साधनाव्यापकत्वे सति साध्याव्यापकत्वे सति साध्यव्यापकत्वमुपाधित्वमित्यर्थः। साधनाव्यापकत्वपदाध्याहाराभावात् सदनुमाने उपाधिप्रसङ्गः। यथा शब्दः अनित्यः कृतकत्वात् घटवत् – इत्यत्र सकर्तृकत्वमुपाधिः, अनित्यत्वसकर्तृकत्वयोः समव्याप्तत्वात्। अतः कृतकत्वहेतुः सोपाधिकत्वात् साध्यस्य अनित्यत्वस्याननुमापकः स्यात्। परन्तु अत्र कृतकत्वस्य हेतोः अनित्यत्वानुमापकमेव सिध्यति। अपि च साधनाव्यापकत्वमात्रं चेत् उपाधिलक्षणं, तेनात्र घटत्वस्योपाधिप्रसक्तिः। यतः सत्येपि शब्दे कृतकत्वभावे घटत्वाभावात् तत् हेत्वव्यापकमिति। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। समव्याप्तं तुल्यव्याप्तिविशिष्टमिति यावत्। यथा पर्वतः धमूवान् वह्नेः - इत्यत्र वह्निमत्वहेतुः व्याप्यत्वासिद्धः, उपाधिविशिष्टत्वात्। अत्र आद्रेन्धनसम्भूतवह्निः उपाधिः। तेन साध्यधूमसमानाधिकरणेषु पाकशालादिषु आद्रेन्धनसम्भूतवह्नेः वृत्त्वित्वात् तत् धूमव्यापकः। तथा च आद्रेन्धनसम्भूतवह्निसमानाधिकरणेषु धूमस्य वृत्त्वित्वाच्च आद्रेन्धनसम्भूतवह्निः तावत् साध्यधूमव्याप्यः। हेतुभूतस्य वह्नेः अधिकरणे तप्तलौहपिण्डे आद्रेन्धनसम्भूतस्य वह्नेरवृत्तित्त्वात् स च वह्निः हेत्वव्यापक इति। उदयनाचार्याभिमतोपाधिलक्षणमपि सारसंग्रहकारेण उपपादितम्। तल्लक्षणं यथा साध्यव्यापकत्वे सति साध्यव्यापकत्वम् - इति।

विश्वनाथपञ्चाननभट्टाचार्य्येण उपाधेः पृथक् लक्षणं नव्यन्यायानुसारं सिद्धान्तमुक्तावल्यां प्रतिपादितम्। 'साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापक उपाधिः'[94] - इति। कथासु वादिना प्रतिवादिना वा संगृहीते साध्ये हेतौ वा यथार्थत्वं न विद्यते। तथा चेत् सति, यथार्थानुभवत्वात् न तत्रोपाधिप्रसक्तिः। वस्तुतः तत्र वादिप्रतिवादिभिः स्वस्वाभिमतैः

[93] ता. र. पृ0सं0 66.

[94] कारि. पृ0सं0 492.

Since 2010
ISSN- 0976-8645
UGC RN-41039

साध्यं हेतुर्वा संगृह्यते। तस्मात् अभिमतसाध्यव्यापकत्वेन अभिमतसाधनाव्यापकत्वमुपाधित्वमित्यभिप्रेतः। यथा स: श्यामः, मित्रातनतत्वात् - इत्यत्र शाकपाकजन्यत्वमुपाधिः। आयुर्वेदवचनादनुमीयते शाकभोजनं गर्भस्थस्य शिशोः श्यामरूपस्य कारणम्।[95] अस्तु तावत्, परन्तु तेन घटादौ साध्यभूतश्यामत्ववृत्तित्वात् शाकपाकजन्यत्वावृत्तित्वाच्च साध्यव्यापकत्वहानिप्रसङ्गः। तस्मादत्र कथङ्कारं शाकपाकजन्यत्वस्य उपाधित्वं सिध्येत्? शङ्कादूरीकरणाय विश्वनाथेन सिद्धान्तमुक्तावल्यामुक्तम् - 'यद्धर्मावच्छिन्नसाध्य-व्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात्'[96] - इति। अनेन शुद्धसाध्यस्य श्यामत्वमात्रस्य ग्रहणाभावात् घटादावतिव्याप्तिप्रसक्तिप्रतिषेधः। अतः मित्रातनयत्वावच्छिन्न-श्यामत्व-व्यापकत्वात्, तदवच्छिन्नसाधनाव्यापकत्वाच्च शाकपाक-जन्यत्वस्योपाधित्वे नास्ति संशयः। दिनकरीटीकाकार-महादेवभट्टमते साध्यव्यापकस्वरूपं तावत् यद्धर्माधिकरणीभूत-साध्याधिकरणनिष्ठाभावाप्रतियोगित्वं तद्धर्मावच्छिन्नसाध्यव्यापकत्वमिति।

तार्किकरक्षानुसारमयमुपाधिः द्विविधः। निश्चितः शङ्कितश्चेति। परन्तु सिद्धान्तमुक्तावल्यां त्रिविधाः उपाधयः विवेचिताः। यथा शुद्धसाध्यव्यापकः, किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकः, बाधोन्नीतश्चेति। उपाधिव्यभिचारज्ञानेन साध्यव्याभिचारज्ञानुमानमेवोपाधिप्रयोजनम्।

अथ विश्वनाथमतानुरोधं व्याप्तिलक्षणमालोच्यते। विश्वनाथेन उपाधिलक्षणविशिष्टव्याप्तिलक्षणं नोपन्यस्तम्। तन्मते 'व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः' - इति। साध्यमस्ति यत्र तत् साध्यवान् इति अस्त्यर्थे मतुप्। साध्याभावाधिकरणनिरूपितवृत्तित्वाभावावच्छिन्नहेतुना साध्यसम्बन्धः व्याप्तिः। पर्वतः वह्निमान् धूमात् - इति सद्धेतुकानुमाने प्रतिपादितं वह्नित्वं साध्यं, धूमत्वञ्च हेतुः। अतः साध्यवत् वह्निमत् महानसचत्वराद्यधिकरम्। साध्यवद्धेरवृत्तित्वात् साध्यवदन्यं साध्यवदभिन्नं साध्याभावाधिकरणं तावत् जलहृदादयः, तन्निरूपिता वृत्तिता मीनशैवालादिष्वेव वर्तते; न तु हेतौ धूमावाधेयत्वाभावात्। तस्मादत्र साध्यवह्न्याभावाधिकरण-जलहृदादिनिरूपितवृत्तिताभाववच्छिन्नः हेतुः धूमः। एतादृशेन धूमेन (हेतुना) वह्निसम्बन्धः (साध्यसम्बन्धः) व्याप्तिरिति। नन्वत्र सद्धेतुकत्वे किं मानम्? हेतुसमानाधिकरणा-त्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्येन धूमसमानाधिकरणेषु वह्नेः सदा वृत्तित्वादिदं सद्धेतुकानुमानम्। यथा हेतुभूतधूमसमानाधिकरणेषु घटपटादीनां यावतां पदार्थानां सत्येपि अत्यन्ताभावे साध्यस्य वह्नेः तादृशाभावः कदापि न विद्यते। अतः न वह्निः अत्यन्ताभावप्रतियोगी। एतादृशेन वह्निना धूमस्यैकाधिकरण्यं सामानाधिकरण्यं प्रसिध्यत्वादिदं सद्धेतुकानुमानमिति यावत्। ननु पर्वतः वह्निमान् धूमात् - इति सद्धेतुकानुमाने समवायेन साध्यभूतवह्न्यधिरणं तदवयवः, तदभावाधिकरणे महानसादौ हेतुभूतधूमवृत्तित्वात् न तत्र साध्याभावाधिकरणनिरूपितवृत्तित्वाभावप्रसक्तेः व्याप्तिलक्षणस्या-व्याप्तिप्रसक्तिः। अतः साध्यतावच्छेदकसम्बन्धेन साध्याभावः बोध्यः। यथात्र युतसिद्धत्वात् साध्यभूतवह्नेः संयोगेन पक्षभूतपर्वतवृत्तित्वं सिध्यति। तस्मात् साध्यतावच्छेदकसम्बन्धः संयोगः। तेन संयोगेन सम्बन्धेन साध्यभूतवह्न्यभावाधिकरणानामुपादानप्रसङ्गः। तेन संयोगेन

[95] सुश्रुतसंहितायां शारीरस्थाने द्वितीयाध्याये उक्तम् –
'यादृग्वर्णमाहारमुपसेवते गर्भिनी तादृग्वर्णप्रसवा भवतीत्येके भाषन्ते।'
[96] कारि. पृ0सं0 492.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

पाकशालादीनां संग्रहात् लक्षणस्य अव्याप्तिनिरासः। तथोक्तं विश्वनाथपञ्चाननभट्टाचार्य्येण सिद्धान्तमुक्तावल्याम् - 'येन सम्बन्धेन साध्यं तेन सम्बन्धेन साध्यवान् बोध्यः'[97] – इति।

ननु पर्वतः वह्निमान् धूमात् - इत्यत्र साध्यभूतवह्न्यभावाधिकरणत्वं जलह्रदादिवत् धूमावयवस्यैव सिध्यति। तस्मात् हेतुभूते धूमे साध्यभूतवह्न्यभावाधिकरणधूमावयवनिरूपितवृत्तित्वात् पुनः व्याप्तिलक्षणस्याव्याप्त्यापत्तिः सद्धेतुकानुमानाप्रसिद्धत्वाच्च। अतोऽत्र हेतुतावच्छेदकसम्बन्धेन साध्याभावाधिरणवृत्तित्वं बोध्यव्यम्। संयोगेनात्र हेतुभूतधूमः संगृहीतः। तेन हेतुतावच्छेदकेन संयोगसम्बन्धावच्छिन्नेन साध्याभावाधिकरणनिरूपणवृत्तित्वात् नाव्याप्तिप्रसक्तिः। उक्तञ्च रामरूद्र्याम् - 'ननु साध्यवदन्यनिरूपित-तत्संबन्धावच्छिन्नाधेयत्वम्, वृत्त्यनियामकसम्बन्धेन हेतुतायां तदप्रसिद्धेः तादृशा-धेयतानवच्छेदकं हेतुतावच्छेदकमित्यत्रापि तादृशप्रतियोगितानवच्छेदकमित्येवार्थ इति ध्येयम्'[98] - इति।

ननु वाच्यं ज्ञेयत्वात् – इत्यत्र साध्याभावाधिकरणमप्रसिद्धत्वात् व्याप्तिलक्षणस्याव्याप्त्यापत्तिः। यथा निखिलपदार्थाः एवाभिधावृत्तिलभ्याः ईश्वरज्ञानविषयाः। अतः साध्यभूतवाच्यत्वस्य भेदः अभावाधिकरणमप्रसिद्धम्। ईश्वरस्य प्रमाज्ञानविषयस्य अभिधावृत्तिलभ्यार्थः वाच्यम्। अपि च सत्तावान् जातेः – इत्यत्र सत्ताविशिष्टद्रव्यगुणकर्मभिन्नसामान्यादौ हेतुतावच्छेदकसम्बन्धेन समवायेन कस्यचिदपि पदार्थस्यावृत्तित्वात् तत्र तादृशसम्बन्धेन वृत्तित्वाप्रसिद्धत्वाच्च व्याप्तिलक्षणस्याव्याप्तिप्रसक्तिः। तस्मात् दोषदूरीकरणार्थं ग्रन्थकारेण द्वितीयलक्षणं निरुपितम् - 'अथ वा हेतुमन्निष्ठविरहाप्रतियोगिना। साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते।'[99] - इति। हेत्वधिकरणवृत्त्यत्यन्ताभावप्रतियोगिना साध्येन हेतोः सामानाधिकरण्यं व्याप्तिरित्यर्थः। अनेन हेतुभूतस्य ज्ञेयत्वस्य समानाधिकरणेषु वाच्यत्वस्यात्यन्ताभावा-सम्भवात् तद्व्यत्यन्ताभावाप्रतियोगि। तादृशसाध्येन वाच्यत्वेन हेतोः ज्ञेयत्वस्य सामानाधिकरण्यमत्र व्याप्तिः। एवं हेतुभूतस्य जातेः समानाधिकरणेषु द्रव्यगुणकर्मसु साध्यं सत्तावत्वम् अत्यन्ताभावप्रतियोगितानवच्छेदकेन वृत्तित्वात् व्याप्तिलक्षणसमन्वयः।

ननु सर्वदा पाकशालायां वह्निधूमयोः सहचारवृत्तित्वप्रत्यक्षकारी अनुमाता पर्वते धूमदर्शनेन कथंकारं तत्र वह्न्यनुमानं करोति? अथवा यत्किञ्चित् वह्निमत् धूमवत्वात् - इति सामान्यवह्न्यनुमानं कथं करोति? तस्य पर्वतवृत्तिवह्निधूमयोः सामान्यतः वह्निधूमयोश्च सहचारवृत्तित्वज्ञानाभावात्। तत्र प्रथमपक्षे साध्यत्वेन पाकशालास्थवह्नेः हेतुत्वेन च पर्वतीयधूमस्य संग्रहात् हेत्वधिकरणे पर्वते अत्यन्ताभावप्रतियोगित्वेन पाकशालास्थवह्निवृत्तित्वात्, एवं साध्यत्वेन पर्वतीयवह्नेः हेतुत्वेन च पाकशालास्थधूमस्योपादानात् हेत्वधिकरणे पाकशालायामत्यन्ताभावप्रतियोगित्वेन पर्वतीयवह्निवृत्तित्वाच्च व्याप्तिलक्षणासमन्वय-प्रसक्तिः अव्याप्तिः। द्वितीयपक्षे समानाधिकरणवह्निधूमयोः व्याप्तिविशेषात् लक्षणसमन्वय इति चेत्, न। उभयाभावात्। यथा पर्वतः वह्निमान् धूमात् – इत्यत्र समानाधिकरणव्याप्तिविशेषेण हेतुभूते पर्वतीय-धूमसमानाधिकरणेषु साध्यभूतपर्वतीयवह्निवृत्तित्वेऽपि पर्वतीयवह्निघटयोरुभयोः अत्यन्ताभावात् पुनः अव्याप्त्यापत्तिः। अयमाशयः, अनुमाता पूर्वं सर्वत्र पर्वतेषु धूमात् वह्न्यनुमाने वह्निघटौ युगपदपश्यत्। परन्तु अत्र सत्येपि पर्वतीयवह्नौ घटाभावात् तादृशवह्निः पर्वतवृत्तेरुभयाभावस्य प्रतियोगी। तेन

[97] कारि. पृ0सं0 293.

[98] कारि. पृ0सं0 294.

[99] कारि. पृ0सं0 295.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

हेतुभूत- धूमाधिकरणवृत्त्यत्यन्ताभावप्रतियोगिकत्वात् पुनरव्याप्तिः। एवं पटः गुणवान् द्रव्यत्वात् – इत्यत्र सदनुमाने हेतुभूतद्रव्यत्वसमानाधिकरणे पटे घटपदार्थवृत्तिगुणाभावात् पूर्ववत् अव्याप्त्यापत्तिः। इति पूर्वपक्षः।

पूर्वोक्तदोषनिवारणाय व्याप्तिलक्षणस्य यथार्थः बोध्यव्यः। तन्निरुपणाय सिद्धान्तमुक्तावल्यामुक्तं विश्वनाथेन 'तथापि प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं, तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वाच्यम्'– इति। हेतोः तदधिकरणवृत्त्यत्यन्ताभावीयप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नेन साध्येन सामानाधिकरण्यमिति व्याप्तिः। इदानीम् अवच्छेदकस्य निवेशे कथंकारमव्याप्तिनाशः भवति तत् विचार्यते। पर्वतः वह्निमान् धूमात् – इत्यत्र साध्यं वह्नित्वमात्रम्, न तु पर्वतीयवह्नित्वमिति विशेषणविशिष्टं साध्यम्। तेन हेतुभूतधूमाधिकरणे पर्वते पाकशालास्थवह्नित्वेन वह्नेरत्यन्ताभावात् तादृशवह्निः अभावीय-प्रतियोगितावच्छेदकः। तस्मादत्र विशेषणविशिष्टस्य वह्नित्वस्याप्रसक्तिः। परन्तु हेतुभूतधूमाधिकरणे पर्वते वह्नित्वमात्रेण शुद्धवह्नित्वेन वा वह्नेरत्यन्ताभावावृत्तित्वात् वह्निः तादृशाभावीयाप्रतियोगी। अतः वह्नित्वमत्र युगपत् प्रतियोगितानवच्छेदकं साध्यतावच्छेदकञ्चेति। अनेन व्याप्रिलक्षणसंगतिः सिध्यति। वस्तुतस्तु ग्रन्थकारेण साध्यस्य धर्मद्वयमुपदिष्टम्। यथा हेत्वधिकरणवृत्त्यत्यन्ताभावीयप्रतियोगितानवच्छेदकत्वे सति साध्यतावच्छेदकावच्छिन्नत्वं साध्यत्वम्। सतीति सामानाधिकरण्ये सप्तमी। पटः गुणवान् द्रव्यत्वात् – इत्यत्र साध्यतावच्छेदकं गुणत्वम्, तेन च हेतुभूतद्रव्यत्वसमानाधिकरणे श्यामघटे रक्तत्वेन रक्तगुणस्य अवृत्तित्वेऽपि न क्षतिः, तत्र गुणत्वेन गुणस्यात्यन्ताभावोऽविद्यमानत्वात्। तस्मात् तादृशाभावीयप्रतियोगि- तानवच्छेदकं गुणत्वं, तेन द्रव्यत्वस्यैकाधिकरण्यत्वात् व्याप्तिलक्षणं संगच्छते।

पूर्वोक्तं चेत् व्याप्तिलक्षणं, पुनः तस्याव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिः स्यात्। यथा अयं वृक्षः कपिसंयोगी एतद्वृक्षत्वेत् – इत्यत्र साध्यं कपिसंयोगः, साध्यतावच्छेदकधर्मः कपिसंयोगत्वम्। अपि च सर्ववृक्षवृत्तिहेतुभूतम् एतद्वृक्षत्वं हेतुः। तच्च साध्यमेतद्वृक्षस्य शाखावच्छेदकावच्छिन्नं, न तु मूलावच्छेदकावच्छिन्नम्। तेन हेतुभूतस्य एतद्वृक्षत्वस्य समानाधिकरणे एतद्वृक्षे मूलावच्छेदकावच्छिन्नेन साध्यभूतस्य कपिसंयोगस्यात्यन्ताभावात् तस्य तादृशप्रतियोगितावच्छेकत्वात् व्याप्तिलक्षणं न संगच्छते। ननु का नाम अव्याप्यवृत्तिः? यदा प्रतियोगी अनुयोगिसर्वदेशावृत्तिर्भवति तदा सा अव्याप्यवृत्तिः। अत्र प्रतियोगी कपिसंयोगः वृक्षस्यैकस्यां शाखायां वर्तते, न तु सर्वस्मिन् वृक्षे। अतः कपिसंयोगः अव्याप्यवृत्तिः। वस्तुतः संयोगविभागावव्याप्यवृत्तिपदार्थौ। पूर्वपक्षीयपूर्वोक्तदोषदूरीकरणाय व्याप्ति-लक्षणस्थितस्य अत्यन्ताभावस्य पदस्यातिरिक्तं विशेषणं संयोजनीयम्। यथा प्रतियोगिव्यधिकरणमिति। अनेन हेत्वधिकरणवृत्तित्वेन स्वप्रतियोग्यधिकरणावृत्तित्वेन च तादृशस्य अत्यन्ताभावस्योपादानं भवति। एतादृशस्य अत्यन्ताभावस्य प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नं साध्यसामानाधिकरण्यं व्याप्तिरिति। अयमाशयः, हेत्वधिकरणवृत्त्यत्यन्ताभावश्चेत् समानाधिकरणं तर्हि न क्षतिः। अत्र हेतुभूतस्य एतद्वृक्षत्वस्य समानाधिकरणे एतद्वृक्षे कपिसंयोगात्यन्ताभावप्रतियोगी कपिसंयोगः सामानाधिकरण्याव-च्छेदकावच्छिन्नः। तस्मात् नात्र अव्याप्तिप्रसङ्गः। अत्र घटादयः न सन्ति – इत्येवमत्यन्ताभावोऽङ्गी-करणीयः। यतः तादृशाभावीयप्रतियोगिणः घटादयः हेतुभूतैतद्वृक्षत्वस्य

Since 2010
ISSN- 0976-8645
UGC RN-41039

व्यधिकरण्यावच्छेदकावच्छिन्नाः।

- उपसंहारः

तार्किकरक्षाग्रन्थ: न्यायवैशेषिकशास्त्रेतिहासे अतीव महत्त्वपूर्णं स्थानं लभते। प्राचीनन्यायानुगामिनः ग्रन्थकारस्य आचार्यवरदराजस्य विषयोपन्यासरीति: पदचयनरीतिश्च प्रथमन्यायशास्त्राध्येतृणां समीपे ग्रन्थस्यास्यापरिहार्यं मूल्यं परिवर्धयति। अपि च विश्वनाथप्रणीत: भाषापरिच्छेद: नव्यन्यायाम्बुध्या: प्रथमसोपानरूपेण विराजते। ग्रन्थोऽयं माहात्म्येन तदितरग्रन्थानामतिशेते। अत: निबन्धेऽस्मिन् प्रस्तुतविषमाधाकृत्य प्राचीनन्यायसिद्धान्तानां नव्यन्यायसिद्धान्तानाञ्च व्याख्या कथंकारं प्रतिपादिता, तद्विश्लेषणमस्ति। परन्तु संक्षिप्तनिबन्धेऽस्मिन् अतिदुरूहविषयस्यास्य पूर्णवर्णनमसम्भव:। यथा भाषापरिच्छेदे व्याप्तेः प्रथमलक्षणस्याव्याप्तिदोषदूरीकरणाय द्वितीयं लक्षणं ग्रन्थकारेण प्रतिपादितम्। तस्य लक्षणस्य सिद्धान्तमुक्तावलीग्रन्थानुसारं पूर्णविश्लेषणं नोपपादितमस्त्यत्र। व्याप्तिसम्बन्धविषयकः विचारः नव्यन्यायानुगामिना विश्वनाथेन अतिनैपुण्येन उपस्थाप्यते। परन्तु तार्किकरक्षायामेतादृशः विचारः नोपलभ्यते। तत्र व्याप्तिलक्षणप्रयोजकस्य निरुपाधिकस्य पदमात्रस्य उपादानमस्ति। वस्तुतः अनेनैकपदाध्याहारेण नैयायिकप्रवरः वरदराजः व्याप्तिप्रतिबन्धकानां हेत्वाभासानां निराकरणं चकार। पूर्वोक्तविश्लेषणेन अवगम्यते वरदराजः प्रथमन्यायपाठार्थिनां समीपे प्रथमन्यायपाठ: कथङ्कारं सुलभबोधक: भवेदिति विचिन्त्य 'तार्किकरक्षा' लिलेख। परन्तु न तादृशानां पाठार्थिनां बोधगम्य: स्वल्पायाससिद्ध: किल 'भाषापरिच्छेद:'। नव्यन्यायानुगामिना विश्वनाथपञ्चाननेन प्रियशिष्यस्य पौत्रस्य वा राजीवस्य कृते न्यायवैशेषिकतन्त्रसिद्धविषया: विषदीक्रियन्ते भाषापरिच्छेदे। परन्तु ग्रन्थस्य विषयोपन्यासरीतिः, पारिभाषिकपदसंग्रह इत्यादिविषयविवेचनात् ज्ञायते नासीत् ग्रन्थस्याधिकारी राजीव: प्रथमन्यायपाठार्थी।

- शब्दसंकेता:

१. ता. र. - तार्किकरक्षा

२. कारि. – कारिकावली

## सन्दर्भग्रन्थसूची


- विन्ध्येश्वरीप्रसादः, द्विवेदी। सम्पादिता। तार्किकरक्षा। वाराणसी, 1903.
- चित्तनारायणः, पाठकः। सम्पादकः। व्याप्तिपञ्चकम्। चौखम्बा विद्याभवन। वाराणसी, 2010.
- झा, नरेश सम्पादकः। *धातुपाठः*। वाराणसी : चौखम्वा सुरभारती प्रकाशन, २०१७।
- त्रिपाठी, जयशङ्करलाल सुधाकरमालवीय च सम्पादकौ। *काशिका* (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)। वाराणसी : तारा प्रिण्टिङ्ग वकर्स, प्रथमभागः १९८६, द्वितीयभागः १९८६, चतुर्थभागः१९८४।
- मिश्र, रमाशंकर, सम्पादकः। *अष्टाध्यायीसूत्रपाठः*। दिल्ली : मोतीलाल बनारसीदास, २००५।
- वर्णी, वेदव्रत सम्पादकः। *व्याकरण-महाभाष्यम्* (प्रदीप-उद्योत-विमर्शैः समलङ्कृतम्)। रोहतक, हरयाणा : हरयाणा साहित्य संस्थान, द्वितीय भाग, १९६३।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

# स्त्रीपात्रमनस्तत्त्वाभिदर्शने सिद्धहस्तः कविकालिदासः [100]

**प्रमुखशब्दाः**

शकुन्तला, उर्वशी, मालविका, यक्षिणी, पार्वती, सीता

**शोधसारः**

लोकस्य निदर्शनं भवति साहित्यम्। साहित्ये ये केचन् ग्रन्थाः भवन्ति ते लोकस्य, मानवजीवनस्य, राष्ट्रस्य प्रतिविम्बसदृशा एवाङ्गीकर्तुं शक्यते। महाकवयः स्वकीयप्रतिभाचातुर्येण जनानां हृदस्थभावानां स्वाभाविकं वर्णनं विधाय कान्तासम्मितोपदेशद्वारा भावकानां मनोरञ्जनपुरस्सरं मार्गदर्शनमपि कुर्वन्ति। स्वाभाविकप्रवृत्तिवर्णने महाकविकालिदासस्य सूक्ष्मविवेचनं विश्वस्मिन् विश्वे नितरां श्लाघार्हमिति सर्वविदितमेव। मनुजाः स्वीयजीवने यदाकदाचिदपि विविधस्थितौ अनुभूतिं प्राप्नुवन्ति, ताः एवानुभूतयः विविधदृशा हर्ष-शोक-कटुतिक्त-मधुरास्वादयोग्याः भवन्ति। एता अनुभूतयः एव कवितामिन्याः अतुलनीयं प्रासादान् निर्माय अस्मान् परितोषयन्ति।

विविधसंवेगानां, भावानां, मधुरोद्वेगानां मनोरमा निधिर्भवति मानवानामन्तःकरणम्। कालिदासः मानवहृदि उत्पन्नानां विविधस्वभावानां, चारित्रिकभावानां स्वरूपप्रदाने श्रेष्ठकलाकारो वर्तते। शकुन्तलायाः पतिगृहगमनावसरे कारुणिकप्रसङ्गो भवेत् अथवा सीतायाः दुःखमय-संघर्षपूर्णजीवनवृत्तं स्यात् अथवा विदूरायाः यक्षदयितायाः हृदयस्य अश्रुस्नाता कथा सर्वत्र कालिदासस्य रसात्मकसौन्दर्यं स्निग्धहृद्भावानं निदर्शनं प्रस्तौति। प्रकृतेऽस्मिन् शोधपत्रे कालिदासीयग्रन्थेषु याः काश्चन स्त्रीपात्राणि सन्ति तत्र शकुन्तला भवेत् अथवा सुदक्षिणा भवेत् अथवा सीता भवेत् एतासां विविधपात्राणां स्वभावः कीदृशः अस्ति इति विशद विवरणं प्रदत्तम् अस्ति इह पत्रके।

**मूलप्रबन्धः**

महाकविकालिदासः स्वनाटकेषु महाकाव्येषु च नार्यः स्वभावगतचित्रणम् अत्यन्त मनोमुग्धरूपेण वर्णितवान्। महाकवेः महाकाव्येषु नाटकेषु नारीपात्रणाम् वैचित्र्यपूर्णघटनाचक्रं वर्णितं दृश्यते। ब्रह्मनिर्मिते इह जगति स्वभावगतभिन्नता सहजतया दृग्गोचरी भवति। स्वभावगतभिन्नतायाः चित्रणं नारीणां पुरुषाणाम् च विषये भिन्न- भिन्नं भवति। स्त्रीणां स्वभावः कायिकगठनं पुरुषस्वभावात् सर्वथा भिन्नं भवति इति जानन्ति एव तत्र भवन्तो भवन्तः। मनुजाः प्रकृतिद्वारा मनः शरीरं च प्राप्तवन्तः। अतः आचरणे चिन्तने भावप्रकटने सर्वत्र वैशिष्ट्यं भवति।

स्वभावस्य आशयो भवति- सहजा प्रकृतिः-अभ्यासः-व्यक्तिमूलकः-गुणश्च। जनेषु वस्तुनि वा सर्वदा या तिष्ठति स मुख्यगुणः एव 'स्वभावः' इति उच्यते। महाकविः वेदव्यासः निगदति -स्वभावोऽध्यात्ममुच्यते।[101] अपि च- 'स्वभावस्रोतसा व्रतमुह्यते सततं जगत्। [102] एवं प्रकारेण मननस्यानुकूलाचरणेन स्वभावे सरलता तद्विपरीताचरणेन स्वभावे वक्रता भवति। कालिदासस्य रचनासु विभिन्ननारीणाम् स्वभावगतविशिष्टता परिलक्षिता भवन्ति। यासां चित्रणं सहजरूपेण स्वभाविकरूपेण च कविना कृतम् अस्ति।

100 डा. दीपिका दीक्षित, प्राक्तनशोधच्छात्रा, केन्द्रीयसंस्कृतविश्वविद्यालयः,लखनऊपरिसरः

101 महाभारत, भीष्मपर्व – 27/33

102 महाभारत, शांतिपर्व– 103/51

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

**शकुन्तला**

अभिज्ञानशाकुन्तलस्य नायिकायाः शकुन्तलायाः स्वभावः सरलः, मृदुः सौहार्दयुक्तश्च वर्तते। तपोवने लालन-पालनवशात् तस्यां नैसर्गिक सुशीलता, सरसता, मुग्धता च सरलरूपेण लभ्यन्ते। सा अतीव सुन्दरी वर्तते। सा एका मुग्धा, तरुणी, तथा कन्या वर्तते। विवाहस्य नामश्रवणेऽपि सा असूयां करोति। शकुन्तलायां मनसः सहजता, सरसता च आसीत्। अन्तःकरणगुणाः अपि तत्र आसन्। तस्याः अलौकिकं सौन्दर्यं दृष्ट्वा राजा मन्त्रमुग्धो भवति।[103] सा गौरवर्णा युवती, लज्जाशीलयुक्ता ललना च वर्तते। राजानं दृष्टैव तस्याः हृदि कामभावस्य जागरणं भवति तथापि सा अभिव्यक्तं न करोति-किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता।[104] राजाद्वारा तस्याः प्रशंसा यदा भवति तदा सा लज्जावनता भवति। सा सखीसमक्षं लज्जावशात् स्वकामविकारं न प्रकटितवती। विशेषनिवेदनवशात् सा स्वमदनव्यथां सखीं प्राह- **सखि! यतः प्रभृति मम दर्शनपथमागतः स तपोवनरक्षिता राजर्षिः, तत आरभ्य तद्गतेनाभिलाषेणैतदवस्थास्मि संवृत्ता।**[105] कालिदासः शकुन्तलायाः त्रिविध अवस्थायाः वर्णनं कृतवान्।

(क) प्रथमावस्थायां सा कण्व ऋषेः पालिता मुग्धा च कन्या वर्तते। स्वभावेन सरला, मृदु च वर्तते। पशुपक्षीणां कृते तस्याः स्नेहं इत्थं वर्णितमस्ति- **अस्ति मे सोदरस्नेह एतेषु प्रेम वर्तते।**[106] आरूढनवयौवनशकुन्तला स्वसखीमपि स्पष्टीकर्तुं न प्रभवति- **अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रतास्मि।**[107] **शिथिलय तावदेतत्।** वृक्षान् प्रति प्रेमाधिक्यवशात् सा अलङ्करणप्रियं नवपल्लवमपि न त्रोटयति-

**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः।।**[108]

सा स्वमदनविकारं अपि न जानाति। एवं सा एका अनभिज्ञा तपस्वीकन्या वर्तते। अस्मात् कारणात् कालिदासः प्रकृतिकोमलं मृदुपूर्णमुपमानं प्रददाति।

(ख) तस्याः द्वितीयावस्था वर्तते नवप्रेयसीत्यस्या- दुष्यन्तं दृष्ट्वा तं प्रति उत्पन्नभावविह्वला शकुन्तला कथयति- **यद्यात्मनः प्रभविष्यामि**[109] । दुष्यन्तस्य समीपं गन्तुं सा असमर्थतां प्रकटयति। वस्तुतः प्रेम तु सर्वेषामन्तःकरणे राजते। शकुन्तलायामपि प्रेम सहजमेव। शकुन्तला शारीरिक अभिव्यञ्जकवाक्यैर्व्यनक्ति- **शकुन्तला राजानमवलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता।**[110] सा प्रियतमं दीर्घसमयं द्रष्टुं वाञ्छति। किन्तु सखीनाम् लज्जावशात् सा न प्रकटयति। स्वसखीभिः माध्यमेन विवाहोत्तरजीवनविषये पूर्णतामवाप्य दुष्यन्तस्य प्रेम्णि सा व्याप्ता भवति। गान्धर्वविवाहेन स्वात्मानं समर्प्य सा एवं निमग्ना भवति। यत् द्वारस्थितस्य अतिथेः दुर्वासः वचनमपि न श्रृणोति। कण्वस्य अनुपस्थितौ सा विवाहं कृत्वा लज्जाम् अनुभवति। सरलहृदया शकुन्तला स्वात्मनि अपराधं अनुभवति।

(ग) तृतीयावस्था तस्याः परित्यक्तायाः मातृरूपायाः वर्तते। सरसहृदया शकुन्तला कस्यापि अपमानं न करोति न अभिमानं करोति। परित्यक्तावस्थायां सा स्वचरित्रे आक्षेपं श्रुत्वा अपि स्वाभिमानस्य त्यागं न करोति- **आर्यस्य परिणय एव संदेहः।**

103 अभिज्ञानशाकुन्तलम्- 1/26
104 अभिज्ञानशाकुन्तलम्-1/ पृ. 75
105 अभिज्ञानशाकुन्तलम्-3/पृ. 177
106 अभिज्ञानशाकुन्तलम्-1/पृ. 51
107 अभिज्ञानशाकुन्तलम्-1/ पृ. 55
108 अभिज्ञानशाकुन्तलम्-4/9
109 अभिज्ञानशाकुन्तलम्-1/पृ.-94
110 अभिज्ञानशाकुन्तलम्-1/पृ. 100

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

**कुत इदानीं मे दूराधिरोहिण्याशा।** [111]। पतितिरस्कृता शकुन्तला तत्र जीवनं यापितुं न वाञ्छति। अपितु सा पृथ्वीं याचते। मेनकाद्वारा मारीचस्य आश्रमे यदा सा प्राप्ता तत्र तस्याः जीवनं उदात्तं भवति। तत्र सा नवीनं तपोमयजीवनं प्राप्नोति- **नियमक्षाममुखी धृतैकवेणी।** [112] तत्र तस्य स्वरूपं गम्भीरं वर्तते। लाञ्छितायाः अपमानितायाः तस्याः हृदयं पुत्रवात्सल्ये विह्वलं भवति। सर्वदमनेन यदा प्रश्नः क्रियते- **मातः क एषः ।**[113] पुत्र वात्सल्यभावविह्वला सा कथयति- **वत्स ते भागधेयानि पृच्छ ।**[114] नूनं एव सा क्षमाशीला पत्नी आसीत्। कष्टसागरे पतित्वा अपि सा पत्युपरि दोषारोपणं न करोति- **अथ कथमार्यपुत्रेण स्मृतो दुःखभाग्ययं जनः।** [115] शकुन्तला अप्सरसः कन्या आसीत्। अतः तस्याः सौन्दर्यं अव्याज मनोहरं च आसीत्। शकुन्तला आभरणयुक्ता पतिगृहं गन्तुम् उद्यता भवति। तदानीं अश्रुपूरितलोचनेन कण्वः आशीर्वादं ददाति-

**ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।**
**सुतं त्वमपि सम्राजं सेव पुरुमवाप्नुहि।।**[116]

मृगशावकः पुत्रवत् आसीत्। तेन् शकुन्तलायाः मार्गः अवरुद्धः कृतः-

**यस्य त्वया व्रणविरोपणमिङ्गदीनां**
**तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।**
**श्यामाकमुष्टिपरिवर्धितको जहाति।**
**सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।।**[117]

एवं प्रकारेण चतुर्थेङ्के भावपूर्णः स्नेहपूर्णश्च वार्तालापो भवति। पतिगृहगमन समये शकुन्तला कण्वं समालिङ्ग्य कथयति- **कथमिदानीं तातस्याङ्कात् परिभ्रष्टा मलयतरुन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्ये।**[118] दुःखिता अपि शकुन्तला जनकतुल्यकण्वं चिन्तामुक्तं कृत्वा कथयति- **तपश्चरणपीडितं तातशरीरम्। तन्मातिमात्रं मम कृत उत्कण्ठितुम्।**[119]

कण्वऋषेः स्नेहभावोऽपि शकुन्तलायाः निमित्त आसीत्। शकुन्तलायाः तस्य प्राणरूपा आसीत्। सर्वगुणसम्पन्ना अपि शकुन्तला अनसूया, कण्व शिष्यः शार्ङ्गरवः, गौतमी च तत्र आसन्। तेषां दृष्ट्या शकुन्तलायाः आचरणं निर्दुष्टं न आसीत्। अनसूया अपि कथयति- **यद्यपि नाम विषयपराङ्मुखस्यापि जनस्यैतन्न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्।**[120] गौतमी शार्ङ्गरवः अपि तथैव कथयत। एवं प्रकारेण गुप्तप्रेम्णि विवेकपूर्णविचारः अपरिहार्यः वर्तते। यत् शकुन्तलया न क्रियते। कण्वः शकुन्तलायाः आचरणे न दोषं पश्यति- **दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता-----।**[121] कालिदासेन् अपि उत्तम् प्रेमप्रकरणे गुरुजनैः हस्तक्षेपं विना प्रणयः शुद्धः न भवति।

प्रेमविवाहसन्दर्भे कालिदासः शकुन्तलामाध्यमेन नारीणां कृते सन्देशं ददाति। कालिदासेन वहुवर्षम् यावत् शकुन्तलायाः पश्चातापस्य अग्ने राजानं परिमार्जितं कृत्वा नाटकं सुखान्तरूपं प्रदत्तं। अन्ततः शकुन्तलायाः प्रौढतायाः, गम्भीरतायाः, विचारशीलतायाः, सरलतायाश्च निदर्शनं भवति।

[111] अभिज्ञानशाकुन्तलम्–5/पृ. 321
[112] अभिज्ञानशाकुन्तलम्–7/21
[113] अभिज्ञानशाकुन्तलम्–7/पृ. 497
[114] अभिज्ञानशाकुन्तलम्–7/पृ. 497
[115] अभिज्ञानशाकुन्तलम्–7/ पृ. 499
[116] अभिज्ञानशाकुन्तलम्–4/7
[117] अभिज्ञानशाकुन्तलम्–4/14
[118] अभिज्ञानशाकुन्तलम्–4/पृ. 268
[119] अभिज्ञानशाकुन्तलम्–4/पृ. 274
[120] अभिज्ञानशाकुन्तलम्–4/पृ. 231
[121] अभिज्ञानशाकुन्तलम्–4/पृ. 233

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

**उर्वशी**

विक्रमोर्वशीयम् नाटकस्य नायिका उर्वशी वर्तते। सा देवयोनौ समुत्पना जाता। अप्सरा सति सा अप्रतिमा वर्तते। अनिन्द्यरूपराशिसम्पन्नां उर्वशीं विलोक्य तद्विषये विचिन्त्य राजा एवं कथयति- उर्वश्याः सृष्टिरचनाकार्ये रमणीयदीधतिः शशिविधाता किम् आसीत्? वा श्रृङ्गार एव एको रसः यस्य तादृशः कामदेवः स्वयं प्रजापतिः आसीत् किम्? अथवा पुष्पोत्पत्तिप्रसिद्धचैत्रख्यो मासो वसन्तः अस्याः शरीररचना विधौ स्रष्टा आसीत् किम्? अथवा वेदनामभ्यासेन अन्य विषयेष्वनभिज्ञः विषयेष्वनासक्तमनः उपशमित कुतूहलको वृद्धो मुनिः कस्मात् इदं रूप राशिं रचयितुं सर्मर्थो भवेत् अर्थात् न केन् प्रकारेण समर्थः इति आशयः।[122]

शापवशात् सा मृत्युलोकं प्राप्ता। कवि कालिदासः अप्सरसं उर्वशीं मनुष्यरूपेण चित्रितवान्। तस्यां देवयोनेः स्वभावः सुरक्षिता वर्तते। भयाक्रान्ता उर्वशी वर्तते। पुरुरवा उर्वश्याः साक्षात्कारं तदा करोति यदा सा भयाक्रान्ता नेत्रं निमील्य रथे मूर्च्छितावस्थायां तिष्ठति। दिव्यशक्तया युक्ता उर्वशी राज्ञः मनसस्थितिं जानाति-

**'तेन हि प्रभावेण जानीहि कुत्रसमे हृदयचोरः।**[123]

उर्वशी सुराङ्गना वर्तते। तस्याः लज्जा विनयभावः स्तः। राज्ञः प्रति तस्याः प्रेमानुरागः भवति। तं मुहूर्मुहूर्द्रष्टुं वाञ्छति। किन्तु लोकलज्जावशात् सा तथा न करोति। अतः रहस्यमयरूपेण प्रियतमं पश्यति। उर्वशी लताया शाखासु वैजयन्तीमालायाः लग्नत्वात् सा पुरुरवसं पश्यति- **अहो लताविटपे एषा एकावली वैजयन्तिका मे लग्ना सव्याजमुपसृत्य राजानं पश्यति** [124]

नाट्यशास्त्रनुसारं सा साधारणा, प्रगल्भा नायिका वर्तते। अभिसारिकारूपेण अपि सा चित्रिता वर्तते।[125] विद्याधरकन्यां प्रति पुरुरवसं निरन्तरं दृष्ट्वा सा क्रोधाविष्टा भवति। तदानीं तस्याः ईर्ष्याभावः दृश्यते। स्त्रियाः प्रियतमस्य सम्पूर्णप्रेमभावं प्राप्तुम् इच्छति। सा लेशमात्रं न वाञ्छति यत् तस्याः प्रियतमः परस्त्रीं प्रति आकर्षितो भवेत्। राजा सुखेन तिष्ठतु इति कृत्वा नवजातं शिशुं पञ्चदशवर्षाणि यावत् दूरे निक्षिपति। उर्वश्यां स्त्रियोचितसपत्निजन्या ईर्ष्या न अस्ति। सा महाराज्ञीं औशीनरीं दृष्ट्वा वदति- **स्थाने इयमपि देवी शब्देनोचार्यते। नहि किमपि परिहीयते शचीतः ओजस्वितया।**[126] उर्वश्याः अस्य वचनं श्रुत्वा चित्रलेखा कथयति- **साधु असूयापराङ्मुखं मन्त्रितम्।**[127] उर्वशी ग्रन्थान्ते औशीनरीं प्रति आदरसम्मानभावं करोति। स्वपुत्रं आयुषं कथयति यत्- **ज्येष्ठमातरमभिवन्दस्व।**[128]

नाटकस्य कथानके इदं स्पष्टं न भवति यत् पुरुरवसः उर्वश्याश्च विवाहः अभूत न वा? किन्तु नारदः उर्वशीं राजानं च आशीर्वादरूपेण अकथयत्- **अविरहतौ दम्पत्ती भूयास्ताम्** ।[129] इन्द्रसन्देशरूपेण राजानं प्राह- उर्वशी आयुपर्यन्तं तव धर्मपत्नी भवतु इति- **इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्विति** ।[130] अनेन आशीर्वचनेन द्वयोः विवाहस्य सङ्केतः भवति।

[122] विक्रमोर्वशीयम्- 1/10
[123] विक्रमोर्वशीयम्-3/पृ. 215
[124] विक्रमोर्वशीयम्-1/पृ. 130
[125] विक्रमोर्वशीयम्-3/पृ. 214
[126] विक्रमोर्वशीयम्-3/पृ. 223
[127] विक्रमोर्वशीयम्-3/पृ. 223
[128] विक्रमोर्वशीयम्-5/पृ. 366
[129] विक्रमोर्वशीयम्-5/पृ. 361
[130] विक्रमोर्वशीयम्-5/पृ. 361

Since 2010
ISSN- 0976-8645
UGC RN-41039

**मालविका**

मालविकाग्निमित्रम् नाटकस्य नायिका मालविका वर्तते। मुग्धानायिकायाः लक्षणं तस्यां वर्तते। सा नवयौवना भवति। कामविकारस्य उन्मेषणं तस्यां भवति। सा रतिक्रीडामपि स्वच्छन्देन रूपेण न करोति। सा एका प्रेमिका लज्जाशीला युवती भवति। अत्यन्तसौन्दर्यशीला सा वर्तते। राजा तां दृष्ट्वा अनायासेन आकर्षितो भवति-

**अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता।**
**परिकल्पितो विधात्रा वाणः कामस्य विषदिग्धः।।**[131]

मालविका स्वभावतः सरला कन्या वर्तते। छल-कपटरहिता सरलस्वभावा पवित्रम् आचरणं करोति। सा नृत्ये निपुणा वर्तते। गुरुगणदासः तस्याः विलक्षणप्रतिभायाः प्रशंसा करोति-

**पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातु।**
**जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य।।**[132]

मालविका स्वभावेन धैर्यशीला सन्तोषीप्रकृतिका वर्तते। एका राजकुमारी भूत्वापि अनाथवत् राजपरिवारे निवसति। सा विपत्तौ दैवाघातं धैर्येण सहते। सा हृदयेन कोमला स्नेहशीला च वर्तते। वकुलावलिका यदा तस्याः पादौ महावरलेपं कर्तुं वाञ्छति। तदा सा कथयति- सखिक्षम्यताम् इति उक्त्वा स्वकीयं पादं ददाति। सा राज्ञी द्वयात् भयभीता भवति- **देवी भयादात्मनो प्रियं कर्तुं न पारयामि।**[133] राज्ञीं चिन्तयित्वा सा भयाक्रान्ता भवति- सखि! देवीं चिन्तयित्वा वेपते मे हृदयम्। सा कोमलस्वभाववशात् शीघ्रमेव भयातुरा भवति। **लुण्ठकानां संघर्षवर्णनमात्रेण सा विभ्यति।**[134] सा भयाक्रान्ता भवति। सा निष्पापा वर्तते। विदूषकमुपरि यदा वक्राकारः काष्ठदण्डः पतति तदा सा सर्प सर्प इति उक्त्वा क्रन्दति। यदा राजा तस्याः समीपं गच्छति। मालविका स्त्रीस्वाभावानुसारं निषेधयति- **भर्ता मा तावत् सहसा निष्काम। सर्प इति भणति।**[135] मालविकां राजानं स्निह्यति। तस्याः भ्राता अकथयत्- यत् राज्ञे एतां समर्पय इति। वस्तुतः प्रेम्णा इयमेव पवित्रता वर्तते। मालविका स्वगतभाषणे अपि दुःखोद्गारं न प्रकटयति। कौशिक्याः विषये अपि एवमेव वर्तते। कालिदासेन तस्याः जीवनस्य रहस्यविषयकं गोपनीयं सुस्थिरं निष्ठितं। वस्तुतः मालविका स्वभावगतया धैर्यशीला, प्रेमातुरा, भयस्य जननी वर्तते।

**यक्षिणी**

कालिदासस्य खण्डकाव्यस्य मेघदूतस्य नायिका यक्षिणी वर्तते। सा विरहिणी वर्तते। उत्तरमेघे तस्याः गुणवर्णनं कालिदासेन कृतम्। पूर्वमेघे यक्षिण्याः समीपं प्राप्तुं मार्ग वर्णनं वर्तते। उत्तरमेघे विरहिण्याः यक्षिण्याः स्वभावस्य चरित्रस्य च सुन्दरं वर्णनं कालिदासः कृतवान्। यक्षिणी स्वभावतः कोमलहृदया वर्तते। सा प्रकृतिं स्नह्यति वृक्ष-पशुपक्षीणाम्, सरोवर, पर्वत-मेघप्रभृतिनाम् कृते असाधारणः अनुरागः वर्तते। भवनद्वारे कल्पवृक्षः तस्याः कृते पुत्रवत् वर्तते। कवेः लिखति-

तत्रगार धनपतिगृहानुत्तरेणास्मदीयम्
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन्।
यस्योपान्ते कृतकतनयः कान्तयावर्धितो मे
हस्तप्राप्यस्तवकनमितो वालमन्दारवृक्षः।।[136]

[131] मालविकाग्निमित्रम्-2/13
[132] मालविकाग्निमित्रम्-1/6
[133] मालविकाग्निमित्रम्- 4/पृ. 160
[134] मालविकाग्निमित्रम्- 5/पृ. 201
[135] मालविकाग्निमित्रम्- 4/पृ. 166
[136] मेघदूतम्, उत्तरमेघ- 15वां श्लोक

Since 2010
ISSN- 0976-8645
UGC RN-41039

तस्याः भवनस्य समीपे माधवीलता-अशोकवृक्षः मौलसिरीप्रभृतिवृक्षाः सन्ति। अतः प्राकृतिक सामीप्यं तस्याः स्वभाविकरूपेण वर्तते। यक्षिणी ललितकलासु अनुरागं करोति। सा पतिव्रता नारी वर्तते। प्रकृत्याः सह उदारहृदया वर्तते। विरहकाले सा सर्वदा पतिं स्मरति। कालिदासः तस्याः विषये लिखति- **आलोके ते निपतति पुरा सा बलिव्याकुला वा मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती।**[137]

यक्षिणी सौन्दर्यपरिपूर्णा वर्तते। वपुषा सा कृशा वर्तते। बिम्बफलसदृशः तस्याः ओष्ठं वर्तते हरिणीवत् तस्यः नेत्रम् अस्ति।[138] प्रियवियोगे सा कृशा दृश्यते। क्षणमपि सा मनोविनोदं न करोति **भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती।**[139] मिलनस्य शेषावधिं गणयितुं- **विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।**[140] दिवसे तस्याः समयः गृहकार्ये व्यतीयते। किन्तु रात्रौ तस्याः समयः विचित्रः भवति- **सव्यापारा महनि न तथा पीड्येद् विप्रयोगः शङ्करात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।**[141] स्वप्ने सा मिलनस्य उत्कण्ठां करोति। निद्राभावे सा कोमल शरीरं शय्यां पातयति-

**निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं**
**शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।**
**मत्सम्भोगः कथमुपनयेत् स्वप्नजोऽपीतिनिद्रा-**
**माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम्।।**[142]

एवं प्रकारेण कविना कालिदासेन यक्षिण्याः विरहदशा वर्णनं कृतम्। तस्याः स्नेहः उदात्तः आसीत्। यक्षस्य प्रेम्णि तस्यां उदात्तता आसीत्। यक्षिण्यां स्वभावता लोकलज्जा मर्यादा च आसीत्। स्त्रियोचितस्वाभाविकपति मिलनोत्कण्ठा वर्तते। यक्षिण्यां विरहे स्वाभाविक गम्भीरता। अनन्यप्रेमनिष्ठा, लज्जाशीलता, सहिष्णुता, कर्त्तव्यपराणता च वर्तते। तस्यां उच्छृङ्खलता न अस्ति। विरहजन्य कृशता वर्तते। सा सत्यसारा कर्त्तव्यपरायणा नारी वर्तते। कालिदासेन यक्षिण्याः चरित्रे आदर्शनारीणां स्वाभाविकगुणाः सन्ति।

<u>पार्वती</u>

कुमारसम्भवमहाकाव्यस्य नायिका पार्वती महादेवस्य अर्द्धाङ्गिनी वर्तते। शुभलक्षणा पार्वती शिवस्य प्राणप्रिया वर्तते। पार्वत्याः व्यक्तित्वे करुणायाः, त्यागस्य, तपस्यायाः औदार्यस्य सेवायाः सहिष्णुतायाः समन्वयः वर्तते। कालिदासः पार्वत्याः बाल्यावस्थायाः वर्णने बालिकानां स्वभावगतचिन्तनस्य वर्णनं कृतवान्। बाल्यावस्थायां पार्वती गङ्गायाः तटे सखीभिः वेदी निर्माणं करोति स्म। यदा-कदा कृत्रिमपुत्रकानां रचनां करोति स्म-

**मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च।**
**रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाले।**[143]

बाल्यावस्थायां पार्वत्याः क्रीडारुचि कालिदासेन चर्चिता। पार्वती रूपसौन्दर्यस्य साकार प्रतिमा आसीत्। शीलगुणाः तस्याः अङ्गरूपेण आसन-

**उन्मीलितं तूलिकामेव चित्रं सूर्यांशभुर्भिमिवारविन्दम् ।**
**वभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन।।**[144]

पार्वती स्वाभावेन लज्जाशीला, विनयवती सुकुमाररूपा च आसीत्।

137 मेघदूतम्, उत्तरमेघ- 25वां श्लोक
138 मेघदूतम्, उत्तरमेघ- 22वां श्लोक।
139 मेघदूतम्, उत्तरमेघ- 26वां श्लोक
140 मेघदूतम्, उत्तरमेघ- 27वां श्लोक
141 मेघदूतम्, उत्तरमेघ- 28वां श्लोक
142 मेघदूतम्, उत्तरमेघ- 28वां श्लोक
143 कुमारसम्भवम् - 1/29
144 कुमारसम्भवम् - 1/32

Since 2010
ISSN- 0976-8645
UGC RN-41039

हिमालयस्य आज्ञया पार्वती महादेवस्य शुश्रूषां करोति। शिवं प्राप्तुं तस्यां निगूढ भावः आसीत्-

**गिरिशमुपचचार प्रत्यहं सा सुकेशी**
**स्वजनकवचनाज्ञा पालनायेशभक्ता।**
**सकल भुवननाथः शङ्करश्चन्द्रमौलि-**
**र्भवतु मम हि भर्ता भावयन्तीति लाभम्।।**[145]

शिवद्वारा भस्मीभूतं कामदेवं दृष्ट्वा पार्वती व्याकुला भयाक्रान्ता च भवति। पार्वत्याः रूप सौन्दर्यं शिवस्य दृष्टिपातं विना अपूर्णं आसीत्। सा हिमालयस्य मनोरथं स्वसौन्दर्यं युक्तशरीरं च निष्फलं मनुते स्म-

**शैलात्मजापि पितुरुच्छिरसोऽभिलाषं**
**व्यर्थं समर्थ्यललितं वपुरात्मनश्च।**
**सख्योः समक्षमिति चाधिकजातलज्जा**
**शून्या जगाम भवनाभिमुखी कथञ्चित्।।**[146]

पार्वती स्वाभावेन स्वाभिमानी धैर्यशालिनी च नारी आसीत्। महादेवद्वारा तिरस्कृता पार्वती हरस्य अर्द्धांधिंनी भवितुं अभिलाषस्य त्यागं न करोति। सा अर्द्धनारीश्वरस्य दृढ संकल्पम कृत्वा तपश्चर्यायां उद्यतः भवति।

पार्वती योगीश्वरं शिवं स्वशारीरिक सौन्दर्येन आकर्षणं कृतवती। सा स्वयत्ने असफला आसीत्। भगवता शिवस्य रोषाग्निना कामदेवः भस्मीभूता इति ज्ञात्वा सा चिन्तयति यत् शिवं प्रति स्नेहभावं प्राप्तुं रूपसौन्दर्यं व्यर्थं वर्तते। **निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता।**[147] पार्वती रूपसौन्दर्यं उपेक्षाभावेन दृष्ट्वा शील-सौन्दर्यं चरित्रं भाव सौन्दर्यं च प्राप्तुं घोरतपः चकार। यस्मात् योगीश्वरस्य उदात्तप्रेमभावं प्राप्नुयात्-

**इयेष सा कर्तुमवन्ध्यरूपतां, समाधिमास्थाय तपोभिरात्मनः।**
**अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः।।** [148]

तपस्वी जीवनस्य समस्त व्रतनियमानां निर्वहने श्रेष्ठां पार्वतीं दर्शनोत्सुका वृद्धऋषिगणः आगच्छन्ति स्म-

**कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।**
**दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते।।**[149]

स्वाभिष्टसिद्धझे पार्वती मत्युञ्जयं महादेवं अष्टमूर्तिरूपं[150] वन्दनां कृत्वा कठोरतमम् तपः चकार। सा कठोरतपसा तपस्वीनाम् तपः लज्जितं कृतवती। महादेवा यदा भगवत्याः पार्वत्याः तपोजनितं शीलसौन्दर्यं प्रेमभावं च परिक्षितु पार्वत्याः समीपं उपस्थितो भवति। **अतिथि देवो भव इति** आदर्शेण मण्डिता पार्वती किमर्थं तपः करोति इति शिवः अपृच्छत्। स्वाभावेन लज्जाशीला पार्वती स्वयं न स्पष्टी चकार। अपितु नारीसुलभस्वभाववशात् सखीद्वारा कथयति।[151] ब्रह्मचारीद्वारा शिव विषयक निन्दां श्रुत्वा पार्वत्याः दृढसंकल्पः भङ्गः न अभूत्- **ममात्र भावैकरसं मनःस्थितं न कामवृत्तिर्वचनीयमीक्षते।**[152] पार्वत्याः दृढसङ्कल्पप्रेमभावं च दृष्ट्वा शिवः स्वात्मानं दासरूपेण मनुते-

**अद्य प्रभृत्यवनताङ्गि! तवास्मि दासः**
**क्रीतस्तपोभिरिति वादिनि चन्द्रमोलौ।**
**अह्नाय सा नियमजं क्लममुत्ससर्ज**
**क्लेशः फलेन हि पुनर्नवता विधत्ते।।**[153]

---

[145] कुमारसम्भवम् – 1/60
[146] कुमारसम्भवम् – 3/75
[147] कुमारसम्भवम् – 5/1
[148] कुमारसम्भवम् – 5/2
[149] कुमारसम्भवम् – 5/16
[150] अभिज्ञानशाकुन्तलम् – 1/1
[151] कुमारसम्भवम् – 5/51
[152] कुमारसम्भवम् – 5/82
[153] कुमारसम्भवम् – 5/86

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

पार्वती स्वाभावेन लज्जाशीलतायाः लोकमर्यादायाः व्यवहारिकज्ञानस्य च पावनसङ्गमः वर्तते। सा कठोरतपसा शिवं प्राप्तुं इच्छति तथा मर्यादां मनसिकृत्वा पितुः वचनं पूरयितुं प्रयतते। नार्यः कीर्तिपताकां सा प्रददाति-

**अथ विश्वात्मने गौरी संदिदेश मिथः सखीम्।**
**दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति।।**[154]

पार्वत्याः स्वभावे पति प्रेमभावः धर्मप्रेमभावः पितृप्रेमभावश्च समन्वयरूपेण सन्ति। विवाहोपरान्तं पतिधर्मं सर्वस्वमत्वा लोककल्याणाय प्रतिक्षणं सा तत्परा भवति। वात्सल्य प्रेमभावस्य जननी पार्वती पुत्ररूपं कार्तिकेयं प्राप्य अवर्णनीयं सुखं अनुभवति-

**प्रमोदवाष्पाकुललोचना सा न तं ददर्श क्षणमग्रतोऽपि।**
**परिस्पृशन्ती करकुड्मलेन सुखान्तरं प्राप किमप्यपूर्वम्।।**[155]

वस्तुतः पुत्रदर्शनरूप मङ्गल प्राप्य कस्य मातुः चित्तं तृप्तं न भवति। पार्वत्याः स्वभावगतं वात्सल्यं चराचरजगता कृते अमूल्यं चिन्तनं आसीत्। पार्वती त्यागस्य करुणायाः तपस्यायाः औदार्यस्य पतिप्रेम्णा च अद्भुतः दृश्यं समुपस्थापयति। पार्वत्याः स्वभावगतगुणै कालिदासः स्पष्टरूपेण अवर्णनयत् यत् उदात्तप्रेमरूपसौन्दर्यमात्रेण प्राप्तुं न शक्यते। कालिदासस्य अयं प्रेमभावः दाम्पत्यजीवने सन्तानोत्पतौ च सफला भवति।

## सीता

रघुवंशमहाकाव्यस्य नायिका सीता स्वाभावतः कोमला सौन्दर्यगुणयुक्ता च भवति। पत्युः प्रेमभावः कुटुम्बप्रेमभावः, वात्सल्यभावः करुणायाः संयमस्य सतीत्वस्य धैर्यस्य शीलगुणानाम् च समुच्चयः वर्तते। सीता शब्दः भारतीयसंस्कृतौ पवित्रतायाः सतीत्वस्य च पर्यायरूपेण वर्तते। रामस्य अर्द्धाङ्गिनी सीता रामस्य प्रतिपदं अनुगमनं कृतवती। विवाहानन्तरं कुलवधूरूपेण भार्या धर्मस्य, प्रजाधर्मस्य, च समुचितं पालनं कृतवती। स्वाभावेन अतिकोमला सीता सामान्य नारीगत मनोविकारं न समुपस्थापयति। पिताद्वारा रामस्य वनवासं श्रुत्वा सा व्यथिता न भवति। सा सहर्षं रामस्य अनुगामिनीरूपेण वनवासं स्वीचकार-

स सीतालक्ष्मणसखः सत्याद् गुरुमलोपयन्।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनाः।।[156]

रामम् अनुगन्तुं राजलक्ष्मी इव सीता वन्य फलानि भुक्त्वा पातिव्रतधर्मं स्वीचकार-

रामोऽपि सह वैदेह्या वने वन्येन वर्तयन्।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा।।[157]

वने रावणद्वारा अपहृतायाः सीतायाः स्वाभावे असीमधैर्यस्य साहसस्य प्रतिप्रेम्णा दर्शनं भवति। रावणद्वारा सीतायाः मनः अनुकूलयितुं प्रलोभनं प्रताड़ादि उपचारः क्रियते। पवित्रतायाः सीतायाः उत्साहं रावणः दूरीकर्तुं असमर्थः। अशोकवाटिकायां वन्दिन्याः सीता यातना सहते। परन्तु तस्याः धर्मं प्रति दृढविश्वासः आसीत्। राक्षसयाः तां खादिष्यन्ति इति भीतिवाक्यं श्रुत्वा सीता वदति- **कामं खादत मा सर्वाः न करिष्यामि वोवचः।** अशोकवाटिकायां सीता सदैव श्रीरामस्य स्मरणं कुर्वन्ती आसीत्। हनुमान् श्रीसीतां वाधयुक्तां पश्यति। तदा हनुमान् रामेण प्रदत्तं अङ्गुलीयकम् सीतायै ददौ-

**तस्यै भर्त्तुरभिज्ञानमङ्गुलीयं ददौ कपिः।**
**प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः।।**[158]

---

[154] कुमारसम्भवम् – 6/1
[155] कुमारसम्भवम् – 11/18
[156] रघुवंशम् – 12/9
[157] रघुवंशम् – 12/20

Since 2010
ISSN- 0976-8645
UGC RN-41039

सीतायाः सम्पूर्णं जीवनं संघर्षमयं दीर्घकालीन यात्रयाः समन्वयः वर्तते। लङ्काविजयं कृत्वा किंचिद् समयानन्तरं सा महाराज्ञीपदं प्राप्नोति। किन्तु रामराज्ये सीतायाः लोकापवादरूपः दुष्टग्रहः प्रविशति। सीता स्वाभावतः निश्चला प्रकृत्याः सरला नारी वर्तते। रामद्वारा परित्यक्ता सीता रामाय दोषं न प्रददाति। आकस्मिकवज्रपात इव रामद्वारा परित्यागः सीतायाः कृते कष्टस्य कारणं भवति। सा प्रकृत्याः पृथिव्याः उत्सङ्गे प्राप्तुं इच्छति-

**इक्ष्वाकुवंशप्रभवः कथं त्वां त्यजेदकस्मात्पतिरार्यवृत्तः।**
**इति क्षितिः संशयितेव तस्यै ददौ प्रवेशं जननीन तावत्।।**[159]

बिना अपराधं धर्मपत्नीं निष्कासितां भूत्वाऽपि रामचन्द्रं प्रति जनकतनया अपशब्दप्रयोगं न करोति। सा पुनः पुनः दुर्भाग्यमेव निन्दति-

**न चार्तुरवर्णभार्या निराकरिष्णोर्वृजिनाद्दतेऽपि।**
**आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृति नंनिनिन्द।।**[160]

स्त्रियोचितस्वाभाववशात् सीतायाः मनसि एकः प्रश्नः आसीत्। अकारणपरित्यागस्य कारणं सीता पृच्छति-

**वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम्।**
**मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य।।**[161]

सीताकृते अयं प्रश्नः अनावश्यको न आसीत्। कालिदासेन व्यञ्जनाद्वारा इति शब्दं प्रयुज्य मनःस्थिति स्पष्टीकृता। सीतायाः मनसि दुर्भाग्यवशात् क्षोभः वर्तते। दुःखसागरे निमग्ना सीता पतिकुलस्य मर्यादां न विस्मरति। स्वबालकम् प्रति सा चिन्तिता आसीत्-

**किं दा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हृतजीवतेऽस्मिन्।**
**स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः।।**[162]

सीता विषमपरिस्थितौ कुलस्य मर्यादा विषये चिन्तिता आसीत्। विपत्तिसमये अपि सीता पूर्वजन्मनि कृतं पापमेव अस्य फलं मनुते-

**ममेव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः।**[163]

पतिरामम् प्रति सीतायाः प्रेमभावः क्षीणः न भवति। सीता जन्म जन्मान्तरेष्वपि रामस्य स्नेहं वाञ्छति। परित्यक्ता सीता वाल्मीकि-आश्रमे शरणं प्राप्य लवकुशं च पुत्ररत्नं असूत। सीतायाः विशालहृदये पतिं प्रति अपमानभावः न अभूत्। अन्ततः सम्पूर्णजीवनं सतीत्वस्य पवित्रतायाश्च शुद्धतां प्रमाणयितुं सीता मातुः पृथिव्याः उत्सङ्गे प्राप्तवती। सीतायाः स्वाभावे असीमधैर्यं, मनोबलं च आसीत्। करुणायाः, प्रेम्णा, त्यागस्य, साहसस्य च परिचयं सदैव सीता प्रदत्तवती।

**उपसंहृतिः**

कालिदासस्य रचनासु कविता-वनिता कलाभावयुक्ता वर्तते। कालिदासस्य रचनासु स्त्रीपात्रणां स्वाभावगत-आचारविचाराः, समयानुकूलचेष्टाः, उद्योगाः, कार्यव्यापारस्य, सूक्ष्मनिरीक्षणे तस्यः अनुभूतिः गूढतमः प्रतीयते। कालिदासस्य नारीपात्रस्य स्वाभावे स्वाभिमानस्य, सहनशीलतायाः, शरणगतवत्सलतायाः, कर्त्तव्यपरायणताः, उदारतायाश्च विलक्षण समुच्चयः वर्तते। यतोहि नारीजातेः एतादृशः आदर्शः मङ्गलप्रदः भवति।

158 रघुवंशम् – 12/62
159 रघुवंशम् – 14/55
160 रघुवंशम् – 14/57
161 रघुवंशम् – 14/61
162 रघुवंशम् – 14/65
163 रघुवंशम् – 14/62

Since 2010
ISSN- 0976-8645
UGC RN-41039

## सन्दर्भग्रन्थसूची


- अभिज्ञानशाकुन्तलम् डॉ. हरिदत्तशास्त्री ग्रन्थम् रामबाग, कानपुर 1983
- अभिज्ञानशाकुन्तलम् डॉ.निरूपणविद्यालंकार साहित्यभण्डार मेरठ, 2000
- कालिदास की काव्य चेतना डॉ. राकेशशास्त्री जगदीश संस्कृत पुस्तकालय, जयपुर, 2010
- कालिदास ग्रन्थावली रेवाप्रसादद्विवेदी बनारसहिन्दूविश्वविद्यालय, 1976
- कालिदास परिशीलन प्रो. कैलाशनाथद्विवेदी हंसा प्रकाशन, जयपुर, 2004
- कालिदास साहित्य एवं प्रो. सुषमा कुलश्रेष्ठ ईस्टर्न बुक लिंकर्स दिल्ली 1998
- महाभारतम् वेदव्यास दिल्ली साहित्यसंगम, 1987
- मालतीमाधवम् भवभूमित चौखम्बा संस्कृत सीरीज, वाराणसी, 1971
- मालतीमाधवम् भवभूति चौखम्बा संस्कृत सीरीज, वाराणसी, 1971
- मालविकाग्निमित्र डा. देवनारायणमिश्र साहित्य भण्डार, मरेठ, 1990
- मेघदूतम् डॉ. बाबूराम त्रिपाठी महालक्ष्मीप्रकाशन, आगरा
- रघुवंशम् कालिदास चौखम्बा संस्कृतसंस्थान, वाराणसी, 2006
- विक्रमोर्वशीयम् कालिदास प्रकाशन केन्द्र, सीतापुर रोड, लखनऊ


# महाकवि भर्तृहरि कृत नीतिशतक की प्रासंगिकता[164]


### प्रमुखशब्द

नीतिसाहित्य, नीतिशतक , भर्तृहरि, प्रासंगिक, संस्कृत, साहित्य, मुक्तक, नीति, संदेश, परिस्थितियां, कवि, श्लोक, राजनीति, वर्तमान, लोककल्याण, धन, विद्या, सुभाषित!



### शोधसार

प्राचीन काल से ही कवियों द्वारा रचित साहित्य हमारा ज्ञानवर्धन करने के साथ -साथ समाज को अनेक शिक्षाएं प्रदान करता रहा है क्योंकि साहित्य रोचकता लिए भी होता है ! साहित्य सम्पूर्ण मानव जीवन के लिए लोककल्याणकारी होने के साथ -साथ उन्हें दिशानिर्देश प्रदान कर उन्हें सत्मार्ग की ओर प्रेरित करता है! साहित्य ही मनुष्य के लिए क्या करणीय कार्य है? क्या अकरणीय कार्य है? इसकी शिक्षा भी प्रदान करता है ! जो बात व्यक्ति स्वयं नहीं कह सकता है, उस बात को कवि अपने साहित्य के माध्यम से कह देता है और उसका परिणाम भी शुभ होता हैं ! सदियों पूर्व महाकवि भर्तृहरि ने अपने ग्रन्थ नीतिशतक में जो नीति, रीति, राजनैतिक, सामाजिक ,आर्थिक, बौद्धिक, तात्विक आदि विषयों पर जो ज्ञान हमें प्रदान किया है वह अनेक सदियों पश्चात आज भी प्रासंगिक व उपादेयता लिए हुए है! यदि इस ज्ञान का उपयोग वर्तमान पीढ़ी के लिए यदि दोहराया जाए या इन्हें नीतिशतक के द्वारा ज्ञान प्रदान किया जाए तो यह ग्रन्थ नयी पीढ़ी के नैतिक व बौद्धिक ज्ञान की वृद्धि करने में आज भी उतना ही सक्षम है जितना की नीतिसाहित्य ! यही ज्ञात कराना इस आलेख का प्रमुख उद्देश्य



[164] डॉ.कुसुमलता टेलर, सहायक आचार्य ,संस्कृत विभाग जनार्दन राय नागर राजस्थान विद्यापीठ (डीम्ड टू बी) विश्वविद्यालय, उदयपुर

Since 2010
ISSN- 0976-8645
UGC RN-41039

एवं ध्येय है ! इस प्रकार कहा जा सकता है कि महाकवि भर्तृहरि रचित नीतिशतक अन्य नीति साहित्य के ग्रन्थों के समान आज भी अत्यंत उपयोगी , सार्थक व प्रासंगिक है !

## मूलप्रबन्ध

संस्कृत विश्व की प्राचीन भाषा होने के कारण इसका साहित्य अन्य भाषाओं के साहित्य से अति विशिष्ट और अत्यंत ज्ञानवर्धक है ! संस्कृत साहित्य को विद्वानों ने दो भागों में विभाजित किया है - वैदिक साहित्य एवं लौकिक साहित्य! वैदिक साहित्य के अंतर्गत वेद,ब्राह्मण,आरण्यक एवं उपनिषद् ग्रन्थ आते हैं! लौकिक साहित्य श्रव्य एवं दृश्य नाम से दो प्रकार के हैं ! दृश्य काव्य के अंतर्गत नाटक आते हैं तो श्रव्य काव्य के अंतर्गत गद्य, पद्य एवं चंपू साहित्य परिगणित है!पद्य साहित्य के अंतर्गत महाकाव्य एवं खंडकाव्य (गीतिकाव्य,मुक्तक काव्य )की गणना की जाती है! सर्वप्रथम हम यह जान लें कि मुक्तक काव्य किसे कहते हैं? यथा नाम तथा गुण के आधार पर जिन पद्यों को गाया जा सके वह गीतिकाव्य अथवा मुक्तक काव्य कहलाता है! मानव जीवन के किसी एक ही पक्ष का उद्गम अथवा अंतरात्मा के किसी एक ही पटल का चित्रण जिस काव्य में किया जाता हैं वह ,'गीतिकाव्य ,'अथवा 'मुक्तक' काव्य कहालाता है ।ध्वन्यालोक के लेखक आचार्य आनन्द वर्धन ने मुक्तक काव्य के विषय में कहा कि- **पूर्वापरनिरपेक्षणापी हि येन रसचर्वणा क्रियते तदेव मुक्तकम !** अर्थात् श्लोक संग्रह का प्रत्येक श्लोक स्वयं में पूर्ण होता है तथा जिसे अपनी अभिव्यक्ति और रस -निष्पत्ति के लिए पूर्वापर प्रसंग की आवश्यकता नहीं होती उसे मुक्तक काव्य कहा जाता है! संस्कृत साहित्य जगत में अनेक मुक्तककार हुए हैं! उनमें महाकवि भर्तृहरि का नाम अत्यंत आदर से लिया जाता है! जिन्होंने श्रृंगारशतक, वैराग्यशतक एवं नीतिशतक नाम से तीन शतकों की रचना की ! भर्तृहरि कृत नीतिशतक ने उस काल में इतनी प्रसिद्धि को प्राप्त किया कि कालिदास ने अपने अभिज्ञानशाकुंतलम्, विशाखत्त ने मुद्राराक्षस, अभिनवगुप्त ने ध्वन्यालोक पर टीका, केशवमिश्र ने अलंकारशेखर, रुय्यक रचित अलंकारसर्वस्व, मम्मट ने काव्यप्रकाश , क्षेमेंद्र ने औचित्य विचारचर्चा, कविकण्ठाभरण एवं सुवृतिलक, गोविंद ने काव्यप्रदीप, वाग्भट नेकाव्यानुशासन,अप्पयदीक्षित ने कुवलयानन्द,,धनंजयने दशरूपक, आनंदवर्धनाचार्य ने ध्वन्यालोक आदि के साथ- साथ पंचतंत्र एवं हितोपदेश में भी नीतिशतक के श्लोक प्राप्त होते हैं ! अतः यह कहा जा सकता है कि भर्तृहरि इन सभी से पूर्व में रहे होंगे ! कुछ अंत:साक्ष्यों, बहिसाक्ष्यों व किंवदन्तियो के आधार पर यह कहा औजा सकता है कि इनका समय प्रथम शताब्दी रहा होगा !. . 1

भर्तृहरि ने अपने जीवन काल में जिन काव्यों की रचना की वे निम्न है-

1 वाक्यपदीय 2 वाक्यपदीय टीका 3 श्रृंगारशतक,नीतिशतक एवं वैराग्यशतक 4 महाभाष्यदीपिका 5 मीमांसाभाष्य 6 वेदांतसूत्रवृत्ति 7 शब्दधातु समीक्षा! .2

नीतिशतक जैसा कि नाम से ही जाना जा सकता है कि इस ग्रंथ में नीति से संबंधित श्लोक है अतः सर्वप्रथम हमें यह जान लेना आवश्यक है कि नीति शब्द का अर्थ क्या है ?नीति: .3 (स्त्री) शब्द संस्कृत में नी+क्तिन् से निर्मित हुआ है जिसका अर्थ है -निर्देशन, दिग्दर्शन, ,औचित्य, आचरण, चाल- चलन, व्यवहार, कार्यक्रम, नीतिकौशल, नीतिज्ञता, बुद्धिमत्ता, व्यवहार कुशलता, योजना उपाय, कूटनीति, आचरण, राजनीतिविज्ञान, राजनय, राजनीतिज्ञता, राजनीतिक बुद्धिमता, आचारशास्त्र, आचार, नीतिशास्त्र

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

आचारदर्शन, अवाप्ति, अधिग्रहण, देना, प्रदान करना, प्रस्तुत करना, संबंध और सहार है! शतक शब्द को संस्कृत में "शतकम्" - .4 कहा जाता है जिसका अर्थ है "सौ", "सौ श्लोकों का समूह "! इसलिए नीतिशतकम् का अर्थ हुआ वह ग्रन्थ जिसमें नीति विषयक सौ श्लोको का संग्रह जहाँ हमें प्राप्त होता है वह नीतिशतक कहलाता है!

नीति काव्य का उद्भव विश्व साहित्य के प्राचीनतम ग्रन्थ ऋग्वेद से माना गया है। इसके साथ ही बाह्मण ग्रन्थों , उपनिषदों, रामायण तथा महाभारत में भी नीतिविषयक ज्ञान प्राप्त होता है। नीति साहित्य भारतीय संस्कृति का अनमोल रत्न है जिनमे तत्व ज्ञान, वैराग्य , लोकजीवन , दैनिक व्यवहार में आने वाले अनेक विषयों ,संसार की असारता, आत्मा की अमरता, निष्काम कर्मवाद आदि अनेक विषयों का वर्णन किया गया है! महाकवि भर्तृहरि ने अपने जीवन के विविध पक्षों ,व्यवहारों और प्रवृत्तियों को दृष्टिगत रखते हुए उनकी यथार्थता को नीतिशतक में उजागर किया है! भर्तृहरि ने अपनी लोकयात्रा में प्राप्त जिन अनुभवों को आत्मसात कर जिस अमरकाव्य की रचना की वह काव्य नीतिशतक कहलाया! इस काव्य में कवि ने अपने अलौकिक, व्यवहारिक आत्मिक , व दार्शनिक ज्ञान के भण्डार को अत्यंत ही सरल, सहज, स्वाभाविक एवं सुंदर शब्दों में प्रस्तुत किया! यही कारण है कि सदियों पश्चात् भी आज भी इस अमर काव्य की प्रासंगिकता बनी हुई है!

कविषु कालिदास: उक्ति जैसे प्रसिद्ध है वैसे ही "शतकेषु नीतिशतक: " भी अपनी प्रसिद्धि प्राप्त किए हुए हैं! कवि भर्तृहरि ने अपने प्रसिद्ध नीतिशतक में मानव जीवन के अनेक छोटे-छोटे विषयों जैसे-विद्या,धन,देव,मूर्ख,सुख-दुख,भाग्य,दुर्भाग्य,दुर्जन,सज्जन,स्वाभिमान, नीति , दैनिक जीवनचर्या व लोक व्यवहार में प्रचलित विषयों को लेकर नीतिशतक की रचना की है ! 'कवि क्रांतदृष्टार :'कहलाते हैं क्योंकि वे सदा किसी एक समय विशेष के लिए नहीं लिखते अपितु वे तीनों कालों को दृष्टिगत करके लिखते हैं! यही कारण है कि भर्तृहरि कृत नीतिशतक की उपादेयता ना केवल भर्तृहरि के काल में थी अपितु सदियों पश्चात आज भी प्रासंगिकता लिए हुए हैं! आज भी नीतिशतक हमको दिशानिर्देश करने के साथ-साथ उस ज्ञान को ग्रहण करने की शिक्षा प्रदान करता है ! कवि भर्तृहरि की दृष्टि में सच्चा मानव वही है जो अपने मन में संतोष की अनुभूति करता हो? यही नहीं इस संसार रूपी सागर में सभी रोगों की औषधि विद्यमान है, नहीं है तो भी ,बनाई जा सकती है किंतु मूर्ख व्यक्ति की कोई औषधि नहीं होती ! **सर्वस्यौषमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्!** . 5 कवि ने इस संसार को यह बताया है कि जैसी संगति होती है व्यक्ति वैसा ही होता है और यदि मूर्ख को विद्वानों की संगति में रखा जाए अथवा मूर्खों को विद्वानों से लाभान्वित किया जाए तो इसके परिणाम ओर शुभ हो सकते हैं इस दृष्टि से नीतिशतक आज भी हमारे लिए अत्यधिक उपयोगी हैं क्योंकि हम मुर्ख को विद्वान बनाने में कुछ कदम उठा सकते हैं ! जैसा की नीति शतकार ने कहा है --

**यदा किञ्चिज्ञोऽहं द्विप इव मदान्धः: समभवम्**
**तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मन :!**
**यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं,**
**तदा मूर्खोऽस्मीति ज्वर इव मदो में व्यपगत :!!** 6

मनुष्य जीवन का लक्ष्य पुरुषार्थ चतुष्टय होता है उसी प्रकार कवि भी अपनी रचना में धर्म, अर्थ , काम और मोक्ष का

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

प्रयोग अवश्य करता है ! अन्य कवियों के समान महाकवि भर्तृहरि ने भी अपने काव्य में पुरुषार्थ चतुष्टय का प्रयोग करते हुए सभी धर्मों में श्रेष्ठ जो कि योगियों के लिए भी क्लिष्ट है वह हैं "सेवाधर्म " ! कवि ने अपने नीतिशतक के माध्यम से सभी को बताना चाहा कि हमें सदा सेवा में संलग्न रहते हुए कभी भी न्याय मार्ग का परित्याग नहीं करना चाहिए ! न्यायात् पथ: प्रविचलन्ति पदं न धीरा:!! 7 भर्तृहरि ने नीतिशतक के माध्यम से इस संसार के हर एक व्यक्ति को यह संदेश दिया है कि सदा अच्छे कर्म करने चाहिए क्योंकि हमारे द्वारा किये गए सत्कर्म संचित रहते हैं! जीवन में कितनी भी विघ्न बाधाएं आए हमें घबराना नहीं चाहिए अपितु कार्य को समाप्त करके ही विश्राम लेना चाहिए

**प्रारभ्यते न खलु विघ्नभयेन नीचै:**
**प्रारभ्य विघ्नविहता विरमन्ति मध्या :!**
**विघ्नैर्पुनः पुनरपि प्रतिहन्यमाना:**
**प्रारभ्य चोत्तमजना:न परित्यजन्ति!!** 8

एक स्थान पर कवि भर्तृहरि ने अपने ज्ञान के माध्यम से हम सभी को यह भी बताया कि संसार में उसी का जन्म लेना सार्थक है जो अपने विशेष कार्यों से पूरे वंश को उन्नति की ओर ले जाए -

**परिवर्तिनि संसारे मृत:को वा न जायते**
**स जातो येन जातेन वंश:संमुन्नतिम्!!**9

संसार में सर्वत्र धन की महिमा है और इस बात से कवि भर्तृहरि भी विदीत थे अत: उन्होंने ने भी धन की उपादेयता बताते हुए कहा कि सभी को जीवन में अर्जित किए हुए धन का उपभोग करना चाहिए ,सामर्थ्य के अनुसार दान भी देना चाहिए और यदि कोई व्यक्ति अपने थन का न तो स्वयं उपभोग करता है और न दान देता है तो धन स्वयं ही नष्ट हो जाता है अत: हम दीन हो या लक्ष्मीपति हमें अपने जीवन में दान अवश्य करना चाहिए नहीं तो हमारे धन की तृतीय गति होती है

**दानं भोगो नाशतिस्रो गतयोर्भवन्ति वित्तस्य !**
**यो ना ददाति न भुङ्क्ते च तस्य तृतीय गतिर्भवति!!** 10

संसार में सर्वत्र धन की महिमा से सभी अवगत हैं कवि भृतहरि ने भी नीतिशतक में धन का महत्व बताते हुए कहा है कि -

**सर्वे गुणा: कांचनम् आश्रयन्ति !** 11

अतः हमें उचित तरीके से धन अर्जित कर उसका उपभोग करना चाहिए और उचित उपयोग भी करना चाहिए! साहित्य समाज का दर्पण होता है और कवि साहित्य के माध्यम से हमें जीवन की वास्तविकता से अवगत भी कराते हैं नीतिशतक में एक स्थान पर हम सभी को कवि भर्तृहरि ने अपने मुक्तक काव्य के माध्यम से एक संदेश यह भी देना चाहा है कि जो बोलता है उसका सामान बिकता है अतः वाणी का बड़ा ही महत्व है ! आचार्य भर्तृहरि ने वाणी का महत्व बताते हुए कहा है कि सभी आभूषण क्षीण होते हैं लेकिन वाणी रूपी आभूषण सदा बना रहता है अत: वाणी ही मनुष्यों का सर्वोत्तम आभूषण है

**क्षीयंते खलु भूषणानि सत्तमं वाग्भूषणम् !** 12

भर्तृहरि के इस ग्रंथ की व्यापकता, महत्ता एवं उपादेयता का सहज अनुमान किया जा सकता है कि जिस प्रकार माता-पिता , गुरुजन आदि सदा ही हमें व्यवहारिक ज्ञान प्रदान करते हैं हमें अपने कल्याण के मार्ग की ओर अग्रसर करते हैं ,वैसे ही आचार्य भर्तृहरि ने भी नीतिशतक के माध्यम से बताया है कि हमें स्वाभिमानी बनना चाहिए और स्वाभिमानी व्यक्ति को किसी भी परिस्थिति में अपने स्वाभिमान का परित्याग नहीं

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

करना चाहिए ! 13 इस संसार में मनुष्य को श्रेष्ठ व सदाचार युक्त कर्म चाहिए ! 'शीलं परं भूषणम् '14 !

व्यक्ति को धीरता पूर्वक कार्य करते रहना चाहिए हमारी उन्नति व अवनति का मार्ग हमारे भाग्य पर निर्भर होता है अतः हमें भाग्य के भरोसे न रहकर सदा कर्म करते रहना चाहिए! जीवन में समय एक सा नहीं रहता परिस्थितियां भी बदलती रहती है अतः हमें विपरीत परिस्थितियां आने पर घबराना नहीं चाहिए क्योंकि विपत्तियां सभी पर आती है चाहे वह चन्द्रमा और सूर्य ही हो!

**शशि -दिवाकरयोर्ग्रहपीडनं**
**गजभुजङ्गमयोरपि बंधनम्**
**मतिमतां च विलोक्य दरिद्रतां**
**विधिरहो !बलवानिति में मति:!!** 15

मनुष्य को सदैव आलस्य त्यागकर कर्म करने चाहिए क्योंकि आलस्य मनुष्य का परम शत्रु है

"आलस्य हि मनुष्याणां शरीरस्थो महान् रिपु:! 16

हमें सदा कर्म करते रहना चाहिए हमें अपने कार्य सामर्थ्य के अनुसार करने चाहिए किंतु तीव्रता पूर्वक नहीं करने चाहिए क्योंकि तीव्रता द्वारा किया गया कार्य और उसके परिणाम कांटे के समान मृत्यु पर्यंत हृदय को जलाने वाला होता है !

**गुणवदगुणवद्वा कुर्वता कार्यजातं परिणतिरवधार्या यत्नत: पंडितेन !**
**अतिरभस कृतानां कर्मणामाविपत्ते:**
**भवति हर्दयदाही शल्यतुल्योविपाक:!!** 17

इस संसार में कहा जाता है कि व्यक्ति सुंदर शरीर अपने पूर्व कर्मों के अनुसार प्राप्त करता है और कई लोग सुंदर शरीर प्राप्त न करने पर अपने आप को कुरुप समझते हैं, अपनी कुरूपता को दूर करने हेतु लेप आदि लगाते हैं तो कुछ लोग आभूषण आदि से भी अपने शरीर की शोभा बढ़ाते हैं किंतु भर्तृहरि ने नीतिशतक में अपने हाथ आदि की शोभा परोपकार से मानते हैं

**श्रोत श्रुतेनैव न कुण्डलेन**
**दानेन पाणिर्न तू कङ्कणेन !**
**विभाती काय: करुणा पराणामं**
**परोपकारैर्न तू चंदनेन !!**18

भर्तृहरि ने अपने नीतिशतक के माध्यम से यह भी बताना चाहा कि मनुष्य को यह जीवन बार-बार प्राप्त नहीं होता! यदि आपने मनुष्य जीवन को प्राप्त किया है तो इस जीवन में साहित्य, संगीत और कला की शिक्षा अवश्य प्राप्त करें नहीं तो आप का जीवन पशु के समान ही होगा!

**साहित्य -संगीत कला विहीन:**
**साक्षात्पशु:पुच्छ विषाण हीन:**
**तृणं न खादनन्ति जीवमान:**
**तद् भागधेयं परमं पशूनाम्!!** 19

कवि भर्तृहरि ने अपने ग्रंथ के माध्यम से हमें यह भी शिक्षा दी है कि आजकल विद्या तो सब ग्रहण कर रहे हैं लेकिन विद्या रूपी धन को प्राप्त कर विद्वान् भी ईर्ष्यावान होते जा रहे हैं, विद्वानों की आपसी ईर्ष्या के कारण वे आपस में एक दूसरे के सुभाषित वचन सुनते नहीं हैं, बताते नहीं है जिसके कारण विशिष्ट ज्ञान आमजन तक नहीं पहुंच पाता!

**बोद्धारो मत्सरग्रस्ता प्रभव: स्मयदूषिता:!**
**अबोधोपहता श्चान्येन्य जीर्णमङ्गे सुभाषितम्!!** 20

आज संसार की यही वास्तविकता है लोग एक दूसरे से आगे न बढ़ जाए इसलिए अपने ज्ञान को एक दूसरे से छिपाते

Since 2010
ISSN- 0976-8645
UGC RN-41039

हैं! ज्ञान वही सामने आता है जिसमें उनकी वाहवाही हो! अन्य ज्ञान तो विद्वानों के पास ही रह जाता है अत: नीतिशतक की प्रासंगिकता आज तक इसीलिए कायम है!

कवि भर्तृहरि ने सभी को सज्जन बनने की शिक्षा प्रदान करते हैं!

**विपदि धैर्यमथाभ्युदय क्षमा**
**सदसि वाक्पटुता युधि विक्रम:!**
**यशसि चाभिरुचि व्यर्सनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम् ! !** 21

इसी तरह दुर्जन लोगों के अवगुणों को बताते हुए कवि ने कहा है कि

**अकरूणत्वमकारणविग्रह :**
**परथने परयोषिति स्पृहा!**
**सूजनबंधुजनेष्वसहिष्णुता**
**प्रकृतिसिद्धमिदं हि दुरात्मनाम् !!**22

भर्तृहरि ने अपने जीवन में अनेक रिश्तों को जिया है इसी कारण नीतिशतक में रिश्तो की महत्ता को उजागर करते हुए हुए कहते हैं कि मनुष्य अपने जीवन में ना जाने कितने रिश्ते को निभाता है किंतु वास्तविक रूप में जो पुण्य करते हैं वही इस संसार में सच्चे अर्थों में रिश्ते निभा सकते हैं

**य: प्रीणयेत्सुचरिते प्रितरं स पुत्रों**
**यद्भतुरेव हितमिच्छति तत् कलत्रम्!**
**तन्मित्रमापदि सुखे च समक्रियं य**
**देतत्त्रयं जगति पुण्यकृतो लभन्ते!!** 23

नीतिशतक के श्लोकों की प्रासंगिकता वर्तमान में और बढ़ गई है क्योंकि इसमें हमे देव अथवा, भाग्य , नीति, चिंता ,मूर्ख, सज्जन ,कटुवचन आदि अनेक विषयों पर श्लोक मिलते हैं जो हमें सदा सुपथ की ओर अग्रसर करते हैं! हम सभी के अनेक मित्र होते हैं किंतु सच्चा मित्र वही होता है जो कि-

**पापान्निवारयति योजयते हिताय**
**गुह्यं निगूहतिप गुणानप्रकटीकरोति!**
**आपद्गतं च न जहाति ददाति काले**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्त:!!** 24

कवि भर्तृहरि ने अपने नीतिशतक में राजनीति का भी बड़ा ही अच्छा वर्णन किया है और उन्होंने राजनीति को ' 'वाराङ्गना 'के समान आचरण करने वाली बताया!

**सत्यानृता च पुरुषा प्रियवादिनी च**
**हिंस्त्रा दयालुरपि चार्थपरा वदान्या!**
**नित्यव्यया प्रचुरनित्यधनागमा च**
**वाराङ्गनेव नृपनीतिरनेकरूपा !!**25

निष्कर्षतः कहा जा सकता है कि नीतिशतक में वर्णित विषयों व श्लोकों का ध्यान से अध्ययन किया जाए तो ये श्लोक न केवल एक काल के लिए ही रचे गये अपितु ये सार्वकालिक है! ये किसी लिंग विशेष अथवा व्यक्ति विशेष के लिए नहीं हैं अपितु सभी व्यक्ति के लिए, सभी पीढ़ियों के लिए हैं! इस ग्रंथ की शिक्षा कोई भी कभी भी और कहीं पर भी प्राप्त कर सकता है! इसका अध्ययन करने पर ही हमें ज्ञात होगा कि इसके श्लोक ना केवल हमारे लिए अपितु सभी के लिए रोचक व ज्ञानवर्धक है! यह ग्रंथ हमारे कर्तव्यका मार्ग प्रशस्त करने के साथ-साथ हमें सदाचरण करने व बुद्धिमत्ता पूर्ण कार्य करने की प्रेरणा भी प्रदान करते हैं! यह ग्रंथ हमें राजनीति व नीतिशास्त्र की शिक्षा भी प्रदान करता है! किंबहुना? अतः केवल यही कहा जा सकता है कि भर्तृहरि के नीतिशतक की प्रासंगिकता आज भी है!

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

## सन्दर्भग्रन्थसूची

1, भर्तृहरि, नीतिशतकम्, पृष्ठ 10, व्याख्या .डॉ. गंगाधर भट्ट एवं डॉ विनोद दीक्षित, जयपुर, अजमेरा बुक कंपनी, 1994

2, वही, पृष्ठ 11,

3, वामन शिवराम , आप्टे, संस्कृत हिंदी शब्द कोश पृष्ठ 500, न्यू भारतीय बुट कंपनी दिल्ली भारत, 2000 वर्ष

4, वही, पृष्ठ 1000

5, भर्तृहरि , नीतिशतकम् , श्लोक11 पृष्ठ 19, व्याख्या डॉ .बाबूलाल शर्मा डॉ यशवंत कुमार जोशी, उदयपुर, अरावली प्रकाशन अरावली प्रकाशन अंबा माता योजना , प्रथम संस्करण 1999

6, भर्तृहरि, नीतिशतकम्, श्लोक 8 पृष्ठ 38, डॉ . गंगाधर भट्ट डॉ विनोद दीक्षित , जयपुर, अजमेरा बुक कंपनी, 1994

7, वही, श्लोक 75 पृष्ठ 102

8, वही, श्लोक 73 पृष्ठ 100

9, वही, श्लोक 25 पृष्ठ 53

10, वही, श्लोक 35 पृष्ठ 62

11, वही, श्लोक 33 पृष्ठ 60

12, वही, श्लोक 16 पृष्ठ 45

13, वहीं, श्लोक81, पृष्ठ108

14, वही, श्लोक 81 पृष्ठ 108

15, वही, श्लोक 86 पृष्ठ 114

16, भर्तृहरि , नीतिशतकम्
श्लोक 87 पृष्ठ 137, डॉ. बाबूलाल शर्मा डॉ यशवंत जोशी, उदयपुर, अरावली प्रकाशन अंबा माता योजना, 1999

17, वही, श्लोक100 पृष्ठ 157

18, भर्तृहरि, नीतिशतकम् , श्लोक 63 पृष्ठ 90, डॉ गंगाधर भट्ट डॉ विनोद दीक्षित, जयपुर, अजमेरा बुक कंपनी, 1994

19, भर्तृहरि, नीतिशतकम्, श्लोक12 पृष्ठ21, डॉ. बाबूलाल शर्मा डॉ यशवंत जोशी, उदयपुर, अरावली प्रकाशन अंबा माता योजना, 1999

20, वही, श्लोक 3 पृष्ठ 3

21, भर्तृहरि, नीतिशतकम्, श्लोक53 पृष्ठ 79, डॉ. गंगाधर भट्ट डॉ .विनोद दीक्षित , जयपुर, अजमेरा बुक कंपनी, 1994

22, वहीं, श्लोक42 पृष्ठ69

23, वहीं, श्लोक60 पृष्ठ 86

24, वहीं, श्लोक 66 पृष्ठ 92

25, वहीं, श्लोक 39 पृष्ठ 66

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

# Awareness of Air Pollution in Vedic Literature[165]

## Keywords

Air Pollution, Ved, Environment, Vedic Literature, Global Warming.

## Abstract

Till 21st century, human being has polluted the whole environment. Various calamities occur on nature due to greedy nature of human being which is harmful to human race itself. Hence, to think about environment has become an inevitable thing. With prime concern to this thought, the scientists all over the world are putting efforts to protect human beings and environment. Environment is related to human life therefore, environment education has become important today.

**4.1. A Glance of Odia Arurvedic Palm Leaf Manuscripts of ASJT-** This repository exhibits a giant collection of 17000 paper manuscripts, 2465 palm leaf manuscripts (1705 Odia MSS + 760 South Indian MSS), 50,000 books on various subjects like Philosophy, Logic, Grammar, Astrology, Music, Drawing, Literature, Dictionary etc. and some historic monuments suitable for museums.

Here the bundles of Odia manuscripts are 1705, but the individual title goes far beyond this number. Sometimes in one bundle we find so many titles. In ASJT we see161 Odia texts related to Ayurveda in Palm Leaf MSS forms. Amongst them we find 33 Ayurveda titles.

Though major Ayurvedic MSS of this repository are unnamed, still we find the names of 19 ifferent Ayurvedic text authors in ASJT's Odia Ayurvedic Palm Leaf MSS collection. In this collection we find the names of 22 scribes. They are as follows-

**Culmination** – If we will be able to publish some of the valuable medical manuscripts of the said organisation in book form with critical edition, then it will serve the mankind in numerous ways, especially in the Corona pandemic situation.

## End Notes


1. Sarma. K.V. (Author), Edited by Dash. Siniruddha (2007). *Manuscripts of India* (Article), (Book) New Lights on Manuscriptology, Chennai, page-1(pp. 1-17), Sree Sarada Education Society Research Centre.
2. Prasad. J.S.R. (2016). *An introduction to Manuscriptology*. (Online), Retrieved Sep. 29, 2016 from In slideshare: https://www.slideshare.net/JSRAPrasad/introduction-to-manuscriptology
3. Collins. Harper. (2017) *Collins English Dictionary* (Online), Retrieved Thursday 02 November 2017 from https://en.wikipedia.org/wiki/Collins_English_Dictionary: https://www.collinsdictionary.com/dictionary/english/manuscript.
4. Gwinn. Robert. P. (Vol. IX) (1986) *"Paleography" in the Encyclopedia Britannica*. Alexandria. (p. 78) Micropaedia.
5. Agrawal. Om Prakash. (1984). *Conservation of Manuscripts and Paintings of South-East Asia*, London. (pp. 25-27) Butterworths & Co Ltd.
6. Gangadharan. G.G. (Chief Editor) (2010). *Handbook of Medical Manuscriptology*. Bangalore. (p. 28). IAIM.
7. Sircar. Dinesh Chandra. (1965). *Indian Epigraphy*. Delhi. MLBD.

Since 2010
ISSN- 0976-8645
UGC RN-41039

## Bibliography

1. Agrawal, Om Prakash (1984) - *Conservation of Manuscripts and Paintings of South-East Asia*, London: Butterworths & Co Ltd.
2. Bhowmik, Kalpana (1992). *PÁÆ±ulipi PaÔhana SahÁyikÁ*, Dr., Ahmed Mahmudul Haque of Mowla Brothers, Dhaka, 1st. Published.
3. De Silva, W.H., (1938). *A Catalogue of Palm Leaf Manuscripts in the Library of Colombo Museum*, Colombo, Vol., 1.
4. Gangadharan. G. G. (2010). Chief Editor, *Handbook of Medical Manuscri-ptology*, IAIM, Bangalore,1st. Published.
5. Ojha, Gourishankar Hirachand (1971). BhÁratÍya PrÁcÍna LipimÁlÁ, Munsiram Manoharlal, Newdelhi, 3rd Edition, November.
6. Mishra, Sashibhusan (2014). *Catalogue of Palm Leaf Manuscripts with Basic Manuscriptology,* Acharya Sri Surendrasuriswarji Jain Tatvajnanasala, Ahmedabad.
7. Murthy, R. S. Shivaganesh (1996). *Introduction to Manuscriptology*, Sharada Publishing House, Delhi,1st. Published.8. Sircar, Dinesh Chandra (1965). *Indian Epigraphy*. Delhi. MLBD.

# प्रत्याहारेष्वितां ग्रहणविषये ज्ञापकाः[243]

**प्रमुखशब्दाः**

ज्ञापकम्, विधिः, प्रत्याहारः, अनुनासिकः, रप्रत्याहारः, इत्संज्ञा।

**शोधसारः**

वेदानां सम्यग्ज्ञानाय षडङ्गानां व्याकरणस्य प्रामुख्यं भजते । वहुषु व्याकरणेषु लोकवेदयोः शब्दसाधुत्वविवेचकं शिवप्रसादादधिगतं पाणिनीयं व्याकरणमेव अभ्यर्हितत्वेनाधुनास्माभिरनुमियते । महर्षिणा पाणिनिना स्वकीययाऽद्भुतप्रतिभया सकलशब्दशास्त्रं समुन्मथ्य अष्टसु अध्यायेसु प्रायेण चतुःसहस्रसंख्यकेषु सूत्रेषु अष्टाध्यायीनाम्ना स्वतन्त्रं व्याकरणं प्रणीतम् । पाणिनिना विरचितं सूत्रम् अल्पाक्षरमसन्दिग्धं सारवच्च । अतः तेषां सूत्राणां सम्यगर्थपरिस्फुटनाय भाष्यवृत्त्यादयः प्रसिद्धग्रन्था विरचिताः । पाणिनिव्याकरणे माहेश्वरसूत्रेभ्यः अणादिप्रत्याहाराः कृताः । सर्वदा स्वल्पाक्षरेणासन्दिग्धार्थं प्रकाशाय सूत्रे प्रत्याहाराः समायोजिताः। परन्तु प्रत्याहारमध्ये सर्वेषां वर्णानां प्रयोजनमस्ति न वा। अच्प्रत्याहारेष्वितां ग्रहणं भवति न वा, तस्याग्रहणार्थविषये किमपि विधिरस्ति? अतः तत् केन बोध्यते? यदि प्रत्याहारेषु तेषां ग्रहणं न भवति तर्हि अनुच्चारणमेव कुर्यात् । हल्प्रत्याहारेऽपि टकाराद्यनुबन्धनां ग्रहणविषये निषेधविधिरभावेऽपि किमर्थं न ग्रहणम्? लण्सूत्रस्थोऽकारस्य इत्संज्ञाविषये पाणिनिना किमपि ज्ञापकमस्ति न वा । अस्मिन्विषये आचार्यपाणिनिना कोऽपि विधेरकृतेऽपि पाणिनीयसूत्रेषु पदप्रयोगात् ज्ञापितः। ज्ञापितवचनेन आचार्यस्य सूत्राणां गूढार्थमभिप्सीतार्थं वा बोधितुं शक्यते । तानि

[243] पल्लवी-मालिकः सिधो-कानहो-विरसा विश्वविद्यालयः , पुरुलिया, पश्चिमवङ्गः

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

ज्ञापकवचनानि युक्तियुक्तं न वा? प्रभृतिविषयाणामुपरि विश्लेषणात्मकमध्ययनमस्य शोधप्रबन्धस्य प्रमुखोद्देश्यः ।

## मूलप्रबन्धः

संस्कृतवाङ्मये संस्कृतभाषां शृङ्खलाबद्धकरणाय सूक्ष्मकौशल्या निर्मितं चतुःसहस्रसूत्रनिबद्धं पाणिनीयव्याकरणं सर्वाङ्गपूर्णम् । पाणिनीयव्याकरणं सूक्ष्मवैज्ञानिकपद्धत्या प्रतिनिबद्धम् । वार्तिकसंयोजनेन भाष्यव्याख्यया च पाणिनिव्याकरणं प्रफुल्लितं विकसितञ्च । स्वल्पीयसा कालेन व्याकरणज्ञानप्रदानार्थं पाणिनिव्याकरणमतुलनीयम् । अल्पकथनेन बह्वर्थावबोधोऽस्य सूत्रस्य वैशिष्ठ्यम् । एकमर्थं प्रतिपादनार्थं शब्दवाहुल्याभावात् सूत्रे नास्ति किमपि पदं त्याज्यं व्यर्थं वा । अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा इति न्यायः पाणिनीयव्याकरणे सर्वत्र पालितः । अतः सूत्रे प्रत्याहारेण सर्वत्र शास्त्रीयकार्यं सम्पादितम् । यथासम्भवं लाघवेन कार्यनिर्वाहार्थं प्रयासोऽत्र सदा विहितः । अतः सूत्रे पदानुवर्तनमध्याहारोऽपकर्षादिपद्धतयः यथा परिलक्ष्यन्ते तथा सूत्रस्थितपदात् क्वचित् विधिरपि ज्ञापितः । स्वल्पाक्षरसूत्रेण[244] सदा गम्भीरार्थः प्रकाशितः । सूत्रे विविधपदप्रयोगात् सूत्रशैल्याः सूत्रोपस्थापनरीत्याः कदाचित् विधिः ज्ञाप्यते । लाघवदृष्ट्या सूत्रस्य ज्ञापकविधेः तात्पर्यमतुलनीयम् । शास्त्रीयकार्यनिर्वाहार्थमभीष्टसिद्ध्यर्थं वा सूत्राद् यो विधिः सूत्रार्थमतिरिक्तं सूचयति तज्ज्ञापकम् । अतः केचन नियमाः पाणिनिना स्पष्टरूपेण सूत्रे नोल्लिखिताः, अपि तु सूत्रेषु विविधप्रयोगेण ज्ञापिता परिलक्ष्यन्ते । एवं प्रत्याहारेषु इत्संज्ञकवर्णानां ग्रहणं भवति न वा इति विषये सन्देहा जाता । यतः तस्मिन्विषये कोऽपि विधिः नास्ति । लण्सूत्रस्याकारस्य इत्संज्ञायाः प्रयोजनमस्ति न वा । एतस्मिन्विषये शङ्कानिरसनार्थं विश्लेषणात्मकमध्ययनं सम्यकतया उपस्थाप्यते ।

'अइउण्' इत्यादिचतुर्दशसूत्राणि महेश्वरप्रसादलब्धानि[245] । महेश्वरप्रसादात् पाणिनिना लब्धा, न तु पाणिनिकृतम्[246] । परम्परया अक्षरसमाम्नायसूत्राणि प्राप्यन्ते । अतो वेदवत् अस्य कोऽपि आधुनिको कर्ता नास्ति । माहेश्वरसूत्रस्यानुपूर्वीका श्रुतिरेव । श्रुतिमूलकत्वाद् पाणिनिव्याकरणस्य वेदाङ्गत्वं सिद्धम्[247] । वेदमूलकत्वात् माहेश्वरसूत्राणां नित्यत्वं सिद्धम् । दृष्टादृष्टफललाभार्थं तेषां प्रयोजनमस्ति । अतः सूत्रेषु न कोऽपि वर्णो अनर्थकाः । 'अन्यथाऽङ्गानामपि पारायणे धर्मश्रवणेन तत्र तत्र पाणिनिन्यासप्रत्याख्यानस्याप्यसङ्गतिः स्यात् । तदुक्तम्- **इको यणचि**(पा॰सू॰६/१/७७) इति सूत्रे-'सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् ।'[248] यद्यपि कदाचित् वर्णस्यानर्थकत्वं भाष्ये प्रतिपादितं तन्न निष्प्रयोजनम्[249] । परन्तु अक्षरसमाम्नाये णकाराद्यनुबन्धाः महेश्वरकृता न वा तद्विषये सन्देहा

244 'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रकृतो विदुः॥' - काव्यमीमांसा, २/६

245 'येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥' - पाणिनीयशिक्षा, ५७
'नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥' - माहेश्वरसूत्रस्य बालमनोरमाटीका

246 "अत एव 'मङ्गलार्थं महतः शास्त्रौघस्यादितो वृद्धिशब्दं पठति' इति वक्ष्यति । अन्यकतृकत्वं च सूचितम्" - उद्योतटीका, महाभाष्ये पस्पशाह्निकम्

247 "अत एव 'सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकावत् प्रतिमण्डितो ब्रह्मराशिः' इति भाष्यमुपादायोक्तं भर्तृहरिणा- 'यथैवेदमव्युच्छिन्नं चन्द्रतारकादि, एवमस्याऽक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्ताऽस्त्येवमेव वेदपारम्पर्येण स्मर्यमाण' इति" - 'अइउण्' इति सूत्रस्य लघुशब्देन्दुशेखरः

248 अइउण् इति सूत्रस्य लघुशब्देन्दुशेखरः

249 "किञ्चिद् दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवत्, सर्वथानर्थकं न किञ्चिदिति तदर्थः; वृद्धिसूत्रस्थे 'वर्णेनाप्यनर्थकेन न भवितव्यम्' इति भाष्यग्रन्थेऽनर्थकत्वं बोद्ध्यार्थराहित्यरूपमिति न निष्प्रयोजनत्वरूपानर्थक्येन तत्र-तत्र प्रत्याख्यानपरभाष्यासङ्गतिः" - 'अइउण्' इति सूत्रस्य लघुशब्देन्दुशेखरः

Since 2010
ISSN- 0976-8645
UGC RN-41039

जाताः । यतोऽनुबन्धाः महेश्वरेण कृताः, अतः 'ञमङणनम्' इत्यत्र मकारप्रत्याख्यानपरभाष्यविरोधः । धातुमूलकशब्दशास्त्रे प्रवृत्त्यर्थं अक्षरसमाम्नाये अन्तिमचतुर्दशवर्णाः उपदिष्टाः इति नन्दिकेश्वरमतम्[250] । अपि च 'अनुबन्धकरणार्थश्च वर्णानामुपदेशः'[251] इत्यत्र करणशब्दप्रयोगेन इत्वर्णानां सादित्वं सूचितम् । अतो वर्णानामुपदेशकाले अनुबन्धा न स्थिताः । पाणिन्यादि वैयाकरणानामिष्टसिद्ध्यर्थं परवर्तीकाले तेषां सन्निवेशः कृतः । अत एतेषामादित्वं सञ्जातम् । लाघवेन शास्त्रप्रवृत्त्यर्थं वर्णानामानुपूर्वेण सन्निवेशः क्रियते । तेन इउऋऌ इति यवरल इत्येतेषाञ्च वर्णसमाम्नाये क्रमेण सन्निवेशात् समसंख्योपपत्तौ 'इग्यणः सम्प्रसारणम्'(अष्टाध्यायी, अ०१/१/४५) सूत्रे यथासंख्यमनुदेशः सूत्रस्य प्रवृत्तिर्भवति[252]। पारम्पर्येण शास्त्रप्रवृत्त्यर्थं समाम्नायस्याङ्गत्वं स्वीकार्यम् । वर्णसन्निवेशादेव णादिनामित्संज्ञा प्रवृत्तिः फलम् । तेन प्रत्याहारादिसिद्धिः, ततश्च परम्परया 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'(अ०६/३/१११)इति लोपादिशास्त्रस्य प्रवृत्तिः । अतो न केवलं साक्षाल्लाघवेन शास्त्रप्रवृत्तिः फलम् । अपि तु सर्वत्रैव तेषां प्राधान्यमुपलभ्यते ।

पाणिनीयव्याकरणे स्वल्पप्रयासेन व्याकरणविषयकं ज्ञानप्रदानार्थं आनुपूर्वीभूतवर्णान् मिलित्वा **आदिरन्त्येन सहेता**(अ०१/१/७१) इति सूत्रेण प्रत्याहारसंज्ञा प्रतिपादिता[253]। अत्र 'वृद्धिरादैच्'(अ०१/१/१), 'अदेङ्गुणः'(अ०१/१/२) इत्यादिवत् साक्षात्संज्ञासंज्ञिभावो नास्ति । अतः प्रत्याहारार्थं आद्यन्तवर्णसमुदायमुद्दिश्य अजादिप्रत्याहारसंज्ञा विधीयते । अन्त्येनेत्संज्ञकेन सह आदिः तन्मध्यवर्तिनां वर्णानां च प्रत्याहारसंज्ञा[254] स्यात् । यथा 'हयवरट्' इति माहेश्वरसूत्रस्य हकारादारभ्य 'हल्' इति चतुर्दशसूत्रस्य इत्संज्ञकेन लकारेण सह हल्प्रत्याहारः सिद्धः । एवमेव 'अइउण्' इति सूत्रस्य अकारादारभ्य 'ऋऌक्' इति ककारेण अक्प्रत्याहारः, 'ऐऔच्' इति चकारेण अच्प्रत्याहारः, 'लण्' इति णकारेण अण्प्रत्याहारः सिद्धः । वर्णसमवायादेव अजादिसंज्ञा सिध्यति, तेन च 'इको यणचि'(अ०६/१/७७) इति लघुभूतं शास्त्रमुत्पद्यते । अन्यथा इउऋऌवर्णानां यवरलाः इत्येवं गुरुतरं सूत्रं स्यात् । यद्यपि सूत्रे संज्ञिनोऽनिर्दिष्टं तथापि आद्यन्तावयववाचकशब्दाभ्यां तयोर्मध्यगानां वर्णानां समुदायोऽत्राक्षिप्तः[255] । यद्यप्यादिशब्दः परमात्रमपेक्षते, अन्तश्च पूर्वमात्रम्, तथापि सह प्रयुज्यमानौ मध्यपेक्षाविति नागेशमतम्[256] । ते समुदायभूतवर्णाः अत्र

---

250 'अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् । धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये' - तदेव

251 'स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च'
'वृत्तये समवायः-वृत्तिसमवायः । वृत्त्यर्थो वा समवायः-वृत्तिसमवायः । वृत्तिप्रयोजनो वा समवायः-वृत्तिसमवायः ।। का पुनर्वृत्तिः? शास्त्रप्रवृत्तिः ।। अथ कः समवायः? वर्णानामानुपूर्व्वेण संनिवेशः' – महाभाष्ये पस्पशाह्निकम्

252 "'इग्यणः' इत्यादौ यथासङ्ख्यप्रवृत्तिश्चेति भावः । अनेनास्य शास्त्रबहिर्भूतत्वं सूचितम्" - उद्द्योतटीका, महाभाष्ये पस्पशाह्निकम्

253 "अत एव 'वृत्तिसमवायार्थो वर्णानामुपदेशः कर्तव्य' इति भाष्ये उक्तम् । पाणिनेर्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायो वर्णानां क्रमेण सन्निवेशस्तदर्थ इति तदर्थः । सचाणादिप्रत्याहारद्वारा शास्त्रप्रवृत्त्यर्थः" - 'अइउण्' इति सूत्रस्य लघुशब्देन्दुशेखरः
'वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम् । प्रत्याहारो वृत्त्यर्थः' - महाभाष्ये पस्पशाह्निकम्
'सति ह्यक्षरसमाम्नायेऽजादिसंज्ञाभिर्लाघवेन शास्त्रप्रवृत्तिः' – उद्द्योतटीका, महाभाष्ये पस्पशाह्निकम्

254 'अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्' - अ०१/१/७१ सूत्रस्य सिद्धान्तकौमुदीवृत्तिः

255 'आदिरन्त्येन सहेता गृह्यमाणः स्वस्य च रूपस्य ग्राहकस्तन्मध्यानां चेति वक्तव्म्' - अ०१/१/७१ सूत्रस्य महाभाष्य
'तेन चाद्यन्तशब्दौ पूर्वपरशब्दवन्नावधिमच्छब्दौ, किंत्ववयवशब्दाविति सूचयतीत्याहुः' - अ०१/१/७१ सूत्रस्य उद्द्योतटीका
'आद्यन्तौ च मध्यापेक्षाविति मध्यमानामेव संज्ञित्वम्' - अ०१/१/७१ सूत्रस्य प्रदीपटीका

256 अ०१/१/७१ सूत्रस्य उद्द्योतटीका

Since 2010
ISSN- 0976-8645
UGC RN-41039

संज्ञित्वेन गृह्यन्ते। अजादिप्रत्याहारसंज्ञया सैव वर्णघटितसमुदायः संज्ञी। अत्र आद्यन्तशब्दौ सम्बन्धितुल्यम्। मातरि वर्तितव्यम्, पितरि शुश्रूषितव्यमित्यादौ सामान्ये विहितेऽपि सम्बन्धमहिम्ना स्वस्वपित्रोरेवार्थौ बोध्यः[257]। एवं प्रत्याहारे यस्य समुदायस्य य आदिरन्तः च तेषां मध्यगानामादेश्च ग्रहणं भवति[258]। यथा यकारादि णकारान्तवर्णघटितसमुदायः यण्प्रत्याहारस्य संज्ञी। यद्यपि समुदायस्यैव संज्ञित्वं, तथापि एकस्मिन् लक्ष्ये समुदायस्य प्रयोगासम्भवात् प्रत्येकस्य संज्ञित्वं बोध्यम्[259]। यथा 'इको यणचि' इत्यनेन इकः स्थाने यण् स्यादचि परे इत्येवं वाक्यार्थबोधे 'दधि अत्र' इकारस्य स्थाने यकारैव स्यात्, न तु यण्समुदायः। अत्र प्रत्याहारे आद्यन्तशब्दाभ्यां वृद्धिकल्पितसमुदायापेक्ष्य आद्यन्तौ गम्येते, न तु अइउणादि सूत्रापेक्ष्यम्। तेन इकारस्य अनादित्वेऽपि इक् इति सिध्यति, लण्सूत्रस्थाकारस्यानन्त्यापि रप्रत्याहारो भवति। प्रत्याहारे आदिवर्णग्रहणार्थं 'स्वं रूपं शब्दस्याशब्दसंज्ञा'(अ०१/१/६८) इत्यतः स्वमिति पदमनुवर्तनीयमिति दीक्षितमतम्। अत्र स्वशब्देन केवलमादिवर्णो गृह्यते, न तु इत्संज्ञकस्यान्त्यस्य अप्रधाने तृतीयानिर्देशात्[260]। महाभाष्यकारेणापि 'स्वस्य च रूपस्य'[261] इति वचनेन आदिवर्ण एव बोध्यते, नान्त्येन। यतोऽन्त्येन सह आदेः संज्ञित्वेन ग्रहणेन यण्कार्ये यकारेण सह णकारोऽपि उक्तम्[262]। परन्तु नागेशमते आदिवर्णग्रहणार्थं स्वमित्यनुवर्तनं नोचितम्, यतः तन्न कृतेऽप्यादेः ग्रहणं भवति। अन्त्यस्येत्संज्ञकवर्णानां इत्संज्ञालोपाभ्यामपसारेण प्रत्याहारे ग्रहणं न भवति। तेनान्त्यस्य ग्रहणं न भवति[263]। परन्तु आदेरित्संज्ञाभावात् प्रत्याहारमध्येऽन्तर्भवति[264]।

ननु सूत्रे वृद्धिकल्पितान्त्यग्रहणे पुनरिइतापदस्य प्रयोजनं किमिति चेत् उच्यते अम्, यम् इत्यादि प्रत्याहारेषु 'ञमङणनम्' इति सूत्रस्य अन्त्येत्संज्ञकं मकारं विहाय ञम् इति आदिमकारेणापि स्यात्। तद्वारणार्थं सूत्रे 'इता' इति तृतीयान्तं विशेष्यपदमावश्यकम्। तेन ञम् इति मकारस्येत्संज्ञाभावात् तेन सह प्रत्याहारो न भविष्यति[265]। सूत्रे सहग्रहणात् समुदायस्यैव संज्ञा स्यात्। णकाराद्यन्तेनेत्संज्ञकेन सह आदेः गृहीत्वा अच्, इक्, एच् इत्यादिषु समुदाय एव संज्ञा इति भावः। ननु अजादिप्रत्याहारेषु सावर्ण्यबोधार्थम् आदिवर्णयेव 'अणुदित्सवर्णस्य चाप्रत्ययः'(अ०१/१/६९) इति सूत्रं प्रवर्तते। अतः आदिवर्णे बोधकताऽस्ति। तेन समुदाय एव संज्ञा इत्यनेन सह विरोधः

257 "सम्वन्धाच्च गम्यते – या यस्य माता, यो यस्य पितेति। एवमिहापि 'आदिः' 'अन्त्य' इति संबन्धिशब्दावेतौ। तत्र संबन्धादेतद्गन्तव्यम्- यं प्रति य आदिः अन्तःइति च भवति तस्य ग्रहणं भवति, स्वस्य च रूपस्येति" - अ०१/१/७१ सूत्रस्य महाभाष्य

258 'आद्यन्तशब्दाभ्यामवयववाचकाभ्यामवयवीसमुदाय आक्षिप्त इति संबन्धित्वेनाविशेषादादेरपि ग्रहणम्' - अ०१/१/७१ सूत्रस्य उद्द्योतटीका

259 'अत्राद्यन्ताभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः समुदाय आक्षिप्तः सञ्ज्ञी। तस्य चैकत्र लक्ष्ये प्रयोगाभावात्प्रत्येकं सञ्ज्ञित्वम्' - अ०१/१/७१ सूत्रस्य लघुशब्देन्दुशेखरः

260 "स्वंरूपं त्वादेरेव गृह्यते नान्त्यस्य, तस्याप्राधान्यादिति 'दध्यत्र' इति केवल एव यकार आदेशः प्रवर्तते, न तु णकारसहितः" - अ०१/१/७१ सूत्रस्य प्रदीपटीका

261 अ०१/१/७१ सूत्रस्य महाभाष्यम्

262 'ननु स्वं रूपमित्यस्यानुवृत्तावन्त्यसहितादेर्विशिष्टस्य यणिति रूपस्य संज्ञित्वे दध्यत्रेत्यादौ णकारसहितः स्यात्' - अ०१/१/७१ सूत्रस्य उद्द्योतटीका

263 'अन्त्यस्य तु न तत्कार्यम्। तस्येत्सञ्ज्ञालोपाभ्यामपहारात्...स्वमित्यनुवृत्तिपरत्वेन व्याख्यानन्तु हेयमेव, अनुवृत्तौ फलाभावात्' - अ०१/१/७१ सूत्रस्य लघुशब्देन्दुशेखरः

264 "आद्यन्तशब्दाभ्यामवयववाचकाभ्यामवयवी समुदाय आक्षिप्त इति संबन्धित्वेनाविशेषादादेरपि ग्रहणम्। अन्त्यस्य तु न, 'आचारादप्रधानत्वाल्लोपश्च बलवत्तरः' इत्युक्तेरन्यानुबन्धानामिवास्यापि संज्ञाकार्याभावात्। स्वशब्देन विशेषणीभूतान्त्यमात्रपरामर्शसम्भवेऽपि विशिष्टपरामर्शे बाधकाभावेन तया युक्त्या न निर्वाहः" - अ०१/१/७१ सूत्रस्य महाभाष्यम्

265 'ञमङणनमेति णकारादिभिः प्रत्याहारो मा भूदिति' - अ०१/१/७१ सूत्रस्य लघुशब्देन्दुशेखरः

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021

Since 2010
ISSN- 0976-8645
UGC RN-41039

स्यादिति चेन्न । यतोऽन्त्येनेत्संज्ञकेन सह योगे सति आदिवर्णस्य बोधकता जायते । अपि च प्रत्याहारेषु केवलमादिवर्णेषु ग्रहणकशास्त्रस्य सावकाशत्वे टिघुसंज्ञादौ एकादेशेऽपि तस्य प्रवृत्तिर्भवति । परन्तु समुदाये संज्ञात्वे तन्न स्यात्[266] । ननु आदिवर्णस्यैव बोधकत्वात् समुदाये विभक्तिरुत्पत्तिर्न स्यात् । तत्र समुदायस्य बोधकताभावे प्रातिपदिकसंज्ञा न स्यादिति चेन्न । आदिवर्णस्य बोधकत्वेऽपि तेन सह अन्त्येत्संज्ञकस्यापेक्षा वर्तते । अतः समुदायस्यैव प्रातिपदिकसंज्ञा स्यात् । अतो न केवलमादिवर्णोऽर्थवान् अपि तु समुदायस्यैवार्थवत्ता प्रतीता । अस्मात् प्रत्याहारे आदिमात्रस्य सवर्णबोधकत्वेऽपि समुदायस्यैव प्रातिपदिकसंज्ञा भवतीति स्पष्टम्[267] । तेन समुदायात् विभक्त्युत्पत्तिर्भवति[268] । तेन 'इको यणचि'(अ०६/१/७७) सूत्रे 'इकः' इत्यत्र समुदायात् विभक्त्युत्पत्तिर्भवति, नादिमात्रात् । अतोऽन्त्यस्येत्संज्ञालोपाभ्यामपहारे सत्यपि समुदाये विभक्त्युत्पत्तौ आदिरन्त्येनेति वचनं नासंगतम्[269] ।

ननु वर्णसमाम्नायसूत्रेष्वन्तवर्णानामित्संज्ञा भवत्यपि 'इको यणचि'(अ०६/१/७७) इत्यत्र इगादिपदे ककारस्येत्संज्ञाभावः स्यात् । अर्थात् अन्त्येदभावेन तेन सह आदिरन्त्येनेत्यनेन प्रत्याहारसिद्धिरसम्भवमिति चेन्न । यतः तत्र अन्त्यशब्दे सादृश्ये लक्षणा स्वीक्रियते । तेन 'ऋऌक्' इत्यत्र अन्त्येत्संज्ञकः ककारो यथा 'इको यणचि'(अ०६/१/७७) इति सूत्रस्य ककारोऽपि तथा । एवम् 'अइउण्' इत्यत्र इकारः तथैव इक् इति इकारः । इत्थमन्त्येत्सदृशेन सह आदिसदृशवर्णं मिलित्वा इक् इति प्रत्याहारः । अत्र इकारादिककारान्तवयवोः समुदायघटकवर्णानां इक् इति संज्ञा बोध्यते । एषा लक्षणा व्यक्तिपक्षे उचिता[270] । यतः व्यक्तिपक्षे प्रतिवर्णभिन्नत्वेन 'ऋऌक्' सूत्रस्थः ककारेण सह अक्, इक्, उक् इत्यादौ ककारा भिन्नैव । वर्णसमाम्नायस्थात् अकारादेः प्रत्याहारस्थितोऽकारादि भिन्नैव । अतोऽत्र लक्षणाश्रयणमुचितम् । तेन 'अइउण्' सूत्रस्थोऽकारादिना सह 'ऋऌक्' सूत्रस्थः ककारादिना सह च 'अकः सवर्णे दीर्घः'(अ०६/१/१०१) इत्यत्र अकः प्रत्याहारे अकारककारयोरभेदः प्रतीयते ।

आचार्यपाणिनिना **उरण्-रपरः**(अ०१/१/५१) इति सूत्रं प्रणीतम् । अत्र रकारेण रप्रत्याहारो गृह्यते । 'लण्' इति सूत्रे लकारोत्तरवर्त्यकारस्यानुनासिकत्वं बोध्यम् । अनुनासिकत्वात् 'उपदेशेऽजनुनासिक इत्' (अ०१/३/२) इत्यनेन इत्संज्ञा विधीयते । लकारोत्तरवर्त्यकारस्यानन्त्यात् तस्येत्संज्ञा अप्राप्तौ तद्विधानार्थं पृथगुक्तिः । अतः लण्सूत्रस्थावर्णस्यानुनासिकत्वप्रतिज्ञासामर्थ्यादनन्त्येनापि इत्संज्ञा सिध्यति, यतो एतद् विरहे रप्रत्याहारो न लभ्यते । कौमुदीकारेणोक्तं- 'एषामन्त्या इतः । लण्सूत्रेऽकारश्च'[271]

266 "अत्र वदन्ति - समुदितस्य संज्ञात्वे "प्रत्याहारेष्वाद्या वाचकास्तत्र ग्रहणकशास्त्रं सावकाशं" इति ग्रहणकसूत्रस्थभाष्यविरोधः । टिघुभाद्येकदेशवदस्यापि ग्राहकत्वप्रसक्त्यभावात्" - अ०१/१/७१ सूत्रस्य उद्द्योतटीका

267 'समुदायादेवेति । तस्यैव संज्ञिनाऽर्थेनार्थवत्तया प्रातिपदिकत्वादिति भावः' - तदेव

268 'तस्मादाद्यवर्ण एव वाचकता, अन्त्यस्तु तात्पर्यग्राहकः । सहग्रहणात्तु विशिष्टे तदारोपाद्विशिष्टाद्विभक्त्युत्पत्तिरिति द्योतकान्तरवैषम्यमिति' - तदेव

269 'सहग्रहणाच्च समुदाय एव सञ्ज्ञेति समुदायादेवेक इत्यादौ विभक्त्युत्पत्तिर्नादिमात्रात् । न चान्त्यस्येत्सञ्ज्ञालोपाभ्यामपहारादादिरन्त्येनेत्यसङ्गतम्' - अ०१/१/७१ सूत्रस्य लघुशब्देन्दुशेखरः
'सहग्रहणाच्चाद्यन्तौ समुदितौ संज्ञेतीको यणचीति समुदायादेव विभक्तेरुत्पत्तिः, नादिमात्रात्' - अ०१/१/७१ सूत्रस्य प्रदीपटीका

270 'अन्त्येनेत्यस्येदन्त्यसदृशेनेत्यर्थात् । व्यक्तिपक्षे एवमेवौचित्यात् । सादृश्यमूलिकैव चात्र तत्त्वप्रत्यभिज्ञेत्याहुः' - अ०१/१/७१ सूत्रस्य लघुशब्देन्दुशेखरः

271 माहेश्वरसूत्रस्य सिद्धान्तकौमुदीवृत्तिः

Since 2010
ISSN- 0976-8645
UGC RN-41039

लण्सूत्रस्थाकारस्येत्संज्ञायां 'आदिरन्त्येन सहेता'(अ०१/१/७१) इत्यनेन 'हयवरट्' इत्यतः रकारं नीत्वा 'लण्' इत्यत्र इत्संज्ञकेनाकारेण रप्रत्याहारो सिद्धः । रप्रत्याहारार्थं प्रदीपकारेण लण्सूत्रस्थाकारस्येत्संज्ञा विधीयते । अतः लृकारस्य लपरत्वं वक्ष्यामीति[272] भाष्यवचनमाधारीकृत्य कैयटेनोक्तम् – ''लपरत्वं व्याख्यास्यामीत्यर्थः 'रपरः' इत्यत्र र इति लकाराकारेण प्रत्याहार आश्रीयते । तत्रान्तरतम्यादृकारस्याण् रपरो भवति, लृकारस्याण् लपर इति ।''[273] वस्तुतस्तु रप्रत्याहार एव नास्तीति शब्देन्दुशेखरे व्यक्तम् ।

ननु **आदिरन्त्येन सहेता**(अ०१/१/७१) इति सूत्रेण आदिर्मध्यगानां स्वस्य च प्रत्याहारसंज्ञेति स्थिता । तेन समुदायस्य संज्ञायाम् अटादिप्रत्याहारेषु णकारादीनामपि ग्रहणं स्यात् मध्यगत्वविशेषत्वात् । अतो रप्रत्याहारेऽपि अन्त्येत्संज्ञकमवर्णं विहाय रलवर्णानामिव टकारस्यापि ग्रहणं स्यात्, मध्यगत्वात् । बालमनोरमाकारेणोक्तं- ''ततश्च रलयोः संज्ञेति पूर्वग्रन्थे रलयोरिति न्यूनम्, टकारस्य मध्यगत्वेन ग्राह्यत्वात्...''[274] इति । अतो अजादिप्रत्याहारे अकारादिचकारान्तं वर्णसमुदायं बोध्यं, तेन अकारादिना सह इत्संज्ञकानां णकारककारङकाराणामपि मध्यवर्तित्वात् अच्प्रत्याहारे ग्रहणीयम् । भाष्यकारेणोक्तं यत्- 'य एतेऽक्षु प्रत्याहारार्था अनुबन्धाः क्रियन्ते, एतेषामज्ग्रहणेन ग्रहणं कस्मान्न भवति?'[275]। तथा सति अटादिप्रत्याहारे चकारादिनां हल्वर्णानां ग्रहणे सति रुचीनामित्यादावड्व्यवधानेऽपि[276] रेफपरत्वात् णत्वं स्यात् । अपि च कर्णेनेत्यादौ अड्व्ये णकारग्रहणे णत्वापत्तिः । केचिन्मते चुटुतुलशर्व्यवाये नेति निषेधे चरितार्थत्वात् प्रत्याहारवर्णेषु णकारग्रहणं नेति तन्न । एवम् इण्ग्रहणेन चकारग्रहणे रुरुचिध्वे इत्यादौ 'विभाषेटः'(अ०८/३/७९) इत्यनेन इणः परो य इट् तथा इकारः ततः परेषां धकारस्य वा ढत्वं स्यात् । अपि च आदिरन्त्येन इत्यनेन मध्यवर्तिनामजित्येषा संज्ञा क्रियते चेत् इकारादिनामिव णकारादिनामपि अच्संज्ञा प्राप्नोति, तेन दधि णकारः, दधि करोति, दधि ङकार इत्यादावचि यणादेशः[277] स्यात् । एवम् अक्प्रत्याहारे णकारस्यापि ग्रहणे सुगण णकार इत्यत्र 'अकः सवर्णे दीर्घः'(अ०६/१/१०१) इत्यनेन सवर्णदीर्घो भवतीति सन्देहविषये पदमञ्जर्यां स्पष्टम् ।

पाणिनिव्याकरणे प्रत्याहारेषु इत्संज्ञकवर्णानां ग्रहणविषये कोऽपि विधिर्नास्ति । अतः शङ्का जायते । परन्तु सूत्रे पदप्रामाण्यात् एतस्मिन्विषये विधिर्ज्ञाप्यते । 'उपदेशेऽजनुनासिक इत्'(अ०१/३/२) 'यरोऽनुनासिकेऽनुनासिको वा'(अ०८/४/४५) इति सूत्रद्वये अनुनासिकः पदनिर्देशात् । अच्प्रत्याहारे इत्संज्ञकस्य ककारस्य ग्रहणे अनुनासिकशब्दे ककारे परे इकारस्य 'इको यणचि'(अ०६/१/७७) इत्यनेन अच्प्रयुक्तं कार्यं यणादेशः न दृश्यते । बालमनोरमाकारेणोक्तं- 'यदि हि अजादिप्रत्याहारेषु इतामपि ग्रहणं स्यात्, तर्हि अच्प्रत्याहारे ऋलृक् इति ककारस्यापि प्रविष्टत्वेन अच्त्वात्तस्मिन् परे इकारस्य इको यणचि इति यणादेशे लोपो व्योर्वलि इति लोपे अनुनास्क इति स्यात्, इकारो न श्रूयेत । अनुनासिक इत्यादिनिर्देशज्ञापकेत्यर्थः।'[278] 'ऋलृक्' इति

---

272 अ.१/१/९ सूत्रस्य महाभाष्यम्

273 अ.१/१/९ सूत्रस्य प्रदीपटीका, महाभाष्यम्

274 अ.१/३/२ सूत्रस्य बालोमनोरमाटीका, वैयाकरणसिद्धान्तकौमुदी

275 'हयवरट्' इति सूत्रस्य भाष्यम्
'अच्प्रत्याहारग्राहकेषु पठितानामनुबन्धानां प्रत्यासत्त्याऽक्षु ग्रहणं कुतो नेत्यर्थः' - 'हयवरट्' सूत्रस्य प्रदीपटीका

276 'अट्कुप्वाङ्नुम्व्यवायेऽपि'(अ.८/४/२)

277 "दधि णकारीयति, मधु णकारीयतीति "इको यणचि" इति यणादेशः प्रसज्येत" - 'हयवरट्' सूत्रस्य भाष्यम्

278 अ.१/३/२ सूत्रस्य बालमनोरमाटीका, वैयाकरणसिद्धान्तकौमुदी

Since 2010
ISSN- 0976-8645
UGC RN-41039

ककारस्य अच्प्रत्याहारेऽन्तर्भावेऽपि 'प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः'(अ०७/३/४४) इत्यनेन इत्वविधिसामर्थ्यात् यणादेशः लोपश्च न भवति, अन्यथा लाघवाल्लोपमेव विधीयेत इति केचित्। तन्न, यतः 'प्रत्ययस्थात्कात्पूर्वस्यातो लोप आप्यसुपः' इत्यत्र इतः स्थाने लोपः कथनेन वर्णाधिक्यप्रसङ्गात् गौरवैव भवति न लाघवम् । तेन न स्वीकार्यम्। अतोऽत्रानुनासिकः पदव्यवहारेण ज्ञायते यत् प्रत्याहारेषु इत्संज्ञकानां वर्णानां न ग्रहणीयम् ।[279] अपि च 'पापाणके कुत्सितैः'(अ०२/१/५४) इत्यत्रापि सूत्रे 'ऋलृक्' इति सूत्रस्य ककारस्य अच्प्रत्याहारे विहिते सति 'एचोऽयवायावः'(अ०६/१/७५) इत्यनेन एकारस्य अयादेशापत्तिः स्यात् । 'एङः पदान्तादति'(अ०६/१/१०५) इत्यत्रापि 'एओङ्' इति सूत्रस्य इत्संज्ञकस्य ङकारस्य अच्प्रत्याहारे प्रविष्टत्वे अच्परत्वात् एकारस्य अयादेशे एङः इति निर्देशमनुपपन्नं स्यात्। सूत्राणामर्थादपि तद्विषयो ज्ञाप्यते यथा 'उरण्-रपरः'(अ०१/१/५१) इत्यनेन ऋस्थाने विहितोऽण् रपरः स्यात्। अत्र ऋकारस्थाने अण्प्रत्याहारस्य इत्संज्ञकस्य णकारस्यादेशो न स्यात् स्थानप्रयत्नभिन्नत्वात् । अत आदेशस्याभावात् णस्य रपरत्वमसम्भवम् । 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'(अ०६/३/१११) इत्यनेन अण्वर्णस्य दीर्घे विहिते णस्य सोऽप्राप्तम्, व्यञ्जनस्य दीर्घाभावात्। 'केऽणः'(अ०७/४/१३) इत्यनेन णकारस्य ह्रस्वत्वं न प्राप्यते व्यञ्जनत्वात् । अतो अण्समुदाये णकारस्य ग्रहणेऽपि तस्य पृथग्फलाभावात् ज्ञायते प्रत्याहारेषु णकारादिनां न ग्रहणम्। अपि च अङ्प्रत्याहारे इत्संज्ञकस्य ककारस्य ग्रहणे 'अट्कुप्वाङ्नुम्व्यवायेऽपि'(अ०८/४/२) सूत्रे कुग्रहणमनर्थकं स्यात्। 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'(अ०६/१/१२७) इत्यत्रापि न ह्रस्वादिसंधिकार्यासम्भवात् । अतः एतेभ्यः प्रयोगेभ्यः प्रत्याहारे इत्संज्ञकानां वर्णानां न ग्रहणीयमिति ज्ञायते । 'वस्तुतो ज्ञापकादिनाऽस्यापि न संज्ञाकार्यम्, आद्यन्तशब्दाभ्यामाद्यन्तघटितसमुदायस्याक्षेपेणान्येषामिव तयोः प्राप्तायाः सञ्ज्ञायाः प्रकारान्तरेणाशक्यवारणत्वात्'[280] इति मनोरमाकारमतम् । आदित्वेन अन्त्यत्वेन च रूपेण इत्संज्ञकानां बोध्यत्वाभावेऽपि आद्यन्तघटितसमुदायरूपत्वेन तयोर्बोध्यत्वस्य वारणे वचनाभावात् सूत्रस्य ज्ञापकविधेरावश्यकम्।

**आदिरन्त्येन सहेता**(अ०१/१/७१) इत्यनेन आद्यन्तघटितसमुदायवर्णानां प्रत्याहारसंज्ञा सिध्यति । किन्तु इत्संज्ञकवर्णानां मध्यगत्वविशेषत्वेऽपि प्रत्याहारसंज्ञा न सिध्यति। एतेन इत्वर्णानां प्रत्याहारसंज्ञारूपकार्यं ज्ञापकनैव वाधितम्, अन्यथा तेषां निवारणे विधानाभावात् निर्देशमनुपपन्नम् । अतः सूत्रस्य प्रत्यक्षविधेरिव ज्ञापकविधेरपि तात्पर्यमनस्वीकार्यम् । प्रौढमनोरमाकारेणोक्तम्- 'एवञ्चाजादिसञ्ज्ञा स्वसञ्ज्ञिघटकेकारादिष्विवाकारचकारयोरपि प्राप्नोत्येव । किं च, स्वशब्देन केवलान्त्यपरामर्शसम्भवेऽपि विशिष्टपरामर्शो न बाधकं, तत्र समुदाये फलाभावादवयवोर्विश्रान्ति प्राप्स्यति । तस्माज्ज्ञापकादिनैवान्त्यस्य तत्कार्यं वारणीयमित्यलम्।'[281] यद्यपि तत्र अन्त्येन इत्यप्रधानतृतीयानिर्देशेन प्रत्याहारे स्वं रूपं चादेरेव गृह्यते नान्त्यस्य । अपि च सर्वनामशब्देन प्रधानस्यैव बोधो[282] । 'एतद्विषयेप्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न'[283] इति आक्षेपश्लोकवार्तिकमुपस्थाप्य महाभाष्यकारेण

279 "प्रत्याहारेष्वितां न ग्रहणम् । 'अनुनासिकः' इत्यादिनिर्देशात् । न ह्यत्र ककारे परेऽच्कार्यं दृश्यते" - अ.१/३/२ सूत्रस्य कौमुदीकारमतम्

280 अ.१/१/७१ सूत्रस्य प्रौढमनोरमाटीका,

281 तदेव

282 सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वात् इति अ.१/१/७१ सूत्रस्य प्रौढमनोरमा

283 'हयवरट्' इति सूत्रस्य वार्तिकम्, महाभाष्यम्

Since 2010
ISSN- 0976-8645
UGC RN-41039

समाधानवार्तिकमुल्लिख्यते 'आचारात्'[284] इति । अर्थात् आचार्याणामाचारात् व्यवहाराद्वा तद्बोध्यते । अत्र तावदाचारैव ज्ञापकम् । 'आचरणमाचारः आचार्यप्रवृत्तिः, ततो ज्ञापकान्न भवतीति'[285] न्यासकारमतम् । आचार्येण अच्प्रत्याहारेषु पठितानामनुबन्धानां णकारादिहल्वर्णानां अक्षु ग्रहणे किमपि कार्यं न कृतम् । 'तृषिमृषिकृशेः काश्यपश्य'(अ॰१/२/२५) इत्यत्र आचार्येण ककारे परे तत्पूर्ववर्तिनः इकारस्य अच्कार्यं तथा यणादेशो न कृतः । यदि अक्षु अनुबन्धानामच्संज्ञा स्यात्, आचार्यास्तेष्वच्कार्याणि कुर्यात् । ''यदयम् 'उणादयो बहुलम्', 'तृषिमृषिकृशेः काश्यपस्य', 'ङमो ह्रस्वादचि ङमुण्नित्यम्', 'ङसिङसोश्च' इति णकारादिषु परतो यणादेशं न करोति, ततो ज्ञापयति 'सत्यामप्यच्कार्याणि न भवन्ति' इति । अथवा 'अजित्येषैव संज्ञैषां न भवति' इत्येषोऽर्थोऽनया आचार्यप्रवृत्त्या ज्ञाप्यते''[286] इति न्यासकारमतम् । पदमञ्जरीकारेणोक्तम् – 'सामान्यापेक्षं च ज्ञापकमिति कार्यान्तरमपि तत्र तत्र न भवति।'[287] एवं ज्ञापकेन संज्ञाभावं प्रतिपाद्य अपरं हेतुमाह- 'अप्रधानत्वात्'[288] । तथाऽचार्येण स्वशैल्यां समजातीयवर्णानां एकत्रैवोपदिश्यते[289] । अतः अक्षु अच्समुदायं प्रधानम्, हलवर्णमप्रधानम् । एवं हल्ष्वपि बोध्यम् । अतः 'ञमङणनम्' इति सूत्रे एव णकारादेः प्राधान्यम्, न तु अच्प्रत्याहारे । एवं ककारस्यापि प्रधानता 'कपय्' इति सूत्रे, न 'ऋलृक्' इति सूत्रे । अक्षु हल्वर्णाः अप्रधानाः, हल्षु अच्वर्णाः[290] । अतः तेषां न ग्रहणम् । ''प्रधानाप्रधानसंनिधौ प्रधानमेव कार्याणां प्रयोजकं' इति परार्थानामनुबन्धानामच्संज्ञा न प्रवर्तत''[291] इति प्रदीपकारमतम् । अणित्येवमादयः संज्ञाः प्रणयनार्थं अनुबन्धाः उच्चार्यन्ते । अजादिप्रत्याहारे णकारादिनामच्संज्ञा प्राप्ते तन्निषेधार्थं महाभाष्यकारेणापरं हेतुमाह - 'लोपश्च बलवत्तरः'[292] । अनुबन्धाः हि इत्संज्ञकाः, तेन तेषामच्संज्ञायाः प्रागेव 'तस्य लोपः'(अ॰१/३/९) इत्यनेन लोपो विधीयते । परत्वान्नित्यत्वाद्वा 'आदिरन्त्येन सहेता'(अ॰१/१/७१) इति संज्ञाविधायकशास्त्रेण प्रत्याहारसंज्ञाविधानकालेऽनुबन्धानां लोपादसन्निधानाद् तत्र अजादिसंज्ञा न प्रवर्तते । संज्ञाशास्त्राद्धि लोपशास्त्रस्य परत्वान्नित्यत्वाच्च[293] वलवत्त्वम् । परन्तु यस्मिंस्तु प्रत्याहारे योऽनुबन्धोऽपेक्षितः, तस्य वचनसामर्थ्यात् प्राग्लोपो न भविष्यति । लुप्तेऽपि वा तस्मिन्भूतपूर्वेण तेन सह आदिः संज्ञा भविष्यति । अच्षु लुप्तानां णकारादिनां संज्ञा न भवति; 'ञमङणनम्' इत्यादिषु सावकाशत्वात् । अतः कैयटेनोक्तम् – 'अनुबन्धाः ह्युच्चारण एव सन्ति, इत्संज्ञाप्रतिबद्धं च कार्यमसन्त एव प्रतिपादयन्ति, स्वतस्तु न किंचित्कार्यं प्रतिपद्यन्ते'[294]। नागेशमतेऽत्र अव्यापकत्वापत्तिः । यतः पूर्वं वर्णानामुपदेशः तदुत्तरकाला इत्संज्ञा तत आदिरन्त्येनेति प्रत्याहारः । अतः प्रत्याहारसिद्धेः प्रागेव अनुबन्धानां इत्संज्ञकत्वे लोपे आदिरन्त्येनेति सूत्रेण तैर्बोधितेऽपि अजादिप्रत्याहारे

284 तदेव

285 'ऐऔच्' इति सूत्रस्य न्यासः, काशिका

286 तदेव

287 'ऐऔच्' इति सूत्रस्य पदमञ्जरी, काशिका

288 'हयवरट्' इति सूत्रस्य वार्तिकम्, महाभाष्यम्

289 'एषा ह्याचार्यस्य शैली लक्ष्यते, यत्तुल्यजातीययांस्तुल्यजातीयेषूपदिशति, अचोऽक्षु हलो हल्ष्विति प्रत्याहारेऽनुबन्धानाम् इत्यत्र भाष्याच्चेति भावः' इति अइउण्सूत्रस्य लघुशब्देन्दुशेखरकारमतम्

290 वर्णसमाम्नाये अचं विना हल्वर्णोच्चारणे क्लेशो जायते । अतः हकारादिनां सुखोच्चारणार्थमकारः पुनः पुनः उक्तम् ।

291 'हयवरट्' इति सूत्रस्य प्रदीपटीका, महाभाष्यम्

292 'हयवरट्' इति सूत्रस्य वार्तिकम्, महाभाष्यम्

293 'कृताकृतप्रसङ्गित्वान्नित्यत्वम् । कृतायामपि संज्ञायां लोपेन भवितव्यम् अकृतायामपि' इति न्यासकारमतम् ।

294 'हयवरट्' इति सूत्रस्य प्रदीपटीका, महाभाष्यम्

Since 2010
ISSN- 0976-8645
UGC RN-41039

तेषामनुबन्धानामसत्त्वात् न ग्रहणमिति प्रतिपादितम् ।

हल्प्रत्याहारविषयेज्ञाने अच्प्रत्याहारस्य ज्ञानं सिध्यति । हल्विषये ज्ञाने 'हलन्त्यम्'(अ॰१/३/३) इत्यनेन चकारादिवर्णानां इत्संज्ञकत्वे अच्प्रत्याहारो भवति । अच्ज्ञाने 'उपदेशेऽजनुनासिक इत्'(अ॰१/३/२) इति सूत्रेण अचामित्संज्ञा भवति । परन्तु हल्प्रत्याहारज्ञानकाले अच्प्रत्याहारस्य निष्पत्त्यभावेन उपदेशेऽजित्यनेन लण्घटकोऽकारस्येत्संज्ञाभावे लोपो न भवति । लण्सूत्रस्थस्याकारस्यानुनासिकत्वेन इत्संज्ञकत्वे तु हलादिप्रत्याहारे अनुबन्धभूतस्य लणोऽकारस्य ग्रहणाभावे लोपशास्त्रस्य बलवत्त्वादिति हेतोरप्रसक्तेः । अतो भाष्यकारेण लोपस्य बलवत्त्वमिति वचनस्य प्रवृत्त्यभावात् अव्यापकत्वरूपदोष आपद्यते । भाष्यविरोधात् लण्घटकोऽकारो नानुनासिकः । हल्प्रत्याहारे अनुनासिकस्याकारस्य ग्रहणेऽपि काचित् समस्या दृश्यते । लणोऽकारस्य इत्संज्ञालोपाभावे च भाष्ये प्रत्याहारेषु जातिपक्षस्यैवाश्रयणात् लण्प्रत्याहारस्थितस्यानुनासिकस्याकारस्य हल्प्रत्याहारे ग्रहणे निरनुनासिकस्यापि ग्रहणम् । हल्प्रत्याहारे अकारस्य ग्रहणेन मामाँस्त्रायस्व इत्यत्र 'मोऽनुस्वारः'(अ॰८/३/२३) इत्यनेन आकारे परे मकारस्यानुस्वारस्यापत्तिर्भवति । जातिपक्षाश्रयणाद्ध्रस्वाकारेण दीर्घाकारस्यापि हल्प्रत्याहारे ग्रहणसिद्धिः । एवं जातिपक्षाश्रयणेनानुनासिकाकारेण निरनुनासिकस्यापि ग्रहणे सस् अस्ति इत्यत्र अकारस्यापि हल्मध्ये ग्रहणात् 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि'(अ॰६/१/१३२) इत्यनेन अकारे परे सुलोपापत्तिः स्यात् । अतो लण्सूत्रे अकारो नानुनासिकः । अतोऽकारस्यानुनासिकत्वाभावेन अनित्संज्ञकत्वादेव 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न'[295] इति शंका अच्प्रत्याहारैव प्रतिपादिता[296] । अन्यथा अकारानुबन्धस्य विजातीयत्वात्तस्यापि हल्प्रत्याहारे ग्रहणशङ्कासमाधानयो-र्विधानमुचितत्वादिति भावः । परन्तु तन्न विहितम् । अस्माज्ज्ञायते यत् प्रत्याहारेषु वर्णग्रहणमेव प्रधानम् । तेन अच्प्रत्याहारे अचां हल्षु हलाञ्च प्राधान्येन पठितम् ।[297] अतः लणोऽकारो नानुनासिक इति भाष्यकारस्याप्यभिप्रेतम् । हल्प्रत्याहारे हलां प्राधान्येऽपि न च हशादिप्रत्याहारे टकाराद्यनुबन्धग्रहणस्यापत्तिः । तथा सति रामस् टीकत इत्यादौ 'हशि च'(अ॰६/१/११४) इत्यनेन टकारे परे उत्वापत्तिः स्यात् । तन्न, हकारादिषु पुनः पुनरकारोच्चारणेन ज्ञायते यत् उच्चारणार्थवर्णरहितहलां तत्तत्प्रत्याहारे न ग्रहणम् । बालमनोरमाकारेणोक्तम् – 'अत्र च इदमेव अकारस्य पुनः पुनरुच्चारणं ज्ञापकम्'[298]। हयादिवर्णानां संयुक्तानामुच्चारणमसम्भवात् अकारेण सह हकारादिव्यञ्जनवर्णान् उच्चार्य्यन्ते[299] । तेन कौमुदीकारेणोक्तम्- 'हकारादिष्वकार उच्चारणार्थः'[300] । हल्षु टकाराद्यनुबन्धानां ग्रहणे कोऽपि प्रयोगकार्यं न दृश्यते । अपि च प्रत्याहारेषु आदिवर्णाः इत्संज्ञको भवति न वेति विषयेऽपि सूत्रे किमपि नोक्तम् । परन्तु 'विभाषा तृतीयादिष्वचि'(अ॰७/१/९७) इति सूत्रे 'तृतीयादिषु' पदेन ज्ञाप्यते

---

295 'हयवरट्' इति सूत्रस्य वार्तिकम्, महाभाष्यम्

296 "अतएव 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' इत्यनेन प्रत्याहारे वर्णसमाम्नाये य एतेऽक्षु अज्बोधकसूत्रेषु प्रत्याहारार्था अनुबन्धाः क्रियन्ते तेषामज्ग्रहणेन ग्रहणं कस्मान्नेत्यर्थकेनाच्प्रत्याहारे शङ्का कृता, न हल्प्रत्याहारे । भाष्ये चाइउणित्यादिसूत्रचतुष्टयोपादानेनैवास्य प्रवृत्तिर्दर्शिता" इति अइउण्सूत्रस्य लघुशब्देन्दुशेखरकारमतम्

297 "तत्र प्राधान्यं प्रत्याहारेषु ग्रहणार्थत्वरूपम् । हल्षु च तथोपदेशस्तेषाम् । अक्षु तु स्वराणामेव तथोपदेश इति प्राधान्यात्तेषामेव सञ्ज्ञित्वमिति" भाष्ये स्पष्टम् इति अइउण्सूत्रस्य लघुशब्देन्दुशेखरकारमतम्

298 माहेश्वरसूत्रस्य बालमनोरमाटीका, वैयाकरणसिद्धान्तकौमुदी

299 'नान्तरेणाचं व्यञ्जनस्योच्चारणं भवति' इति 'उच्चैरुदात्तः'(अ.१/१/२९) सूत्रस्य भाष्यम् ।

300 माहेश्वरसूत्रस्य सिद्धान्तकौमुदीवृत्तिः, वैयाकरणसिद्धान्तकौमुदी

Since 2010
ISSN- 0976-8645
UGC RN-41039

। यतः तृतीयादिषु इत्युक्ते टाप्रभृत्याः सुप्पर्यन्तं बोध्यम् । 'चुटू'(अ॰१/३/७) इत्यनेन टाप्रत्ययस्य टकारस्य लोपो विधीयते । अत एतषां प्रत्ययाणां बोधार्थं टाप् इति प्रत्याहारेण लघूच्चारणेन वा कार्यसिद्धिर्भवति । परन्तु तन्न कृत्वा तृतीयादिषु इति अनेकाक्षरपदेन ज्ञायते प्रत्याहारे आदिवर्णः न कदापि इत्संज्ञकः ।

यद्यपि कौमुदीकारेण रप्रत्याहारार्थं लण्सूत्रस्थाकारस्येत्संज्ञा प्रतिज्ञायेत । तथापि शाब्दिकचूडामणिनागेशेन लण्सूत्रस्थस्याकारस्यानुनासिकत्वं न स्वीकार्यम् । तेन रप्रत्याहारः न सिध्यति । यतो लण्सूत्रस्थस्याकारस्यानुनासिकत्वप्रतिज्ञायां 'उपदेशेऽजनुनासिक इत्'(अ॰१/३/२) इत्यनेन इत्संज्ञायाः 'आदिरन्त्येन सहेता'(अ॰१/१/७१) इत्यनेन रेफं नीत्वा इत्संज्ञकेन अकारेण सह रप्रत्याहारो भवति । नागेशमते लण्सूत्रस्थस्याकारो नानुनासिकः । तस्य मते यदि लण्सूत्रस्थस्याकारस्यानुनासिकत्वं स्यात्तर्हि रप्रत्याहारस्य सिद्धे 'अतो ऌान्तस्य'(अ॰७/२/२) इति सूत्रे पाणिनिना लकारोच्चारणं न कृतम् । यतो रशब्देन रप्रत्याहारस्यैव ग्रहणे रलयोः ग्रहणं स्यात् । अतः सूत्रे लकारोच्चारणं व्यर्थम्[301] । व्यर्थं सद् ज्ञापयति रप्रत्याहारो नास्ति । अत उच्यते यत् 'लण्' इति सूत्रे अकारो नानुनासिकः । 'अतो ऌान्तस्य'(अ॰७/२/२) इत्यत्र पृथग्लकारोच्चारणं रप्रत्याहारस्यानित्यत्वं ज्ञापयतीति केचित् । रप्रत्याहारस्य नित्यत्वे 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः'(अ॰८/२/४२) 'वनो र च'(अ॰४/१/७) इत्यादौ रेफग्रहणे रप्रत्याहारग्रहणापत्तिः स्यात् । येन प्रफुल्तम् इति प्रयोगे लकाराद् विद्यमानस्य निष्ठासम्बन्धीतकारस्य नकारापत्तिर्भवति । एवं 'रषाभ्यां नो णः समानपादे'(अ॰८/४/१) इत्यत्रापि रेफेन लकारस्य ग्रहणे कमलानाम् इत्यत्र लकाराद् नकारस्य णत्वप्राप्तिः स्यात् । अतो रप्रत्याहारस्य अनित्यत्वेन 'अतो ऌान्तस्य'(अ॰७/२/२) इति सूत्रे रकारेण लकारस्य ग्रहणं न भवति । अपि च लण्सूत्रस्थाकारस्यानुनासिकत्वे इत्संज्ञकत्वे च रप्रत्याहारः स्वीक्रियते चेत् 'इको यणचि'(अ॰६/१/७७), 'इको यण्'(अ॰६/४/८१), 'इग्यणः सम्प्रसारणम्'(अ॰१/१/४५) 'यणो मयो द्वे वाच्ये'[302] इत्यादौ यण्पदघटितसूत्रेष्वर्धमात्रालाघवात् यप्रत्याहारैव व्यवहरेत्, अर्धमात्रालाघवेन पुत्रोत्सवं मन्यते वैयाकरणाः इति न्यायात् । 'किञ्चास्येत्सञ्ज्ञकत्वे बहुषु यण्घटितसूत्रेष्वर्द्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव व्यवहरेत्'[303] इति लघुशब्देन्दुशेखरकारमतम् । तेन यप्रत्याहारेणापि यवरलवर्णाः बोध्यते । अतो रप्रत्याहारसाधकलकारस्यानुनासिकत्वं नेति ज्ञायते । रप्रत्याहाराभावे तवल्कार इति सिद्धौ न दोषः । यत ऋऌवर्णयोः सावर्ण्यत्वात् 'उरण्-रपरः'(अ॰१/१/५१) सूत्रे रकारेण लग्रहणमपि कर्तव्यम् ।

अतः प्रत्याहारेषु अनुबन्धानां ग्रहणविषये पाणिनिना स्पष्टरूपेण किमपि नोक्तम्, परन्तु सूत्रेषु विविधप्रयोगात् व्यवहाराद्वा यो विधिः ज्ञाप्यते तन्नुनं समीचीनं प्रतिभाति । पाणिनेः सूत्राणां सम्यगर्थनिधारणाय भाष्यकारप्रभृतिना वैयाकरणेन ज्ञापकानां प्रामाणिकत्वं स्वीकृतम् । तेन प्रत्याहारेषु इत्संज्ञकानां ग्रहणं न भवतीति फलितम् ।

---

301 "परे त्वस्याऽनुनासिकत्वे 'अतो ल्रा'(अ॰७/२/२) इति सूत्रे पाणिनिर्लकारं नोच्चारयेत् । प्रत्याहारेणैव निर्वाहात्" इति अइउण्सूत्रस्य लघुशब्देन्दुशेखरकारमतम्

302 अ॰८/२/२३ सूत्रस्य वार्तिकम्, वैयाकरणसिद्धान्तकौमुदी

303 'अइउण्' इति सूत्रस्य लघुशब्देन्दुशेखरः

## सन्दर्भग्रन्थसूची

1. *काशिकावृत्तिः* (न्यास-पदमञ्जरी-सहिता), नारायण मिश्र। वाराणसी : रत्ना पब्लिकेशन, प्रथमभागः १९८५।

2. *काव्यमीमांसा* । सम्पादकौ सीतानाथ आचार्य शास्त्री देवकुमारदास च। कलकाता : सदेश, २०१६।

3. *ज्ञापकसंग्रहः* (विवृति-सहिता)। एन्. एस्. रामानुज ताताचार्य। तिरुपति : राष्ट्रीय संस्कृत विद्यापीठ, २००२।

4. *पाणिनीयशिक्षा* (वेदाङ्गशिक्षाविमर्शाख्यया संस्कृतव्याख्यया नारायणाख्यया हिन्दीव्याख्यया च समेता) । सम्पादकः प्रसादवर्धनः कौण्डिन्न्यायनः । वाराणसी: चौखम्बा विद्याभवन, २००७।

5. *प्रौढमनोरमा* (लघुशब्दरत्न-भावप्रकाशिका-भावबोधिनि-सहितः)। सम्पादकः जयशङ्करलाल त्रिपाठी। वाराणसी : चौखम्बा कृष्णदास अकादमी, प्रथमभागः २०११।

6. *लघुशब्देन्दुशेखरः* (भैरवी-चन्द्रकला-वैकुण्ठी सहिता) । सम्पादकौ शिवप्रसाद शर्मा श्रीनिवासशर्मा च। वाराणसी : चौखम्बा सुरभारती प्रकाशन, प्रथमभागः २०१६।

7. *लघुसिद्धान्तकौमुदी* (भैमिव्याख्या सहिता) । सम्पादकः भीमसेन शास्त्री । दिल्ली : भैमी प्रकाशन, प्रथमभागः २०१९(दशमसंस्करणम्)।

8. *वैयाकरणसिद्धान्तकौमुदी* (श्रीधरमुखल्लासिनी हिन्दीव्याख्या सहिता) । सम्पादिका लक्ष्मी शर्मा । वाराणसी : चौखम्बा सुरभारती प्रकाशन, प्रथमभागः २०१७।

9. *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्त्वबोधिनी-सहिता) । गिरिधर शर्मा परमेश्वरानन्द च । दिल्ली : मोतिलाल बनाररसीदास, प्रथमभागः २०१०।

10. *व्याकरणमहाभाष्यम्* (भाष्यप्रदीपोद्द्योतसमुल्लसितम्) । भार्गव शास्त्री भिकाजी जोशी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, प्रथमभागः २०१४।

11. *व्याकरण दर्शनेर इतिहास* । गुरुपद हालदार। कलकाता : संस्कृत बुक डिपो, १९५४।

# The Cult of Gāyatrī: A Study[304]

## Keywords

Gāyatrī, Mantra, Devī, Goddess.

## Abstract

There is no other mantra in this World like the Gāyatrī Mantra which can fulfill all the desires of the man. Gāyatrī is the best-renowned mantra who possesses the magnanimous power to fulfill all. Gāyatrī is the Ṛgvedic Mantra, and this is very ancient like Ṛgveda. The meaning of this mantra 'Gāyatraṁ trāyate iti Gāyatrī' (Gāyatrī Mantra Sadhanā va Upāsanā.P.1.). Varāha Purāṇa says that Gāyatrī is Sarasvatī '*Kamalā sanaje devī Sarasvatī namostute'* (Varāha Purāṇa.28/29). In Bṛhadāraṇyaka Upaniṣad, Gāyatrī Mantra is regarded as Sūrya Mantra and Sāvitrī. Aiterya Brāhmaṇa says Gāyatrī is Brahmā 'yā gāyatrī tad Brahmaiva, Brahma vai gāyatrī' (Aitareya Brāhmaṇa. 3/3/34/3).

This paper defines the Gāyatrī and Her power and utilization of Gāyatrī, etc. in a very lucid manner and briefly also.

## Introduction

Gāyatrī concept is a concept of Vedic seers and that is unique. Gāyatrī is a meter and it takes an important place in Vedic mantras. And Gāyatrī is not only the mantra but she is worshipped as a renowned Goddess in Hindu religion. The Gāyātrī mantra is very pious and some people believe it as a protector mantra from evils. It is noticed and an amazing thing about reciting the Gāyatrī mantra, and one who chants this mantra can feel the temperature of his first within a few days. Gyāatrī mantra worships near standing the river, ocean, or a lake. And it is seen that sometimes the water level increases up to the knees or up to the chests. This is not physical but in another way, it is psychical. and

[304] **Dr. Nilachal Mishra**, At. Chandeswarsahi, p. O. Rajranpur, Dist. Nayagarh, Odisha, pin. 752026

Since 2010
ISSN- 0976-8645
UGC RN-41039

the Tibetan says it is Tummo. (The Hidden Power of Gāyatrī Mantra. P.42.). Gāyatrī Mantra possesses an important place among all other mantras. It has extraordinary power. Someone can gain Vedic rights after reciting ten times of this mantra in a Brahma Yajña. This Mantra plays a vital role at the time of Upanayana Saṁskāra in our Hindu family. Gāyatrī is called Vedamātā and repeller of all sins like Brahmahatyā, etc. ( Gāyatrī Mantra Sādhanā Va Upāsanā. Preface).

**Derivation of the word Gāyatrī**

The word Gāyātrī derives from the word gai and trā. *Yad gāyannatrāyata tad gāyatratvam* [1]. As per Chāndogyopaniṣad, Gāyatrī is called speech. Speech (Gāyati) or singing and protection mean trāyate. So speech is Gāyatrī. As per Bṛhadāraṇyakopaniṣad, Gāyatrī is protected of gayas, and the gayas are called the vital breaths. And Gāyatrī is the protector of the vital breaths. So it is said: gayān trāyate iti gāyatrī. So Gāyatrī refers to a meter and also a mantra. Gāyatrī is called meter, and it appeared as a meter in Ṛgveda, and 2500 to 3500 years back. And this mantra compounded twenty-four syllables. Gāyatrī mantra is seen as Gāyatrī meter in the first mantra of the first maṇḍala of the Ṛgveda. Goddess Gāyatrī is called Vedamātā, mother of the Vedas, and the birth of Gāyatrī is seen in Vedic literature. But the Gāyatrī meter contains three pādas means tripadā gāyatrī, which has eight letters in every pāda. So the meter of Gāyatrī contains twenty-four letters.

In Veda, the meter like Gāyatrī is praised as the glorious meter, although Gāyatrī meter is regarded as the smallest meter among all the meters [2]. The Gāyatrī mantra can enable the person to ascend to heaven. The meter like Gāyatrī is the mouth of all meters. In this Gāyatrī mantra, the word oṁ which defines the God, Bhūḥ expresses the earth, and the word Bhuvaḥ represents the regions which are covered all subdivisions of semi-gods and also covered to all the demigods towards the sun. and the word 'svaḥ' which expresses. Gāyatrī is called meter, and it has appeared as a meter in Ṛgveda, and 2500 to 3500 years back. And this mantra compounded the twenty-four syllables. Gāyatrī mantra is seen as Gāyatrī meter in the first mantra of the first maṇḍala of the Ṛgveda.

Goddess Gāyatrī is called vedamatā, mother of the Vedas, and the birth of Gāyatrī is seen in Vedic literature. But the Gāyatrī meter contains three pādas means tripadā gāyatrī, and which has eight letters in every pāda. So the meter of Gāyatrī contains twenty-four letters. The meaning of the third dimension or region of gods which is known as svarga loka, the place of supreme and which is also situated above.[3]

The evil and darkness are also removed by chanting of this Gāyatrī mantra, and the darkness of the night is also treated as the evil.[4] The Tāṇḍya Brāhmaṇa(8.10 ) describes the man who wants spiritual development he can chant the verses of Gāyatrī. Aitareya Brāhmaṇa [5] describes that Gāyatrī possesses eyes, wings, brilliance, and light, and also she brings heaven, and according to Atharva Veda.[6]. And Gāyatrī is called the origin of the immortal, and she gives offspring, cattle to the sacrificer[7]. The Kāṭhaka Saṁhitā describes that Gāyatrī who gives nectar in the heaven has told to bring the gods to the sacrifice, and she is already known and invocation and as well as the respect should be paid to her in Aśvamedha Sacrifice.[8]

**Gāyatrī is described as a Mantra and its application**

The mantra, Gāyatrī is described as a very famous mantra.

Tatsaviturvareṇyam bhargo devasya dhīmahī
Dhiyo yo naḥ pracodayāt//[9]

This is seen in Ṛgveda along with the two other mantras, Viśvāmitra is described as the seer of this mantra.

Gāyatrī mantra is used as daily devotions in day to day life of all Hindus and also it acts as a special worshipping in social activities. It is seen to be used especially in the Upanayana ceremony of all Hindu families .[10] Yajñopavīta or sacred thread is the symbol of purity, and it is a reminder for maintaining purity and it reminds the person of responsibility. It drives away all the evil from the

Since 2010
ISSN- 0976-8645
UGC RN-41039

human mind. And it reminds the man to lead a holy life.[11] Yajñopavīta has possessed the three symbols like Brahmā, Viṣṇu, and Śiva who are the Trinity in Hindu religion. It represents the three triads also like Mahāsarasvatī, Mahālakṣmī, and Mahākālī, and which are related to the three natures such as Sattva, Rajas, and Tamas; the past, present, and future, and the three states of human beings like a dream, awake, and sleep, and the three bodies gross, subtle, and casual. And it symbolizes the three lokas like heaven (Swarga), earth (Martya), and Pātāla.[12].

If someone dies at any home then the person has to change the old thread and make a new thread (yajñopavīta), and the same process is also adopted at the time of the birth of a new body at home. And, as per rules, the sacred thread should be changed once during the four months.[13]

Gāyatrī meditation in another word is known as Sandhyopāsanā or Sandhyāvandanā. The ancient genius of the Himalayas says that Gāyatrī is regarded as the highest meditation for brightness. If someone practices this meditation then he can able to realize the god very soon. Hence, practicing this spiritual meditation can give brilliance quickly.

Sandhyā means the middle period of the day and night means dawn and dusk, and the meaning of Upāsanā is the meditation, and which occurs during that moment. Practicing the meditation of Gāyatrī eradicates all the sins and the past karmas. The heart and the mind of the person became very purified by meditating on the Gāyatrī and it also reopens the third eye of illumination. Man can achieve long life, shining, and healthy bodies.[14]

Someone practices this Gāyatrī meditation four times in a day like early morning, afternoon, and evening and at midnight also. Some practice this Gāyatrī three times during a day. And there is some problem that arises then man can practice it at least twice a day like in the early morning and evening also.[15]

**Gāyatrī is described as Goddesses**

In yājñavalkya smṛti, Gāyatrī is described as Vedajananī (the mother of the Vedas), and Pāpanāśinī (repeller of all sins). The description of Smṛti is like this.

Gāyatryāstu paraṁ nāsti Devī
Ce ha ca pāvanam//[16]

Bhagavad-gītā describes that He is the Gāyatrī in the Veda ' Gāyatrī chandasāmaham' [17.] Gāyatrī is described as Devī in various places, and various types. once Nārāyaṇa said to Nārada 'O' great sage, hear me which are the Śaktis of the 24 syllables of Gāyatrī Devī, and these are described as Vāma Devī, Jāyā, Śāntā, Sarasvatī, Durgā, Kāntā, Vyāpinī, Vimalā, Vidrumā, Viśālesā, Tamopahāriṇī, Viśvayoni, Jayā, Sūkṣmā, Parāśobhā, Bhadrā, Padmālayā, and Tripadā.[18]

Some puranic scriptures describe that Gāyatrī is different from Sarasvatī, and married to Brahmā, the creator of the Universe. And Gāyatrī is also a Gurjar girl who helps the creator, Brahmā in Yajña. The first wife of Brahmā is Sāvitrī, and the second is Gāyatrī. Gāyatrī Devī is further described as a fierce Goddess who slew a demon, Vetrāsura, and this story was described in Varāha Purāṇa and the Mahābhārat also.[19]

Garuḍa Purāṇa says in a passage that Gāyatrī possesses a fair complexion and she wears a silk garment and she holds a rose in her hand and she sears on a lotus also.[20]

The Skanda Purāṇa [21] describes the heart of the divine word like oṁkāra and which produces the sound of vaṣaṭ. Gāyatrī which is very excellent and possesses the syllables of twenty-four, and she had three feet, five heads and six sides mean 'Ṣatkukṣiḥ', and also she has a very melodious voice and she became very famous and called Devī Sāvitrī.

In Padma Purāṇa of Sṛṣṭi Khanḍa, [22] describes Gāyatrī is called the mother of the Vedas, and she is sanctified with the eight letters and who has strong arms and very soft like a banana stalk. She holds a deer horn in her hand and it also mentions that she is the wife of a sacrifice in a Vedic sacrifice.

Gāyatrī Devī in the early morning is described as a young girl who has a red complexion and dazzles like the morning sun and also she wears red garments and a garland of red color. Gāyatrī Devī possesses three heads and four hands and who sits on a swan. She is always seated on Varadā Mudrā

Since 2010
ISSN- 0976-8645
UGC RN-41039

and who has Kāmadhenu in one hand and the other two hands are shown in Abhaya Mudrā. She is related to Ṛgveda and Brahmā, the creator of the Universe. She holds a conch, disc, and she bears four hands and she has existed in Abhaya Mudrā and seated on Garuḍa an also. She connects with Viṣṇu and Sama Veda as Sarasvatī and also considers the Sarvaloka.

As per Liṅga Purāṇa [23] Gāyatrī is known as Māheśvarī who is born from the mouth of Maheś, and she has four feet, four heads, four eyes, four breasts, four horns, and also she possesses thirty-two qualities. In another place of this Liṅga Purāṇa [24] Gāyatri is described as the daughter of Brahmā in the shape of a cow and she describes as the origin of this creation.

**Conclusion**

From the above discussions, it is concluded that Gāyatrī is the creator of the Universe in various forms as a Goddesses. And she is the origin of all the mantras and like a mantra; she is the cause of the Upanayana Saṁskāra of all Hindus. Man can get his success in his life and fulfill his desires by reciting the Gāyatrī because she is the fulfiller of all desires. At last, it is said that the Gāyatrī Cult will exist in this creation till the existence of human society forever and there is no doubt.

**Footnotes**

1.Jaiminīya Brāhmaṇa.I.III.
2.Taittirīya Saṁhitā.6.1.6.3-4.
3.Gāyatrī.P.59.
4.Kaustakī Brāhmaṇa.17.6., Gopatha Brāhmaṇa.1.5.15., Aitareya Brāhmaṇa. 2.17.
5.Aiterya Brāhmaṇa.4.2.3.
6.Atharva Veda.13.3.20.
7. Taittirīya Saṁhitā.2.6.1.7.
8. Kāṭhaka Saṁhitā. 43.2,51.1.
9. Ṛgveda.3.62.10.
10. Gobhila Gṛhya Sūtra. 2.10. 30., Hiranyakeshi Gṛhya Sūtra.6. 6.,Āpastamba Gṛhya Sūtra. 4.11.9., Pāraskara Gṛhya Sūtra. 2.3.3.
11.Gāyatrī.The Highest Meditation. P.54.
12.Gāyatrī. The Highest Meditation.P.54.
13.Gāyatrī. The Highest Meditation.P.54.
14.Gāyatrī. The Highest Meditation.P.56.
15.Gāyatrī. The Highest Meditation.P.56-57.
16.Yājñyavalkya Smṛti. 2.25.
17.Bhagavad Gītā.10.35.
18.Gāyatrī. The Secret Power.
19.Wikipedia.
20.Garuḍa Purāṇa.1.205.70-72.
21.Skanda Purāṇa.2.52.8-10.
22. Padma Purāṇa.17.309-335.
23.Linga Purāṇa.1.13.5-7.
24.Linga Purāṇa.1.16.33.

## Bibliography


1. Satapathy, Chaturbhuja., Cult of Gāyatrī., The Mishrarāga Yearly Magazine.,2009-10.
2. Keshavadas, Sadguru Sant., Gāyatrī The Highest Meditation., Motilal Banarsidass Publishers Private Limited, Delhi.
3. en. Wikipedia.org.
4. Shukla. Arun Kumar., Gāyatrī The Secret Power., The Benaras Mercantile Company, Kolkata.
5. Srivastava, C. M., Gāyatrī Mantra Sadhana Va Upasana., Manoj Publications, Delhi.
6. Padma Purāṇa. Gītā Press, Gorakhpur.
7. Linga Purṇāṇa. Gītā Press, Gorakhpur.
8. Skanda Purāṇa. Gītā Press, Gorakhpur.
9. Garuḍa Purāṇa. Gītā Press, Gorakhpur.
10. Swami Om, The Hidden Power Of Gāyatrī Mantra., Jaico Publishing House, Mumbai.
11. Joshi, K.L., Trivedi, Bindiya, Bimali, O.N., 112 Upaniṣads, Parimal Publications, Delhi.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

# एकादेशविषये पाणिनीयकातन्त्रव्याकरणयोः तुलनात्मकमध्ययनम्[305]

## प्रमुखशब्दाः

गुणैकादेशः, वृद्धिरेकादेशः, पररूपैकादेशः, दीर्घैकादेशः, पूर्वरूपैकादेशः,

## शोधसार

श्रीमता पाणिनिमुनिना तदीयाष्टाध्यायीग्रन्थे एकादेशसन्धिं निरूपयितुं **'एकः पूर्वपरयोः'** (*अष्टाध्यायी,*अ$_{0}$६/१/८४) इति सूत्रं प्रणीतम्। अधिकारोऽयम्, **'ऋत उत्'**(अ$_{0}$६/१/१११) इति यावत्। तत्र पर्यन्तं यद् वक्ष्यति तत्र पूर्वपरयोः स्थाने एकादेशो भवति इति वेदितव्यम्। अष्टाध्यायीग्रन्थे सन्धिविषये पञ्चविध एकादेशः परिलक्ष्यते-१.गुणैकादेशः, यथा- उप + इन्द्रः = उपेन्द्रः। २.वृद्धिरेकादेशः, यथा- कृष्ण + एकत्वम् = कृष्णैकत्वम्। ३.पररूपैकादेशः, यथा- प्र + एजते = प्रेजते। ४.दीर्घैकादेशः, यथा- दैत्य + अरिः = दैत्यारिः। ५.पूर्वरूपैकादेशः, यथा- हरे + अव = हरेऽव। परन्तु कातन्त्रव्याकरणे एतादृश एकादेशो न उपलभ्यते। कातन्त्रव्याकरणे अस्मिन् विषये पूर्ववर्णे आदेशः परवर्णस्य लोपो विधीयते। अत उभयोः व्याकरणयोः सूत्राणां मध्ये सादृश्यो वैसादृश्य अस्ति वा इति प्रश्नः सर्वथा सम्भूयत एव। प्रभृतिविषयणामुपरि तुलनात्मकमध्ययनमस्य शोधप्रबन्धस्य प्रमुखोद्देश्यः।

## मूलप्रबन्धः

पाणिनिमुनिना **'एकः पूर्वपरयोः'**(अ$_{0}$६/१/८४) इति पदद्वयात्मकमधिकारसूत्रमिदं प्रणीतम्। सूत्रमिदमुत्तरत्रानुवृत्तिर्भवति। इत आरभ्य **'ख्यत्यात्परस्य'**(अ$_{0}$६/१/११२) इति सूत्रात् प्राक् अयमधिकारः। अस्मिन्नधिकारे विधीयमान आदेशः पूर्वपरयोः स्थाने एक एव कर्तव्यः। पाणिनीयव्याकरणे एकादेशसन्धिं निरूपयितुं पञ्चविध एकादेशः कृतः, यथा- गुणैकादेशः, वृद्धिरेकादेशः, पररूपैकादेशः, दीर्घैकादेशः, पूर्वरूपैकादेशः । अत्र सर्वत्र विधीयमान आदेशः पूर्वपरयोः द्वयोः स्थाने एक एव भवति। अपि च पाणिनीयव्याकरणे गुण-वृद्ध्यादि[306] कृत्रिमसंज्ञा कृता। परवर्तीकाले अपाणिनीयव्याकरणेषु शर्ववर्मना रचितं कातन्त्रव्याकरणे गुण-वृद्ध्यादि संज्ञा न प्राप्यते। अतः सारल्यार्थं गुणादि शब्दाः सूत्रेऽपि प्रयोगो न कृतः। पाणिनिव्याकरणे उल्लिखितः पञ्चविध एकादेशः कातन्त्रव्याकरणे अन्यप्रकारेण समर्थितः। गुणादि एकादेशो विषयाणामुपरि पाणिनीयकातन्त्रव्याकरणयोः तुलनात्मकमालोचनं करिष्यते।

**१.गुणैकादेशः-** गुणैकादेशविषये पाणिनिमुनिना सूत्रं प्रणीतम्- **'आद् गुणः'**(अ$_{0}$६/१/८७)। आद् पञ्चम्यन्तम्, गुणः प्रथमान्तम्, द्विपदमिदं सूत्रम्। **'इको यणचि'**(अ$_{0}$६/१/७७) सूत्रात् 'अचि' इत्यनुवर्तते, **'एकः पूर्वपरयोः'**(अ$_{0}$६/१/८४) इत्यधिकृतम्। अतः सूत्रार्थो भवति- 'अवर्णान्तात्परो योऽच्, अचि च पूर्वो योऽवर्णः, तयोः पूर्वपरयोरवर्णाचोः स्थाने एको गुण आदेशो भवति।'[307] उदाहरणं यथा- 'रमा + ईशः' इति स्थिते **'अदेङ्गुणः'**(अ$_{0}$१/१/८७) **'स्थानेऽन्तरतमः'** (अ$_{0}$१/१/५०) इतिसूत्रद्वयसहकारेण **'आद् गुणः'** (अ$_{0}$६/१/८७) इत्यनेन

---

[305] उत्तम-माझिः, शोधछात्रः, संस्कृत-पालि-प्राकृत-विभागः, भाषाभवनम्, विश्वभारती विश्वविद्यालयः, शान्तिनिकेतनम्, पश्चिमवङ्ग

[306] अदेङ् गुणः(अ$_{0}$१/१/२), वृद्धिरादैच्(अ$_{0}$१/१/१)

[307] 'अदेङ् गुणः'(अ$_{0}$१/१/२)इति सूत्रस्य काशिकावृत्तिः।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

अकारस्य ईकारस्य च स्थाने कण्ठतालुस्थानकयोः गुणैकादेशे एकारे 'रमेशः' इति पदं सिध्यति। गङ्गा + उदकम् इति स्थिते **'अदेङ्गुणः'** (अ०१/१/८७) **'स्थानेऽन्तरतमः'** (अ०१/१/५०) इतिसूत्रद्वयसहकारेण **'आद् गुणः'** (अ०६/१/८७) इत्यनेन आकारस्य उकारस्य च स्थाने कण्ठोष्ठस्थानकयोः गुणैकादेशे ओकारे 'गङ्गोदकम्' इति पदं सिद्धम्। कृष्णर्द्धिरित्यत्र कृष्ण + ऋद्धिरिति स्थिते **'आद् गुणः'** (अ०६/१/८७) इत्यनेन अकारस्य ऋकारस्य च स्थाने गुणैकादेशः प्राप्तः। परन्तु अकार ऋकारश्चेति द्वौ स्थानिनौ, त्रयोरादेशाः गुणवर्णाः (अ,ए,ओ) प्रसक्ताः। एवं तवल्कार इत्यत्र 'तवल + लृकारः' स्थिते **'आद् गुणः'** (अ०६/१/८७) इत्यनेन अकारस्य लृकारस्य च स्थाने गुणैकादेशः प्राप्तः। अत्रैव अकार ऋकारश्चेति द्वौ स्थानिनौ, त्रयोरादेशाः गुणवर्णाः(अ,ए,ओ) प्रसक्ताः। परन्तु अकाराद् ऋकारे परे, लृकारे वा परे ऋकारलृकारयोस्तुल्यः कोऽपि गुणवर्णो नास्ति। अतः कतमो गुणवर्णो भवतीत्याकाङ्क्षा। **'उरण् रपरः'**(अ०१/१/५१) इत्यनेन ऋलृ स्थानीयोऽण् रप्रत्याहारपरः सन्नेव प्रवर्तते। अतः "त्रिषु गुणेषु प्रसज्यमानेषु अकारस्य अणो रेफलकारशिरस्कतया तस्य अर् अल् इत्येवमात्मकस्य अकारांशे स्थानिभूतेन अकारेण, रेफांशे ऋकारेण, लकारांशे लृकारेण च स्थानसाम्यादकारऋकारयोः स्थाने अरेव भवति, अकारलृकारयोः स्थाने अलेव भवति। एकारौकारौ तु गुणौ न भवत एव, तयोः ऋकारेण लृकारेण च स्थानसाम्याभावादित्यर्थः।"[308]

कातन्त्रव्याकरणे अस्मिन् विषये पृथक् चत्वारि सूत्राणि कृतानि। प्रथमसूत्रम्- **'अवर्ण इवर्णे ए'**(*कातन्त्रव्याकरणम्*, का०व्या०१/२/२)। अत्र **'समानः सवर्णे दीर्घीभवति परश्च लोपम्'**(का०व्या०१/२/१) इत्यतः 'परश्च लोपम्' इति अनुवर्तते। अतः सूत्रस्य अर्थो भवति- अवर्णात् इवर्णे ईवर्णे वा परे एकारो भवति परश्च लोपमापद्यते। यथा- तव + इहा इति स्थिते वकारोत्तरवर्ती अकारेण सह 'इहा' शब्दस्य इकारं समेत्य वकारोत्तरवर्ती अकारस्य एकारो भवति परस्य इकारस्य च लोपे तवेहा इति रूपं सिध्यति। अनुरूपेण सा + इयम् = सेयम् इति रूपं सिध्यति। सूत्रे वर्णग्रहणं किमर्थम्? वृत्तिकारेण उक्तम्- "वर्णग्रहणे सवर्णग्रहणम्"[309] अस्मिन् विषये त्रिलोचनेन स्पष्टं कृतम्-"वर्णशब्दोऽयं स्वभावात् समानेभ्यः श्रुतो यस्य वर्णस्य येन वर्णेन सह सवर्णसंज्ञा तयोः समुदायमाह। एतेन यथासंख्यमपि निरस्तं भवति। न ह्यवर्णादिशब्दो ह्रस्वदीर्घक्रमेण व्यवस्थितं वर्णमाह। किन्तर्हि सवर्णव्यवहारश्च व्यतिक्रमेणापि निश्चित इति कुतो यथासंख्यम्। अत एव ह्रस्वस्य दीर्घस्य च ह्रस्वे दीर्घे च दर्शितम्।"[310] **'समानः सवर्णे दीर्घीभवति परश्च लोपम्'**(का०व्या०१/२/१) इति सूत्रात् चकारस्य अनुवृत्तेः किं प्रयोजनम् ? वृत्तिकारेण उक्तम् "चकाराधिकारोऽनुक्तसमुच्चयार्थः, तेन क्वचित् पूर्वोऽपि लुप्यते।"[311] अतो हल + ईषा, लाङ्गल + ईषा इत्यत्र लकारोत्तरवर्त्ती अकारस्य लोपे हलीषा, लाङ्गलीषा प्रभृतिरूपाणि सिध्यति। मनस् + ईषा इति स्थिते नकारोत्तरर्ती अकारस्य लोपः परन्तु सकारस्य लोपः कथं भवेत्? चकारस्यानुक्तसमुच्चयार्थत्वात् लोकोपचाराद्वा सकारस्य लोपे मनीषा इति पदं सिध्यति।[312]

---

[308]'उरण् रपरः'(अ०१/१/५१) सूत्रस्य बालमनोरमा टीका।

[309]'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इति सूत्रस्य दुर्गवृत्तिः।

[310]'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इति सूत्रस्य विवरणपञ्जी।

[311]'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इति सूत्रस्य दुर्गवृत्तिः।

[312]'मनसः सकारलोपः कथं स्यात् नकारस्याकारलोपे सति संयोगान्तलक्षण इति चेन्न, सकारेण व्यवधानादकारस्यैव लोपः कथं

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

कातन्त्रव्याकरणे अवर्ण उवर्णे ओकारः प्रयोगार्थं द्वितीयसूत्रं कृतम्- **'उवर्णे ओ'**(का०व्या०१/२/३)। अस्मिन् सूत्रे पूर्ववर्ती **'अवर्ण इवर्णे ए'** (का०व्या०१/१/२) सूत्रतः 'अवर्णः', **'समानः सवर्णे दीर्घीभवति परश्च लोपम्'** (का०व्या०१/२/१) इति सूत्रात् 'परश्च लोपम्' इति अनुवर्तते। अत एव सूत्रार्थो भवति- अवर्णात् उवर्णे ऊवर्णे वा परे एकारो भवति परश्च लोपमापद्यते। यथा- तवोहनम् इत्यत्र तव + उहनम् इति स्थिते वकारोत्तरवर्ती अकारेण सह उहनं शब्दस्य उकारं समेत्य वकारोत्तरवर्ती अकारस्य ओकारो भवति परस्य उकारस्य च लोपो भवति। अनुरूपेण गङ्गा + उदकम् = गङ्गोदकम् इति रूपं सिध्यति।

कातन्त्रकारेण तवर्कारः सर्कारेण प्रभृतिपदानां कृते **'ऋवर्णे अर्'** (का०व्या०१/२/४) इति तृतीयसूत्रं कृतम्। अस्मिन् सूत्रे पूर्ववर्ती **'अवर्ण इवर्णे ए'**(का०व्या०१/२/२) सूत्रतः 'अवर्णः', **'समानः सवर्णे दीर्घीभवति परश्च लोपम्'**(का०व्या०१/२/१) इति सूत्रात् 'परश्च लोपम्' इति अनुवर्तते। अतः सूत्रस्य अर्थो भवति- अवर्णात् ऋवर्णे परे ऋकारो भवति परश्च लोपमापद्यते। तव + ऋकार इति स्थिते सन्धिकार्ये वकारोत्तरवर्ती अकारस्य ऋकारो भवति परस्य ऋकारस्य च लोपे तवर्कार इति पदं सिध्यति । अनुरूपेण सा +ऋकारेण = सर्कारेण इति रूपं सिध्यति।

प्रार्च्छति इति पदस्य कृते वृत्तिकारेण उक्तम्- **'ऋति धातोरुपसर्गस्य दीर्घः'**[313] इत्यनेन धातोः ऋकारे उपसर्गस्य योऽरादेशस्तस्य दीर्घो भवति परश्च लोपमापद्यते। प्रार्षभीयतीति पदस्य कृते वृत्तिकारेण उक्तम्- **'नामधातोर्वा'**।[314] इत्यनेन नामधातोर्ऋऋकारे उपसर्गस्य योऽरादेशस्तस्य वैकल्पिके दीर्घो भवति परश्च लोपमापद्यते। पक्षे **'ऋवर्णे अर्'**(का०व्या०१/२/४) इत्यनेन प्रर्षभीयतीति रूपमपि भवति।

कातन्त्रकारेण तवल्कारेण सल्कारेण प्रभृतिपदानि साधनार्थं **'ऌवर्णे अल्'**(का०व्या०१/२/५) इति चतुर्थसूत्रं कृतम्। अत्रापि **'समानः सवर्णे दीर्घीभवति परश्च लोपम्'**(का०व्या०१/२/१) इति सूत्रात् 'परश्च लोपम्' इति अनुवर्तते। अत एव सूत्रस्य अर्थो भवति- अवर्णात् ऌवर्णे परे ऋकारो भवति परश्च लोपमापद्यते। तवल्कारेण इत्यत्र तव + ऌकारेण इति स्थिते वकारोत्तरवर्ती अकारस्य ऌकारो भवति परस्य ऌकारस्य च लोपो भवति । उपाल्कारीयतीति पदस्य कृते वृत्तिकारेण उक्तम्- **'उपसर्गस्य वा ऌति धातोरलो दीर्घः'**[315] इत्यनेन नामधातोः ऌकारे परे उपसर्गस्य योऽलादेशस्तस्य वैकल्पिके दीर्घो भवति परश्च लोपमापद्यते। पक्षे **'लवर्णे अल्'**(का०व्या०१/२/५) इत्यनेन उपल्कायतीति रूपमपि भवति।

अतः पाणिनीयव्याकरणे रमेशः, गङ्गोदकम्, कृष्णर्द्धिः, तवल्कारः प्रभृतीनां पदानां कृते **'आद् गुणः'**(अ०६/१/८७) इति सूत्रं कृतम्। अपि च **'एकः पूर्वपरयोः'**(अ०६/१/४१) **'अदेङ्गुणः'** (अ०१/१/८७) इति सूत्रद्वयं **'आद् गुणः'**(अ०६/१/८७) इति सूत्रस्य अर्थबोधार्थं प्रयोजनमस्ति। स्थानप्रयत्नविचारार्थं **'स्थानेऽन्तरतमः'** (अ०१/१/५०) सूत्रस्य प्रयोजनमस्ति। अपि च कृष्णर्द्धिः, तवल्कारः पदयोः कृते **'उरण्रपरः'**(अ०१/१/५१) इति सूत्रस्यापि प्रयोजनमस्ति। अस्मिन् विषये कातन्त्रव्याकरणे पृथक्

---

स्यात् ? सत्यम् अत एव चकारस्यानुक्तसमुच्चयार्थत्वात् लोकोपचाराद्वा सकारस्यापि लोप इति।' 'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इति सूत्रस्य विवरणपञ्जी

313 'ऋवर्णे अर्'(का०व्या०१/२/४) सूत्रस्य दुर्गवृत्तिः।

314 तदेव

315 'ऌवर्णे अल्'(का०व्या०१/२/५) सूत्रस्य दुर्गवृत्तिः।

Since 2010
ISSN- 0976-8645
UGC RN-41039

चत्वारि सूत्राणि कृतानि । अपि च पूर्ववर्णस्य लोपस्य कृते पूर्वसूत्रात्[316] 'परश्च लोपम्' इति अनुवृत्तं कृतम्। पाणिनीयव्याकरणे गुणसंज्ञा[317], प्रत्याहासंज्ञा[318] कृता तदन्तरं प्रयोगविषये सूत्रं कृतम् । परन्तु कातन्त्रव्याकरणे पृथक् गुणादि संज्ञा न कृता, केवलं प्रयोगसूत्रेण उद्देश्यं साधितम्।

**२.वृद्धिरेकादेशः**

वृद्धिरेकदेशो विषये श्रीमत्पाणिनिमुनिना सूत्रं प्रणीतम्- '**वृद्धिरेचि**'(अ०६/१/८८)। वृद्धिः प्रथमान्तम्, एचि सप्तम्यन्तम्, द्विपदमिदमं सूत्रम्। '**आद्गुणः**'(अ०६/१/८७) इति सूत्रात् 'आत्' इति पदम्, '**संहितायाम्**'(अ०६/१/७२) इति सूत्रमनुवर्तते। अपि च '**एकः पूर्वपरयोः**'(अ०६/१/८४) इत्यधिकृतम्। अतः सूत्रार्थो भवति- आदेचि परे वृद्धिरेकादेशः स्यात्। सूत्रमिदम् '**आद्गुणः**'(अ०६/१/८७) सूत्रस्यापवादम्। उदाहरणं यथा- कृष्णैकत्वम् इत्यत्र कृष्ण + एकत्वम् इति स्थिते '**वृद्धिरादैच्**'(अ०६/१/८८) '**स्थानेऽन्तरतमः**'(अ०१/१/५०) इतिसूत्रद्वयसहकारेण '**वृद्धिरेचि**'(अ०६/१/८८) इत्यनेन पूर्वपरयोर्वृद्धिरेकादेशे औकारे कृष्णैकत्वमिति रूपं सिद्ध्यति। तदेव गङ्गा + ओघः = गङ्गौघः, देव + ऐश्वर्यम् = देवैश्वर्यम् रूपं सिध्यति।

वृद्धिरेकादेशो विषये द्वितीयसूत्रं प्रणीतम्- '**एत्येधत्यूठ्सु**'(अ०६/१/८९)। एतिश्च, एधतिश्च, ऊठ् च तेषाम् इतरेतरयोगद्वन्द्वः, एत्येधत्यूठः, तेषु एत्येधत्यूठ्सु सप्तम्यन्तम् एकपदं सूत्रमिदम्। '**आद्गुणः**'(अ०६/१/८७) इति सूत्रात् 'आत्' इति पदम्, '**वृद्धिरेचि**'(अ०६/१/८८) सूत्रात् 'एचि' इति पदं '**संहितायाम्**'(अ०६/१/७२) इति सूत्रमनुवर्तते। अपि च '**एकः पूर्वपरयोः**'(अ०६/१/८४) इत्यधिकृतम्। 'यस्मिन्विधिस्तदादावल्ग्रहणे'[319] इत्यनेन तदादिविधिर्भवतीति।[320] सूत्रार्थो भवति- अवर्णात् एजाद्योः एत्येधत्योः ऊठि च परे पूर्वपरयोः स्थाने वृद्धिरादेशो भवतीति। उदाहरणं यथा- उपैति इत्यत्र उप + एति इति स्थिते '**एङि पररूपम्**'(अ०६/१/९४) इत्यनेन पररूपे प्राप्ते '**एत्येधत्यूठ्सु**'(अ०६/१/८९) इत्यनेन वृद्धिर्विधीयते, '**स्थानेऽन्तरतमः**'(अ०१/१/५०) इत्यनेन कन्ठतालुस्थानजनकत्वधर्मेण अन्तरतम ऐकारो भवति। एवम् उप + एधते = उपैधते इति रूपं सिद्ध्यति। प्रष्ठौहः इत्यत्र प्रष्ठ + ऊह इति स्थिते अवर्णात् ऊठि परे पूर्वपरयोः स्थाने '**आद्गुणः**'(अ०६/१/८७) इत्यनेन गुणः प्रसज्यते, गुणं बाधित्वा '**एत्येधत्यूठ्सु**'(अ०६/१/८९) इत्यनेन पूर्वपरयोर्वृद्धिरेकादेशो ऐकारो भवति।

वृद्धिरेकादेशो विषये पाणिनिमुनिना प्रणीतमपरं सूत्रम्- '**उपसर्गादृति धातौ**' (अ०६/१/९२)। अत्र उपसर्गात् पञ्चम्यन्तम्, ऋति सप्तम्यन्तम्, धातौ सप्तम्यन्तं त्रिपदमिदं सूत्रम्। ''उपसर्गविशेषणम्, अतस्तदन्तविधिः - अरान्तादिति लभ्यते। ऋतीति धातोर्विशेषणम्। यस्मिन्विधिरिति तदादिविधिः। अकारादविति लभ्यते।''[321] अत सूत्रार्थो भवति- अवर्णान्तादुपसर्गादृकारादौ धातौ परे पूर्वपरयोः स्थाने वृद्धिरेकादेशः स्यात्। उदाहरणम्- प्रार्च्छति, उपार्च्छति इत्यत्र प्र +

---

[316] 'समानः सवर्णे दीघीर्भवति परश्च लोपम्'(का०व्या०१/२/१)

[317] 'अदेङ्गुणः' (अ०१/१/८७)

[318] 'आदिरन्त्येन सहेता'(अ०१/१/७१)

[319] परिभाषेन्दुशेखरः,परिभाषा ३३।

[320] 'यस्मिन्विधिः' इति तदादिग्रहणम्, एजादाविति लभ्यते, तच्च एत्येधत्योरेव विशेषणम्, न तु ऊठः, असंभावात्। अ०६/१/८९ सूत्रस्य बालमनोरमा टीका

[321] 'उपसर्गादृति धातौ'(अ०६/१/९१) सूत्रस्य बालमनोरमा टीका।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

ऋच्छति, उप +ऋच्छति इत्यवस्थायां **'आद्गुणः'**(अ०६/१/८७) इत्यनेन गुणे प्राप्ते 'उपसर्गादृति धातौ'(अ०६/१/९२) इत्यनेन पूर्वपरयोर्वृद्धिरेकादेशे आकारे **'उरण् रपरः'**(अ०१/१/५१) इत्यनेन रपरत्वे वृद्धिरेव विधीयते।

वृद्धिरेकादेशविषये अपरं सूत्रम् -**'वा सुप्यापिशलेः'**(अ०६/१/९२)। 'वा' अव्ययम्, 'सुपि' सप्तम्यन्तम्, 'आपिशलेः' षष्ठ्यन्तम्। **'आद्गुणः'**(अ०६/१/८७) इत्यतः 'आत्', **'वृद्धिरेचि'**(अ०६/१/८८) इत्यतः 'वृद्धिः', 'उपसर्गादृति धातौ'(अ०६/१/९२) इति पूर्वसूत्रं चानुवर्तते। **'एकः पूर्वपरयोः'**(अ०६/१/४१) चाधिकृतम्। अस्मिन् सूत्रे **'येन विधिस्तदन्तस्य'**(अ०१/१/७२) इत्यनेन तदन्तविधिर्भवति।[322] अतः सूत्रस्यार्थो भवति-अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे पूर्वपरयोः स्थाने वृद्धिरेकादेशो वा भवति। उदाहरणं यथा- प्र + ऋषभीयति इत्यत्र **'वा सुप्यापिशलेः'**(अ०६/१/९२) इत्यनेन वैकल्पिके पूर्वपरयोर्वृद्धिरेकादेशे आकारे **'उरण् रपरः'**(अ०१/१/५१) इत्यनेन रपरत्वे प्रार्षभीयतीति, वृद्ध्यभावपक्षे तु प्र + ऋषभीयति इत्यत्र **'आद्गुणः'**(अ०६/१/८७) इत्यनेन पूर्वपरयोर्गुणैकादेशे अकारे **'उरण् रपरः'**(अ०१/१/५१) इत्यनेन रपरत्वे प्रर्षभीयतीति रूपं सिद्धम्। उप + ऌकारीयति इत्यत्र **'वा सुप्यापिशलेः'**(अ०६/१/९२) इत्यनेन वैकल्पिके पूर्वपरयोर्वृद्धिरेकादेशे आकारे **'उरण् रपरः'**(अ०१/१/५१) इत्यनेन रपरत्वे आन्तरतम्याद् लकारे उपाल्कारीयति, वृद्ध्यभावपक्षे तु **'आद्गुणः'**(अ०६/१/८७) इत्यनेन पूर्वपरयोर्गुणैकादेशे अकारे **'उरण् रपरः'**(अ०१/१/५१) इत्यनेन रपरत्वे लकारे उपल्कारीयतीति रूपं सिद्धम्।

कातन्त्रव्याकरणे अस्मिन् विषये पृथक् सूत्रद्वयं कृतम्। प्रथमसूत्रं **'एकारे ऐ ऐकारे च'** (का०व्या०१/२/६)। अस्मिन् सूत्रे 'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इत्यतः 'अवर्णः', **'समानः सवर्णे दीर्घीभवति परश्च लोपम्'**(का०व्या०१/२/१) इत्यतः 'परश्च लोपम्' इति अनुवर्तते। अतः सूत्रार्थो भवति- अवर्णात् एकारे ऐकारे च परे ऐकारो भवति परश्च लोपमापद्यते। यथा- तव + एषा इत्यत्र वकारोत्तरवर्ती अकारेण सह एकारं समेत्य वकारोत्तरवर्ती अकारस्य ऐकारो भवति एषा इति पदस्य एकारस्य च लोपो भवति। अनुरूपेण सा + ऐन्द्री = सैन्द्री इति रूपं सिद्ध्यति।

द्वितीयसूत्रम्- **'ओकारे औ औकारे च'**(का०व्या०१/२/७)। अस्मिन् सूत्रे 'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इत्यतः 'अवर्णः', 'समानः सवर्णे दीर्घीभवति परश्च लोपम्'(का०व्या०१/२/१) इत्यतः 'परश्च लोपम्' इति अनुवर्तते। अतः सूत्रार्थो भवति- अवर्णात् ओकारे औकारे च परे औकारो भवति परश्च लोपमापद्यते। यथा- तव + ओदनम् इत्यत्र वकारोत्तरवर्ती अकारेण सह ओदनमिति ओकारं समेत्य वकारोत्तरवर्ती अकारस्य औकारो भवति परस्य ओकारस्य च लोपो भवति। अनुरूपेण सा + औपगवी = सौपगवी इति रूपं सिध्यति।

सूत्रे चकाराधिकारवलात् उपसर्गसम्बन्धिनोऽवर्णस्य लोपो भवति धातोरेदोतोः परयोः।[323] यथा- प्र+ एलयति इत्यत्र **'एकारे ऐ ऐकारे च'** (का०व्या०१/२/६) इत्यनेन ऐकारप्राप्तं बाधित्वा चकाराधिकारवलात् एलयतीति धातोरेकारे परे प्र-उपसर्गस्य अकारस्य लोपे प्रेलयतीति रूपं सिध्यति। प्र+ओखति इत्यत्र

---

[322] 'आदित्यनेन उपसर्गादिति विशेष्यत इति तदन्तविधिः'। (अ०६/१/९२ सूत्रस्य बालमनोरमा टीका)

[323] 'चकाराधिकारादुपसर्गावर्णलोपो धातोरेदोतोः' (का०व्या०१/२/७ सूत्रस्य दुर्गवृत्तिः)

Since 2010
ISSN- 0976-8645
UGC RN-41039

**'ओकारे औ औकारे च'**(का०व्या०१/२/७) इत्यनेन ओकारे प्राप्ते चकाराधिकारवलात् तं बाधित्वा ओखतीति धातोरेकारे परे प्र- उपसर्गस्य अकारस्य लोपे प्रोखतीति रूपं सिध्यति।

परन्तु उप + एति , उप + एधते इत्यत्र **'एकारे ऐ ऐकारे च'** (का०व्या०१/२/६) इत्यनेन ऐकारप्राप्तं बाधित्वा चकाराधिकारवलात् एति-एधति-धातोरेकारयोः परयोः प्र- उपसर्गस्य अकारस्य लोपे उपैति उपैधते इत्येतेषां रूपाणां सिद्धिर्न भवति। परन्तु उपसर्गसम्बधिनोऽवर्णस्य लोपो न भवति इणेधत्योः सम्बधिनि एकारे परे।[324] अतः उप + एति, उप + एधते इत्यत्र **'एकारे ऐ ऐकारे च'** (का०व्या०१/२/६) इत्यनेन पकारोत्तरवर्ती अकारेण सह एकारं समेत्य वकारोत्तरवर्ती अकारस्य ऐकारो भवति परस्य एकारस्य च लोपे उपैति उपैधते इति रूपं सिध्यति।

उपसर्गसम्बन्धिनोऽवर्णस्य लोपो भवति वा, नामधातोरेदोतोः परयोः।[325] उदाहरणं यथा- उप + एकीयति इत्यत्र पकारोत्तरवर्ती उपसर्गसम्बन्धिनोऽवर्णस्य वैकल्पिके लोपे उपेकीयति इति रूपं सिद्धम्। पक्षे तु उप + एकीयति इत्यत्र 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६) इत्यनेन पकारोत्तरवर्ती अकारेण सह एकारं समेत्य वकारोत्तरवर्ती अकारस्थाने ऐकारो भवति परस्य एकारस्य लोपे उपैकीयति इति रूपं सिध्यति। अपि च प्र + ओषधीयति इत्यत्र पकारोत्तरवर्ती उपसर्गसम्बन्धिनोऽवर्णस्य वैकल्पिके लोपे प्रोषधीयतीति रूपं सिद्धम्। पक्षे तु प्र + ओषधीयति इत्यत्र **'ओकारे औ औकारे च'** (का०व्या०१/२/७) इत्यनेन पकारोत्तरवर्ती अकारेण सह ओकारं समेत्य वकारोत्तरवर्ती अकारस्थाने औकारो भवति परस्य ओकारस्य लोपे प्रौषधीयतीति रूपं सिध्यति।

अतः कृष्णैकत्वम्, देवैश्वर्यम् इति पदानां कृते पाणिनिव्याकरणे सूत्रं कृतम्- **'वृद्धिरेचि'**(अ०६/१/८८)। परन्तु कातन्त्रव्याकरणे सारल्यार्थं अस्मिन् विषये पृथक् **'एकारे ऐ ऐकारे च'** (का०व्या०१/२/६) ,**'ओकारे औ औकारे च'**(का०व्या०१/२/७) इति सूत्रद्वयं कृतम्। उपैति, उपैधते इति पदस्य कृते -**'एत्येधत्यूठ्सु'**(अ०६/१/८९) पाणिनिमुनिना कृता। किन्तु कातन्त्रकारेण **'एकारे ऐ ऐकारे च'** (का०व्या०१/२/६)इति सूत्रानुसारेण पद्वदयं समर्थितम्। प्रार्च्छति, उपार्च्छति पदानां कृते पाणिनिव्याकरणे **'उपसर्गादृति धातौ'**(अ०६/१/९२) इति सूत्रं कृतम्। अस्मिन् विषये कातन्त्रव्याकरणे सूत्रं नोपलभ्यते, परन्तु उक्तरूपाणां सिद्ध्यर्थं वृत्तिकारेण **'ऋति धातोरुपसर्गस्य,'**[326] इति वृत्तिः कृता। प्रार्षभीयति, उपाल्कारीयति पदानां कृते पाणिनिव्याकरणे -**'वा सुप्यापिशलेः'**(अ०६/१/९२) इति सूत्रमुपलभ्यते। कातन्त्रव्याकरणे अस्मिन् विषये पृथक् सूत्रं नोपलभ्यते, परन्तु वृत्तिकारेण **'नामधातोर्वा,'**[327] **'उपसर्गस्य वा ऌति धातोरलो दीर्घः'**[328] इति वृत्तिद्वयं कृतम्।

**३.पररूपैकादेशः**

पररूपसन्धिविधायकं सूत्रम्- **'एङि पररूपम्'**(अ०६/१/९४)। एङि सप्तम्यन्तं, पररूपं प्रथमान्तं, द्विपदमिदं सूत्रम्। **'आद्गुणः'**(अ०६/१/८७) इत्यतः 'आत्', **'उपसर्गादृति धातौ'**(अ०६/१/९२) इत्यतः उपसर्गात् धातौ चानुवर्तते। आद् इति विशेषणं उपसर्गात् इति विशेष्यम्। अतः तदन्तविधिना

---

[324] 'इणेधत्योर्न' (का०व्या०१/२/७) सूत्रस्य दुर्गवृत्तिः ।

[325] 'नामधातोर्वा' (का०व्या०१/२/७) सूत्रस्य दुर्गवृत्तिः।

[326] 'ऋवर्णे अर्' (का०व्या०१/२/४) सूत्रस्य दुर्गवृत्तिः।

[327] तदेव

[328] 'ऌवर्णे अल्' (का०व्या० १/२/५) सूत्रस्य दुर्गवृत्तिः।

Since 2010
ISSN- 0976-8645
UGC RN-41039

अवर्णान्तात् उपसर्गाद् इति अर्थो भवति। एङि धातौ इति सप्तम्यन्तं पदद्वयमस्ति । अतः तदादिविधिना एङादिधातौ इति अर्थो भवति। अतः सम्पूर्णसूत्रार्थो भवति- अवर्णान्तादुपसर्गादेङादौ धातौ परे पूर्वपरयोः पररूपैकादेशः स्यात्। यथा-प्र + एजते इत्यत्र **'वृद्धिरेचि'**(अ०६/१/८८) इत्यनेन वृद्धिं बाधित्वा **'एङि पररूपम्'**(अ०६/१/९४) इत्यनेन पूर्वपरयोः पररूपैकादेशे एकारे प्रेजते इति रूपं सिद्ध्यति। अनुरूपेण उप + ओषति = उपोषतीति रूपं सिद्ध्यति।

**'एङि पररूपम्'**(अ०६/१/९४) इत्यत्र **'वा सुप्यापिशलेः'**(अ०६/१/९२) सूत्रतः 'वा सुपि' इत्यनुवर्तते। तच्च नैकवाक्यतया सम्बध्यते । अत्र वाक्यद्वयमस्ति। अतः वाक्यभेदेन व्याख्येयम्। प्रथमवाक्यं एङि पररूपमिति। प्रथमवाक्येन प्रेजते आदि रूपं सिद्ध्यति। वा सुपीति द्वितीयं वाक्यम्। तत्र एङि पररूपमित्यनुवर्तते। अतः अवर्णान्तादुपसर्गादेङादौ सुब्धातौ परे पूर्वपरयोः स्थाने पररूपैकादेशो वा स्यादित्येवार्थः। उदाहरणं यथा- उप + एडकीयतीत्यत्र 'एङि पररूपम्'(अ०६/१/९४) इत्यनेन नित्यमेव प्राप्ते **'वा सुप्यापिशलेः'**(अ०६/१/९२) इत्यनुवर्त्य वाक्यभेदेन वैकल्पिके पूर्वपरयोः पररूपैकादेशे एकारे उपेडकीयतीति, पररूपैकादेशाभावे तु **'वृद्धिरेचि'**(अ०६/१/८८) इत्यनेन वृद्धौ उपैडकीयतीति रूपद्वयं सिद्ध्यति।

'शकन्ध्वादिषु पररूपं वाच्यम्'[329] वार्तिकार्थः- अचि परे शकन्ध्वादिविषये टेः पररूपैकादेशो भवति। यथा- शकानां देशविशेषाणाम् अन्धुः कूप इति विग्रहे शक + अन्धु इति स्थिते ककारोत्तरवर्ती अकारोऽचोऽव्यवहितपूर्वोऽस्ति। अतो शक इत्यस्य अकारः टिसंज्ञकः[330]। अतो वार्तिकेन प्राप्तं सवर्णदीर्घं बाधित्वा पूर्वपरयोः पररूपैकादेशे अकारे शकन्धुरिति रूपं सिध्यति। एवमेव कर्कन्धुः, कुलटा, हलीषा, लाङ्गुलीषा प्रभृतिरूपाणि सिध्यति। मनस् ईषा इत्यत्र मनस् शब्दस्य अस् टिसंज्ञकोऽस्ति। तस्य पररूपे कृते मन् ईषा इति जायते। वर्णमेलनेन मनीषा इति रूपं निष्पद्यते।

अतः प्रेजते, उपोषति इति पदानां कृते **'एङि पररूपम्'**(अ०६/१/९४) इति सूत्रमुपलभ्यते। अस्मिन् विषये कातन्त्रव्याकरणे पृथक् सूत्रं न दृश्यते। परन्तु **'एकारे ऐ ऐकारे च'** (का०व्या०१/२/६) इति सूत्रे चकाराधिकारवलात् उपसर्गसम्बन्धिनोऽवर्णस्य लोपो भवति धातोरेदोतोः परयोः।[331] इत्यनेन सिध्यति। अपि च पाणिनिव्याकरणे **'एङि पररूपम्'**(अ०६/१/९४) सूत्रे **'वा सुप्यापिशलेः'** (अ०६/१/९२) इत्यनुवर्त्य वाक्यभेदेन वैकल्पिके पूर्वपरयोः पररूपैकादेशे उपेडकीयति रूपं सिध्यति। कातन्त्रव्याकरणानुसारे 'नामधातोर्वा'[332] इत्यनेन वैकल्पिके उपेडकीयति रूपं सिध्यति। अतः कातन्त्रव्याकरणे स्वल्पसंख्यकसूत्रेण कार्यं साधितम्।

पाणिनीयव्याकरणे शकन्धुः, कर्कन्धुः, कुलटा, हलीषा, लाङ्गुलीषा, मनीसा प्रभृतिपदानां कृते **'अचोऽन्त्यादि टि'**(अ०१/१/६४) इतिसूत्रसहकारेण 'शकन्ध्वादिषु पररूपं वाच्यम्'[333] इत्यनेन वार्तिकेन उक्तरूपं सिद्धम्। अस्मिन् विषये

---

[329]अ०१/१/६४ सूत्रस्य वार्तिकम्।

[330]'अचोऽन्त्यादि टि'(अ०१/१/६४)

[331]'चकाराधिकारादुपसर्गावर्णलोपो धातोरेदोतोः' (का०व्या०१/२/७ सूत्रस्य दुर्गवृत्तिः)

[332]'ओकारे औ औकारे च' (का०व्या०१/२/७ ) सूत्रस्य दुर्गवृत्तिः।

[333] अ०१/१/६४ सूत्रस्य वार्तिकम्।

Since 2010
ISSN- 0976-8645
UGC RN-41039

कातन्त्रव्याकरणे **'समानः सवर्णे दीर्घीभवति परश्च लोपम्'**(का०व्या०१/२/१) सूत्रात् **'अवर्ण इवर्णे ए'**(का०व्या०१/२/२) इति सूत्रे चकाराधिकारात्[334] तेन क्वचित् पूर्वोऽकारस्य लोपे उक्तरूपाणि सिध्यति। मनस् + ईषा इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् लोकोपचाराद्वा सकारस्य लोपे मनीषा इति पदं सिध्यति।

**४.दीर्घैकादेशः**

**'अकः सवर्णे दीर्घः'**(अ०६/१/१०१) दीर्घ एकादेशविधायकं सूत्रमिदम्। अकः पञ्चम्यन्तम्, सवर्णे सप्तम्यन्तं,दीर्घः प्रथमान्तं द्विपदमिदं सूत्रम्। 'इको **यणचि**'(अ०६/१/७७) इत्यतः 'अचि' इत्यनुवर्तते। **एकः पूर्वपरयोः**(अ०६/१/८४) इत्यधिकृतम्। अतः सूत्रशरीरं भवति-'अकः सवर्णे अचि दीर्घ एकः पूर्वपरयोः' इति। सूत्रार्थो भवति – अकः सवर्णे अचि परे पूर्वपरयोः स्थाने दीर्घ एकादेशः स्यात्।

यथा- दैत्यारिः। दैत्यानामरिरिति विग्रहे , समासे दैत्य + अरिरिति स्थिते **'अकः सवर्णे दीर्घः'**(अ०६/१/१०१) इत्यनेन पूर्वपरयोः सवर्णे दीर्घे आकारे 'देत्यारिः' इति रूपं सिध्यति। श्रीशः। श्रीः ईश इति विग्रहे, समासे श्री + ईश इति स्थिते **'अकः सवर्णे दीर्घः'**(अ०६/१/१०१) इत्यनेन पूर्वपरयोः सवर्णे दीर्घे ईकारे श्रीश इति रूपं सिध्यति। विष्णूदयः। विष्णोः उदय इति विग्रहे समासे विष्णु + उदय इति स्थिते **'अकः सवर्णे दीर्घः'**(अ०६/१/१०१) इत्यनेन पूर्वपरयोः सवर्णे दीर्घे ऊकारे विष्णूदय इति रूपं सिध्यति।

कातन्त्रव्याकरेण अस्मिन् विषये सूत्रं कृतम्- **'समानः सवर्णे दीर्घीभवति परश्च लोपम्'**(का०व्या० १/२/१)। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ एते दश समाना वर्णाः[335], एतेषामेव द्वौ द्वौ वर्णौ सवर्णसंज्ञकौ भवतः।[336] अतः सूत्रस्यार्थो भवति- समानसंज्ञको वर्णः सवर्णे परे दीर्घीभवति परश्च लोपमापद्यते।[337] उदाहरणं यथा- दण्डाग्रम्। दण्ड + अग्रमिति स्थिते डकारोत्तरवर्ती अकारः समानसंज्ञको वर्णः, अग्रमित्यस्य आद्यकारः सवर्णसंज्ञको वर्णः। अथः सवर्णे परे दीर्घे आकारे परश्च लोपे दण्डाग्रमिति रूपं सिध्यति। एवमेव सा + आगता = सागता, दधि + इदम् = दधीदम्, नदी + ईहते = नदीहते, मधु + उदकम् = मधूदकम्, वधू + ऊढम् = वधूढम्, पितृ + ऋषभः = पितृषभः, कृ + ॠकारः = कृकारः, कॢ + ऌकारः = कॣकारेण प्रभृतिरूपाणि सिध्यति। अतः पाणिनिकातन्त्रव्याकरणयोः दीर्घ आदेशः कृतः। परन्तु पाणिनीयव्याकरणे **'एकः पूर्वपरयोः'**(अ०६/१/८४) इत्यनेन उभयो वर्णयोः स्थाने दीर्घ एकादेशः कृतः। कातन्त्रव्याकरणे परवर्णस्य लोपः कृत्वा पूर्ववर्णस्य स्थाने आदेशः कृतः, अतः एकस्य वर्णस्य स्थाने एकमेव दीर्घादेशः कृतः।

**५.पूर्वरूपैकादेशः**

**'एङः पदान्तादति'** (अ०६/१/१०९) एङि पञ्चम्यन्तम्, पररूपं पञ्चम्यन्तम्, अति सप्तम्यन्तं त्रिपदमिदं सूत्रम्। आलोच्यसूत्रे 'अमि पूर्वः'(६/१/१०७) सूत्रतः 'पूर्वः' इत्यनुवर्तते। **'एकः पूर्वपरयोः**(अ०६/१/८४) इत्यधिकृतम्। अतः सूत्रार्थो भवति- पदान्तादेङोऽति परे पूर्वपरयोः स्थाने पररूपैकादेशो भवति। यथा- हरेऽव। हरे + अव इत्यत्र **'एचोऽयवायावः'**(अ०६/१/७८)

[334] ''चकाराधिकारोऽनुक्तसमुच्चयार्थः, तेन क्वचित् पूर्वोऽपि लुप्यते।''(का०व्या०१/२/२ सूत्रस्य दुर्गवृत्तिः)

[335] 'दश समानाः'(का०व्या०१/१/३)

[336] तेषां द्वौ द्वावन्योऽन्यस्य सवर्णौ(का०व्या०१/१/४)

[337] 'समानः सवर्णे दीर्घीभवति परश्च लोपम्'(का०व्या०१/२/१) इति सूत्रस्य दुर्गवृत्तिः।

Since 2010
ISSN- 0976-8645
UGC RN-41039

इत्यनेन प्राप्तम् अयादेशं बाधित्वा 'एङः पदान्तादति' (अ०६/१/१०९) इत्यनेन पूर्वपरयोः पूर्वरूपैकादेशे एकारे हरेऽव इति रूपं सिध्यति। विष्णोऽव। विष्णो + अव इत्यत्र **'एचोऽयवायावः'**(६/१/७८) इत्यनेन प्राप्तम् अयादेशं बाधित्वा **'एङः पदान्तादति'** (अ०६/१/१०९) इत्यनेन पूर्वपरयोः पूर्वरूपैकादेशे ओकारे विष्णोऽव इति रूपं सिध्यति।

अस्मिन् विषये कातन्त्रकारेण सूत्रं कृतम्- **'एदोत्परः पदान्ते लोपमकारः'**(का०व्या०१/२/१७)। सूत्रार्थो भवति- एदोद्भ्यां परोऽकारः पदान्ते वर्त्तमानो लोपमापद्यते। उदाहरणं यथा- ते + अत्र इति स्थिते 'ते' इत्यस्य पदान्तादेकाराद् परस्य 'अत्र' इत्यस्य अकारस्य लोपे तेऽत्र इति रूपं सिध्यति। एवमेव पटो + अत्र = पटोऽत्र रूपं भवति। सूत्रे एदोद्भ्यामिति किं? ''एदोत्। एच्च ओच्च एदोतौ ताभ्यां पर इति पञ्चमीलक्षणस्तत्पुरुषोऽयम्, नचैदोतौ परौ यस्मादिति वहुव्रीहिः एकारे ओकारे चैकारस्यौकारस्य च विषयात्। नच पदमध्ये तौ असन्ध्यक्षरयोरस्य तौ तल्लोपश्चेति वचनात्।''[338]

अतः हरेऽव, विष्णोऽव इति पदस्य कृते पाणिनीयव्याकरणे **'एङः पदान्तादति'** (अ०६/१/१०९) इति सूत्रं कृतम्। अत उभयो वर्णयोः स्थाने पूर्वरूपैकादेशः कृतः, पूर्वरूपैकादेशेन अकारः नोपलभ्यते अकारोऽवबोधार्थं 'ऽ' चिह्नं व्यवहारः दृश्यते। कातन्त्रव्याकरणे पूर्वरूपैकादेशः न कृतः, केवलं परवर्णस्य लोपः कृतः। लुप्ताकारस्य अवबोधार्थं 'ऽ' चिह्नं व्यवहारं कृतम्। अत उभयो वर्णयोः स्थाने एकमेव आदेशोऽपेक्षा परवर्णस्य लोपोऽधिकं समीचीनम्।

338'एदोत्परः पदान्ते लोपमकारः'(का०व्या०१/२/१७) इति सूत्रस्य दुर्गटीका।

**निष्कर्षः**

शब्दस्य साधुत्वविषये उभयोः व्याकरणयोरवदानमतुलनीयम्। पाणिनीयव्याकरणे पूर्वं गुणवृद्ध्यादि कृत्रिमसंज्ञासूत्रं कृतम्। तदन्तरं गुणवृद्ध्यादि प्रयोगसूत्रं कृतम्। अतः पाणिनीयव्याकरणे सूत्रसंख्यापि अधिकं वर्तते। कातन्त्रव्याकरणे कृत्रिमसंज्ञासूत्रं विहाय केवलं प्रयोगसूत्रेण शब्दस्य साधुत्वविधानं कृतम्। अतः कातन्त्रव्याकरणे सूत्रसंख्यापि स्वल्पं वर्तते। पाणिनीयव्याकरणे अच्, एङ्, ऐच् प्रभृतयः प्रत्याहारप्रयोगेण शब्दलाघवः कृतः। परन्तु अर्थबोधे क्लेशो भवति। कातन्त्रकारेण सूत्रे प्रत्यक्षभावे ए, ऐ, ओ, औ प्रभृतयो वर्णप्रयोगेण अर्थलाघवः कृतः। पाणिनिमुनिना गुणाद्येकादेशविषये उभयोः वर्णयोः स्थाने एको वर्ण आदेशः कृतः। कातन्त्रकारेण पूर्ववर्णे आदेशः परवर्णस्य लोपो विधीयते।

## सन्दर्भग्रन्थसूची

1.*अष्टाध्यायी* (*चन्द्रलेखा*-हिन्दीव्यख्या सहिता) । सम्पादकः इश्वरचन्द्र। दिल्ली : चौखम्बा संस्कृत प्रतिष्टान, प्रथमभागः द्वितीयभागश्च २०१७।

2.*कलापव्याकरणम्*(सन्धिवृत्ति)। सम्पादकः सीतानाथसिद्धान्तवागीश भट्टाचार्य । कलकाता : संस्कृत साहित्यपरिषद् , चतुर्थसंस्करणम् १९३५।

3.*कातन्त्रव्याकरणम्*। सम्पादकः हरिनारायण तिवारी। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस,२०१६।

4.*कातन्त्रव्याकरणम्*(कलापवृत्ति-कातन्त्रपञ्जिका-कलापचन्द्रटीका सहिता)। सम्पादः जानकीप्रसाद द्विवेदी । वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, प्रथमभागः १९९७।

5.*काशिका* (*न्यास-पदमञ्जरी-भावबोधिनी* सहिता)। सम्पादकौ जयशङ्करलाल त्रिपाठी, सुधाकरमालवीय च । वाराणसी : तारा बुक एजेन्सी, सप्तमभागः २०१२ ।

Since 2010
ISSN- 0976-8645
UGC RN-41039

6.परिभाषेन्दुशेखरः(सुबोधिनी-हिन्दीव्याख्योपेतः)। सम्पादकः विश्वनाथ मिश्र। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१६।

7.*लघुसिद्धान्तकौमुदी* (भैमिव्याख्या सहिता)। सम्पादकः भीमसेन शास्त्री । दिल्ली : भैमी प्रकाशन, प्रथमभागः २०१९(दशमसंस्करणम्)।

8.*व्याकरणमहाभाष्यम्* (भाष्यप्रदीपोद्योतसमुल्लसितम्)। सम्पादकः भार्गव शास्त्री भिकाजी जोशी। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, पञ्चमभागः २०१४।

9.*वैयाकरणसिद्धान्तकौमुदी(सन्धिप्रकरणम्)*। सम्पादकः, करुणासिन्धु दास। कलकाता : संस्कृत पुस्तक भाण्डार, २००४।

10.*वैयाकरणसिद्धान्तकौमुदी* (*बालमनोरमा-दीपिका*-संस्कृतहिन्दीव्याख्योपेतम्)। सम्पादकः गोपालदत्त पाण्डेय। वाराणसी : चौखम्बा सुरभारती प्रकाशन, प्रथमभागः २०१७।

11.*वैयाकरणसिद्धान्तकौमुदी(अच्सन्धिप्रकरणम्)*। सम्पादकः विश्वरञ्जन पाण्डा । कलकाता : संस्कृत वुक डिपो,२०१८।

12.*वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्त्वबोधिनी-सहिता)। सम्पादकौ गिरिधर शर्मा परमेश्वरानन्द च । दिल्ली : मोतिलाल बनाररसीदास, प्रथमभागः २०१०।

13.Pāṇini. *The Ashṭādhyāyī of Pāṇini.* ed. by Śrīśa Chandra Vasu.Delhi: Motilal Banarsidass, Vol.I .1891. Print.

# पण्डितराजजगन्नाथकृतगङ्गालहर्याः माहात्म्यनिरूपणम्[339]

**प्रमुखशब्दाः**

लहरीकाव्यम्, स्तोत्रम्, मुक्तिः, सौन्दर्यलहरी, स्तुतिः, भक्तिः

**शोधसारः**

संस्कृतवाङ्मये गङ्गास्तुतिपरकानि वहुनि स्तोत्रानि विकीर्णानि दृश्यन्ते । पुतःसलिलागङ्गा भारतीयसंस्कृतौ साहित्येषु च परमश्रद्धया समादृता । लहरीकाव्यपरम्परायामपि जगन्नाथेनैव सर्वादौ गङ्गास्तुतिः विहिता गङ्गालहरीरचनया । प्रायशः सर्वविधानि स्तोत्रकाव्यान्यैव केवलविशेषणैः भाराक्रान्तानि दृश्यन्ते, तत्र तु कतिपयान्यैव स्तोत्रात्मकानि रचना वर्तते यासां काव्यगतदृष्ट्या शैलीगतदृष्ट्या वा महनीयता तथा ग्रहणीयता उल्लेखार्हा प्रतीयते । पण्डितराजस्य गङ्गालहरी एतादृशा रचना वर्तते यत्र कविना गङ्गायाः महत्वं विश्वजननीत्वञ्च प्रतिपादितम् । लहरीकाव्यधारायां जगन्नाथस्यावदानं तथा तेषु लहरीषु गङ्गालहर्याः विशेषत्वं कथं वा विदग्धजनैर्समादृतं, गङ्गास्तुतिमाश्रित्य कीदृशं वा वर्णननैपूण्यं भक्तिभावमयात्मकं परिवेशितं पण्डितराजेन तदैव मयात्रालोचितम् ।

**मूलप्रबन्धः**

सुविस्तृतसंस्कृतवाङ्मये लहरीकाव्यानां रचनापरम्परा न कापि नवीना धारा अपि तु प्राचीना प्रतीयते। गीतिमयतामनुभूय खण्डकाव्यान्तर्गतत्वेन लहरीकाव्यानि गीतिकाव्यानि भवन्तीति

339 दीपङ्कर-मण्डलः, Assistant Professor, Chatra Ramai Pandit Mahavidyalaya, Darapur,Bankura,West Bengal,722141

Since 2010
ISSN- 0976-8645
UGC RN-41039

केचित् विद्वांसः विचारयन्ति। परन्तु यतः खण्डकाव्यं स्वल्पपरिसरावद्धं भवति ततः काव्यस्य स्वकीयमितिवृत्तानुसारं खण्डकाव्यानि विविधानि परिचितानि लभन्ते। इत्यानुसारं दूतकाव्यं, गीतिकाव्यं, शतककाव्यं, नीतिकाव्यं, स्तोत्रकाव्यं, लहरीकव्यं, यात्राकाव्यं, विमानकाव्यं, नर्मकाव्यं, रागकाव्यं इत्यादयः खण्डकाव्यान्तर्गतं भवति । राजेन्द्रमिश्रेन उक्तं -

कस्यचित् पुरुषार्थस्य वर्णनन्तु यदांशिकम् ।
जीवनस्याथवा नेतुः खण्डकाव्यं तदुच्यते ॥
खण्डकाव्यमिदञ्चैव स्वेतिवृत्तानुरोधतः ।
विविधान्यभिधानानि पृथगर्थानि गच्छति ॥[340]

मुलतः महाकाव्ये एकस्य चरित्रस्य एकाधिकानां चरित्रानां वा समग्रमेव जीवनं चित्रितं भवति, खण्डकाव्ये तु तस्यैकदेश एव चित्रितः भवति। विश्वनाथ-कविराजेनोक्तम् - "खण्डकाव्यं भवेत् काव्यस्य एकदेसानुसारि "[341] । एतादृशेषु खण्डकाव्येषु प्रसिद्धमेकम्भवति लहरीकाव्यमिति। एतेषु लहरीकाव्येषु मुलतः कवेः आध्यात्मिकभावनायाः अभिव्यक्तिः परिलक्ष्यते। भक्तहृदयस्य भक्तिधारा लहरीरूपेणात्र तरङ्गायिता जनानां हृदयं हरति। संस्कृतकाव्यधारायां शङ्कराचार्यस्य सौन्दर्यलहरी भवति प्रथमा लहरीरचना। अनन्तरं शङ्कराचार्यातः प्रेरकत्वेन जगन्नाथोऽपि पञ्चलहरीकाव्यानि रचितवानिति पण्डिताः मन्यन्ते।

**<u>पण्डितराज-जगन्नाथः-</u>**

समग्रे संस्कृतसाहित्याकाशे पण्डितराजजगन्नाथः देदीप्यमाननक्षत्रमण्डलेषु चिरभास्वररूपेण प्रतिभाति। संस्कृतकाव्यशास्त्रपरम्परायाम् अन्तिमाचार्यः जगन्नाथः प्रसिद्धसर्वशास्त्रज्ञः मौलिकचिन्तनक्षमश्च भवति, यस्य सूक्ष्मचिन्तनेन काव्यशास्त्रे एकः नूतनदिगन्तः आगतः। दक्षिणभारतस्य आन्ध्रराज्यस्थिते पूर्वगोदावरीमण्डले मुङ्गण्डग्रामे तैलङ्गब्राह्मणपरिवारे तस्य जन्मः अभवत्[342]। पेरुभट्टः आसीत् तस्य जनकः माता च लक्ष्मीरिति[343]। जगन्नाथेन सर्वशास्त्रज्ञजनकतः विविधानां विषयाणामध्ययनं कृतम्। अतः वक्तुं शक्यते यत् जगन्नाथेन पेरुभट्टः गुरुत्वेन स्मृतः। उक्तञ्च रसगङ्गाधरे –

पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ।।[344]

अलौकिकप्रतिभाधरः जगन्नाथः स्वीयकाव्यरचनया तथा काव्यशास्त्रसमीक्षेण प्रसिद्धमस्ति। काव्यशास्त्रीयग्रन्थेभ्यः आरभ्य स्तुत्यात्मककाव्येषु, प्रशास्तिमूलककाव्येषु तथा व्याकरणशास्त्रस्य समीक्षात्मकेषु प्रसिद्धग्रन्थेष्वपि जगन्नाथस्य प्रतिभा समरूपेण प्रकाशिता। पण्डितराजेन वहवः गद्य-पद्यालङ्कार-व्याकरणशास्त्रसम्वन्धाः ग्रन्थाश्च विरचिताः। पण्डितराजस्य एतासु रचनासु पञ्चसंख्यानि स्तुतिपरकानि लहरीकाव्यानि प्रसिद्धानि सन्ति। समग्रसंस्कृतवाङ्मये लहरीकाव्यं न तादृशा नवीना धारा। शङ्कराचार्यतः राधावल्लभ-त्रिपाठी-महोदयपर्यन्तं सुविस्तृतमेषा काव्यधारा। लहरीकाव्यपरम्परायां शङ्कराचार्यस्तु आदिस्रष्टारूपेण सुविदितं सर्वजनस्वीकृतमस्ति। तत्रभवतः "सौन्दर्यलहरी" लहरीकाव्यपरम्परायाः आदिसृष्टिरासीत्। अनन्तरं श्रीशङ्कराचार्यस्य लहरीकाव्यरचनायाः प्रभावितः सन् पण्डितराजजगन्नाथेनापि पञ्चसंख्यानि लहरीकाव्यानि विरचितानि। समग्रलहरीकाव्यधारायाः यदि आदिस्रष्टारूपेण

340अभिराजयशोभूषणम्, ८१, ८२
341 साहित्यदर्पणः, ६.३२८-२९
342 प्राणभरणम्. ५३
343 रसगङ्गाधरः, १/३
344 रसगङ्गाधरः, १.३

Since 2010
ISSN- 0976-8645
UGC RN-41039

शङ्कराचार्यः सुविदितः जनकतया प्रतीयते वा तर्हि पण्डितराजजगन्नाथः अवश्यमेव तस्याः मार्गदर्शकरूपेण उत्तरकालस्य कवीनां समीपे लहरीकाव्यधारामृतमानीतवान् इति वक्तुं शक्यते। पण्डितराजस्य पञ्चलहर्यः यथा –

गङ्गालहरी ( त्रिपञ्चाशत् श्लोकसहिता गङ्गास्तुतिरूपा )

अमृतलहरी ( एकादशश्लोकयुक्ता यमुनास्तुतिरूपा )

करूणालहरी ( षष्टिश्लोकपरिमिता विष्णुस्तुतिरूपा )

लक्ष्मीलहरी (एकचत्वारिंशत् श्लोकैर्युक्ता लक्ष्मीस्तुतिरूपा )

सुधालहरी (त्रिंशत् श्लोकपरिमिता सूर्यस्तुतिरूपा )

**गङ्गालहरी**-

पण्डितराजस्य एतेषु लहरीकाव्येषु गङ्गालहरी प्रसिद्धा यत्र त्रिलोकपावन्याः गङ्गायाः भक्तिपुरस्सरं स्तुतिः प्रतिपादिता। जीवानाममृतत्वरूपं गङ्गाजलं सर्वजनविदितमस्ति। अतः गङ्गालहरीपुष्पिकायां पीयूषलहरीति नामान्तरं कृतम् –

इमां पीयूषलहरी जगन्नथेन निर्मिताम् ।
य पठेत्तस्य जायन्ते सर्व सुखसम्पदः ॥[345]

जगन्नाथस्य एषा गङ्गालहरीरचनाविषये जनश्रुतिः लोकगाथा वा जनसमाजे वहुप्रचलिता, यस्याः आलोचना अस्मिन् परिसरे कर्तव्या। तासु गाथासु अन्यतमास्ति लवङ्गीविषयम्। जगन्नाथः लवङ्गीनाम्नीं म्लेच्छयुवतिं परिणीतवान्। अनन्तरं यवनवनितासङ्गमदोषेण जगन्नाथ: तिरस्कृत:, जातिच्यूत: तथा समाजवहिष्कृत: अभवत्। जीवनस्य अन्तिमदशायाम् आश्रयहीन: जगन्नाथः वाराणस्यां गत्वा गङ्गातटे स्थित्वा विललाप। तदा जगन्नाथः दु:खाभिभूत: सन् पूतसलिलायाः गङ्गामातु: कृपालाभेच्छया गङ्गालहरीयं रचितवान्। तस्य एकैकश्लोकस्य गङ्गा च एकैकं सोपानमधिरुह्य स्तोत्रान्ते तं भार्यया सह निमज्जितवती। अन्यायां कथायां तु जगन्नाथः वाराणसीं प्राप्तः, तत्र च जातिवहिष्कृतः अभवत्। अनन्तरमवमानात् सः गङगां संस्तुत्य पूर्ववदेव मातुः अनुग्रहेन जलसमाधिं प्राप्तवान्। यदि एषा जनश्रुतिः गाथा वा नाभवत् सत्यमेवाभवत् चेत् एका चिन्तागता। यदि गङ्गालहरी जगन्नाथस्य देहान्तकालैव लिखिता तर्हि रसगङ्गाधरे कथं तेन "मन्निर्मिताः पञ्चलहर्यः भावस्य"[346] इति वक्तुं शक्यते। अपि च रसगङ्गाधरे उदाहरणरूपेणापि अस्याः लहर्याः श्लोकानां निवेशं कथं वा शक्यं भवेत् इत्यपि च प्रश्नः समुदेति।

**गङ्गालहरीकाव्यपरिचयः** –

पण्डितराज-जगन्नाथकृतलहरीकाव्येषु गङ्गालहरी सर्वाधिका सर्वेषां प्रशंसनीया इत्यस्मिन् विषये नास्ति कोऽपि सन्देहावकाशः। या भगीरथेन स्वर्गतः आनीता, सर्वजनैः नित्यशुद्धा-पूतसलिला-मातृरूपेण पूजिता, सा गङ्गामाता अस्मिन् काव्ये चित्रिता ग्रन्थकारेण। त्रिपञ्चाशत् श्लोकसहिता इयं लहरीकाव्यं शिखरिणीवृत्तेन निवन्धम्। अनुमीयते यत् जगन्नाथेन शङ्कराचार्यास्य सौन्दर्यलहरीं स्वलहरीनिर्माणे प्रेरकत्वेन गृहीतेति। यद्यपि पण्डितराजस्य लहर्यः नितान्तं मौलिक्यं सर्वथा विलक्षणकवित्वस्पर्शाधारिताः। रचनायाः सर्वत्रैव ग्रन्थकारस्य भक्तिः, श्रद्धा, तथा सर्वप्रकारं समर्पणं परिलक्षितम् ।

**गङ्गायाः माहात्म्यम्** –

गङ्गालहर्याःप्रारम्भिकश्लोकेषु कविः गङ्गामातुः महत्वं प्रतिपादितम्। कवेः कथनानुसारं गङ्गाजलं समग्रजगतः कृते सौभाग्यकरं समृद्धिकरञ्च भवति। गङ्गाजलमिदं जगतपालकस्य शिवस्य अवर्णनीयमैश्वर्यमस्ति, सकल-श्रुतिनां सारभूतमप्यस्ति। अतः कविः प्रार्थयते यत्, अमृततुल्यं गङ्गाजलं सर्वेषाममङ्गलं सर्वविधं

345 गङ्गालहरी, ५३

346 रसगङ्गाधरः, प्रथमानने, पृ-109

Since 2010
ISSN- 0976-8645
UGC RN-41039

पापं च समूलं विनाशयेत् -

समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्
महैश्वर्यं लीला जनितजगतः खण्डपरशोः ।
श्रूतीनां सर्वस्वं सुकृतमथ मूर्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु ॥[347]

मुलतः सर्वेषां भारतीयानामेव विश्वासः यत् वहुदूरात् यः गङ्गा इति सकृदेव व्रूयात सः सर्वपापेभ्यः मुच्यते विष्णुलोकं च गच्छति। अतः यस्याः दर्शनमात्रेणैव मुक्तिः सम्भवति तत्र स्नानेन तु स्वर्गप्राप्तिः निश्चिता जाता। अपि तु केवलं गङ्गादर्शनेनैव मुक्तिरिति कवेः मनसि प्रतिष्ठितः अभवत्। यः कोऽपि सकृदेव गङ्गाजलसंस्पर्शेनायाति सः अवश्यमेव मुक्तिं लभते। किञ्च गङ्गाजलं संसेवमानानां मनुष्याणाम् आनन्दः मोक्षादपि श्रेयस्करः भवति –

अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा
विलोलद्वानीरं तव जननि ! तीरं श्रितवताम् ।
सुधातः स्वादीयः सलिलभरमातृप्ति पिवतां
जनानामानन्दः परिहसति निर्वाणपदवीम् ॥[348]

कविः सम्पूर्णरूपेण विश्वसिति यदियं पवित्रगङ्गा एकाकिनी निखिलविश्वं रक्षितुं समर्थो भवति। अतः व्रह्मा समाधौ उपविश्यतां, विष्णुश्च शेषनागशय्यायां सुखं शेतां, शिवोऽपि यथेच्छं ताण्डवं नृत्यतां, यतः केवलं गङ्गा यदि जागर्ति तर्हि अपरदेवानां प्रयोजनं नास्ति। अतः उच्यते -

विधत्तां निःशङ्कं निरवधि समाधिं विधिरहो
सुखं शेषे शेतां हरिरविरत नृत्यतु हरः ।
कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः
सवित्री कामानां यदि जगति जागर्ति भवति ॥[349]

पापात्मनाम् उद्धरणे गङ्गायाः सामर्थ्यं दृश्यते। महतः पापिनः उद्धारं कृत्वा जगदिदं विस्मयाभिभूतं कर्तुं तस्याः कृपा सदैव वर्षिता। जप-तप-ध्यानादिभिः यद्विण्णोः परमपदं मुनीनां साधकानां कृतेऽपि दुर्लबं भवति, तत्पदं भगवत्याः अपारकरूणया प्राप्तुं शक्यते। इयं गङ्गामाता न केवलं भौतिकसुखं प्रयच्छति, अपि तु आध्यात्मिकशान्तिमपि प्रयच्छति। यस्याः वारमात्रैव दृष्टिपातेन दरिद्रानां जनानां सकलाभावं यथा दूरीभूतं भवति तथैव जनानां दुर्वासनानां दुष्टप्रवृत्तिनां वा शीघ्रमपसरति –

दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां
द्रुतं दूरीकुर्वन् सकृदपि गतो दृष्टिसरणिम् ।
अपि द्रागाविद्याद्रुमदलनदीक्षागुरुरिह
प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः ।।[350]

तस्याः दर्शनेन मानवानां त्रिविधपापं, तापं, शोकं, भवमायावन्धनं दूरीभूतं भवेत्। अपि च गङ्गैव जडानन्धजनानां मूक-वधिर-पङ्गुजनानां तथा शनिराहुप्रभृतिभिः ग्रहैः पीडितजनानाम् उद्धारार्थं परमं भेषजम्। धरातलेऽस्मिन् क्षुद्रपापानां जनानां समुद्धर्तुं तीर्थसमूहाः सन्ति परन्तु जघन्यपापाचारीनां प्रायश्चित्तकरणे कष्टसाध्यकार्यसाधने इत्यर्थं मातुः स्नेहावेशः अवश्यमेव उत्तमुपायः प्रतीयते। गङ्गायाः प्रशस्ता मृत्तिका सलिलद्वारा वा यदि कोऽपि जनः साग्रहं स्वीयललाटे तिलकीकृतं तर्हि तदि्तलकं नवोदितसूर्यमिव तत्र शोभते, विधिना लिखितां दुर्भाग्यरेखाञ्च सद्यः नाशयति –

ललाटे वा लोकैरिह खलु सलीलं तिलकिता
तमो हन्तुं धत्ते तरुमतरमार्तण्डतुलनाम् ।

347 गङ्गालहरी, १
348 गङ्गालहरी, ६
349 तत्रैव, २३
350 तत्रैव, २

Since 2010
ISSN- 0976-8645
UGC RN-41039

विलुम्पन्ती सद्यो विधिलिखितदुर्वर्णसरणिं
त्वदीया सन्मृत्स्ना मम हरतु कृत्स्नामपि शुचम् ।।[351]

उक्तप्रकारेण गङ्गालहर्यां सर्वत्रैव तस्याः माहात्म्यं यथा प्रतिपादितम् तथैव गङ्गा मानवानां आश्रयस्थलम् अभयस्थलरूपेण च प्रतियते। गङ्गा भारतीयानां समीपे न केवलं नदी एका वर्तते अपि तु परमस्नेहप्रदायिनी, पापनाशिनी, मातृरूपेण समादृता। अतः भारतीयसंस्कृतौ पतितपावन्याः जगज्जनन्याः सुखसमृद्धिप्रदायिन्याः भगवत्याः गङ्गायाः माहात्म्यं सर्वजनविदितम्।

<u>भक्तिपूर्णसमर्पणम् आत्मनिवेदनञ्च</u> –

पापस्खलनार्थं स्वीयापराधनिवेदनार्थं वा पुराकालतः मानवाः गङ्गाशरणं गच्छन्तीति तु सर्वजनविदितम्। अस्मिन् लहरीकाव्येऽपि न तद्विषयस्य अन्यथा दृश्यते। अत्र पण्डितराजजगन्नाथेन ग्रन्थस्य वहुस्थानैव यादृशं भक्तिपूर्णसमर्पणं प्रदर्शयति तेन यथा भक्तहृदयस्य परमभक्तिः प्रदर्शिता तथैव स्वीयापराधनिवेदनमूलकविषयमपि निवेदयति। अपि तु अपरान् देवान् अतिक्रम्य आत्मोद्धारार्थमधुना भागीरथीं शरणापन्ने मयि यदि औदास्यं भजसि तर्हि अवश्यमेव अहं निराश्रयः भवामीति प्रकारेण पश्चातापं प्रकटयन् ग्रन्थकारेणोक्तम् –

तवालम्वादम्व स्फुरदलघुगर्वेण सहसा
मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः।
इदानीमौदास्यं भजसि यदि भागीरथी तदा
निराधारो हा रोदिमि कथय केषामिह पुरः ।।[352]

महतां पापात्मनामपि उद्धरणे गङ्गायाः सामर्थ्यं प्रसिद्धम्। एतं भावं व्यक्तीकर्तुं कविः आत्मानं महान्तं पापिनं घोषयित्वा उक्तम् – हे मातः, महतः पापिनः उद्धारं कृत्वा जगदिदं विस्मयाभिभूतं कर्तुं यदि तव महानभिलाषो वर्तते तर्हि तादृशमभिलाषं पूरयितुम् अहमागतोऽसि इति। अत्र कवेः अतिविनयशीलतायाः परिचयं यथा वयं प्राप्यन्ते तथा पापोद्धारे तस्याः दक्षता अपि प्रतिपादिता। अन्यत्र दृश्यते कविः चिन्तयति यत् मया समग्रजीवनं दुष्कर्माणि एव सम्पादितानि, साधुसङ्गं विहाय श्वावृत्तिः आचरिता। मम मनः तु सततं कुतर्केषु परपैशुन्येषु वा संलग्नं जातम्। अधुना करूणामयीं गङ्गां विना न कोऽपि अपरः मादृशस्य अपराधिनः मुखमपि द्रक्षतीति –

श्ववृत्तिव्यासङ्गं नियतमथ मिथ्याप्रलपनं
कुतर्केष्वभ्यासं सततपरपैशुन्यमननम् ।
अपि श्रावं श्रावं मम तु पुनरेवंविधगुणानृते
त्वत् को नाम क्षणमपि निरीक्षेत वदनम् ।।[353]

कविः स्वात्मनं पतितः, अनाथः, गतिहीनः इत्यादिरूपेण च वर्णयन् सद्गतिदायिनीं भगवतीं गङ्गां प्रति अभीष्टप्राप्त्यर्थं सविनयं निवेदयति। अनन्तरं गङ्गायाः समीपे अन्तिमकालं यापयितुं कविः प्रकाशयति यत् – हे मातः, तव जलं पीत्वा अहं स्वकीयैः मूर्खसहचरैः सह इतस्ततः वहु अटितवान्। कुत्रापि न विश्रामं लब्धवान्। अतः साम्प्रतम् अनिद्राग्रस्तं मां स्वक्रोडे चिरं यावत् शायय इति -

पयः पीत्वा मातर्यदि सपदि यातः सहचरैः
विमूढैः संरन्तु क्वचिदपि न विश्रान्तिमगमम् ।
इदानीमुत्सङ्गे मृदुपवनसञ्चारशिशिरे
चिरादुन्निद्रं मां ,सदयहृदये शायय चिरम् ।।[354]

अत्र गङ्गायां मातृत्वमात्मोपरि च वालकत्वमारोप्य भक्तिपूर्णसमर्पणं

351 गङ्गालहरी, ४२
352 तत्रैव, ४
353 गङ्गालहरी, ३१
354 तत्रैव, ४६

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

दर्शितम्। अतः आत्मनः उद्धारार्थं जगज्जननीगङ्गायाः समीपे गङ्गालहरीकाव्येऽस्मिन् सर्वदा प्रार्थयते।

**गङ्गालहर्याः काव्यसौन्दर्यम्** –

उपरिउक्ते लहरीकाव्ये जगन्नाथः भक्तिरसमाधूर्येन सिक्तमकरोत्, येन पाठकहृदयं रससिक्तं भवति। जगन्नाथस्य काव्यदक्षता तथा काव्यसौन्दर्यसृष्टिक्षमता सन्देहातीता भवति। अतः गङ्गालहरीकाव्यमध्ये तत्रभवतः काव्यशैली, अलंकार-छन्द-गूण-रीत्यादि प्रयोगमपि अनवद्यमरूपमिति विषये नास्ति कोऽपि सन्देहावकाशः। पण्डितराजजगन्नाथस्य स्वकीयपाण्डित्येन, लालित्येन, भावसौन्दर्येन च शङ्कराचार्यातः आगतमिदं लहरीकाव्यमर्वाचीनकाले अभिनवरूपत्वं प्रदायति। काव्यसौन्दर्यवर्धनाय अलंकारप्रयोगं सर्वजनसमर्थितम् । अत्रापि एकाधिकमलंकारस्य प्रयोगकृतं जगन्नाथेन। काव्येऽस्मिन् विविधेषु अलङ्कारेषु उपमा-रूपक-अनुप्रासादि अलङ्काराणां सौन्दर्यम अधिकतया दृश्यन्ते। गङ्गालहर्याः प्रारम्भिकश्लोके रूपकालङ्कारस्य प्रयोगः दृश्यते –

समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्
महैश्वर्यं लीला जनितजगतः खण्डपरशोः ।[355]

अस्मिन् श्लोके गङ्गासलिलं समग्रवसुधायाः सौभाग्यत्वेन खण्डपरशोः महैश्वर्यत्वेन रूप्यते। एतदतिरिच्य उपमा-व्यतिरेक-अर्थान्तरन्यासप्रभृतीनां प्रयोदः परिलक्ष्यते। रूपकमादि अलंकाराणां प्रयोगः यथा भवति तथैव अनुप्रासादि अलंकारप्रयोगं जगन्नाथेनत्र सुन्दररूपेण प्रदत्तं येन गङ्गालहर्यां श्लोकानि चमत्कारित्वेन उद्भाषितम्। अस्मिन्नवसरे कतिपयानि अनुप्रासाक्रान्तनि श्लोकांशानि निम्नरूपेण प्रदत्तानि -

355 गङ्गालहरी, १

- दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां , द्रुतं दूरीकुर्वन् सकृदपि गतो दृष्टिसरणिम् ।[356]
- तरङ्गा प्रत्युङ्गा दुरितभयभङ्गाय भवताम् ।[357]
- अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा ।[358]
- मरुल्लीला लोलल्लहरि लुलिताम्भोजपटली ।[359]
- जरज्वाला जालज्वलितवपुषां नः प्रतिदिनम् ।[360]
- जगज्जालं जाने जननि तृणजालेन सदृशम् ।[361]

यतः प्रायशः लहरीकाव्ये छन्दवैचित्रं न परिलक्षितं, ततः अस्मिन् लहरीकाव्ये केवलं "शिखरिणी" छन्दसः प्राधान्यं दृश्यते। पण्डितराजेन गङ्गालहर्यां त्रयगुणाः स्वीकृताः, परन्तु माधुर्यगुणस्यैव प्राधान्यम् अधिकप्रदत्तं येन अर्थवोधने पाठकैः काठिन्यं न अनुभूतम्। यथा दृश्यते -

उदञ्चनमार्तण्डस्फुटकपटहेरम्वजननी
कटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः ।
भवन्तु त्वङ्गन्तो हरशिरसि गङ्गातनुभुवः
तरङ्गाः प्रत्युङ्गा दुरितभयभङ्गाय भवताम् ।। [362]

अत्र श्लोकस्य प्रथम-द्वितीयपादे दीर्घसमासेन,ट-ठ-ड-ढकाराणां संयुक्त-असंयुक्तरुपेण प्रयोगवशात् ओजगुणस्य प्रयोगः दृश्यते ,

356 तत्रैव, २
357 तत्रैव, ३
358 तत्रैव, ६
359 तत्रैव, २०
360 तत्रैव, २६
361 तत्रैव, ४४
362 तत्रैव, ३

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

तथा तृतीय-चतुर्थपादे तु अल्पसमासहेतोः,कु-चु-टु-तु-पुवर्गाणांम् अन्तिमवर्णनिमित्तं माधुर्यगुणं प्रतिभाति । लहरीकाव्येऽस्मिन् वैदर्भीरीतेः प्राधान्यं प्रतिपादितम् । जगन्नाथस्य काव्यकलायां कृत्रिमता नासीत् । भाषायां मार्मिकता, सरलता, प्रसादश्च प्राप्यन्ते । स्वाभाविकं शब्दचयनमलंकारानाञ्च अनायासः प्रयोगः अपि दृश्यते।

**उपसंहृतिः** –

भारतीयसंस्कृतौ गङ्गायाः माहात्म्यं सर्वजनविदितम्। अतः पण्डितराज-जगन्नाथकृतलहरीकाव्येषु गङ्गालहरीकाव्ये भारतीयसंस्कृतेः चित्रं प्रतिफलितं दृश्यते। मुलतः स्नेह-श्रद्धा-भक्तिपूर्णहृदयस्य पण्डितराजस्य कविहृदयस्य भगवत्प्रीत्यनुरागः अस्मिन् लहरीकाव्ये नितरां परिलक्ष्यते। मानवीयमनोभावानामन्तस्थितेषु यादृक् सूक्ष्मं मनोवैज्ञानिकं विश्लेषनं कविनात्र प्रस्तूयते तदन्यत्र सुदुर्लभम्। कवेः सहृदयत्वं सहानुभूतिप्रवनत्वं च अस्मिन् लहरीकाव्ये प्राप्यते। लहरीकाव्येऽस्मिन् कवेः आध्यात्मिकभावनायाः अभिव्यक्तिः परिलक्ष्यते यस्याः समाजे धार्मिकभावनायाः विकाशाय प्रसाराय च सुतरां महत्त्वमनुभूयते।

## सन्दर्भग्रन्थसूची


- पण्डितराजजगन्नाथः, लहरीपञ्चकम् (वालक्रीडाहिन्दीव्याख्याविभूषितम्), आचार्यमधुसूदनशास्त्री, चौखाम्वा-कृष्णदास-अकादेमी, वारामसी, द्वितीयसंस्करणम्, २००५
- पण्डितराजजगन्नाथः, लहरीपञ्चकम् (चन्द्रप्रभाख्याया संस्कृतव्याख्यया समन्वितम्), वाचस्पतिभुवनेश्वरकरशर्मा, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, प्रथमसंस्करणम्, २०१०
- शर्मा, आर्येन्द्र, पण्डितराजकाव्यसंग्रहः, उसमानियाविश्वविद्यालयः, हैदरावादः, प्रथमसंस्करणम्, १९५८
- पण्डितराजजगन्नाथः, गङ्गालहरी( पीयूषलहरीव्याख्यासहिता), वासुदेवशर्मा, निर्णयसागराख्यमुद्रणालयः,
- विश्वनाथः, साहित्यदर्पणम्, उदयवन्द्योपाध्यायः, संस्कृतवुकडिपो, कलकाता, प्रथमसंस्करणम्, २०११
- पण्डितराजजगन्नाथः, रसगङ्गाधरः(मर्मप्रकाशटीकासहितः), सम्पा. सन्ध्या भादुडी, संस्कृत-पुस्तक-भाण्डारः, कलिकाता ।
- मिश्रः, अभिराजराजेन्द्रः, अभिराजयशोभूषणम्, वैजयन्तीप्रकाशन्, इलाहावादः,प्रथमसंस्करणम्, २००६
- मिश्रः, अभिराजराजेन्द्रः, संस्कृत का अर्वाचीन समीक्षात्मक काव्यशास्त्र, विश्वविद्यालयप्रकाशन्, वाराणसी, प्रथमसंस्करणम्, २०१०
- उपाध्यायः, वलदेवः, संस्कृत साहित्य का इतिहास, शारदा निकेतन, वाराणसी, २००१
- अग्रवालः, हंसराजः, संस्कृतसाहित्येतिहासः, चौखाम्वा-सुरभारती-प्रकाशन्, वाराणसी, २००२

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

# वेङ्कामात्यप्रणीतः लक्ष्मीस्वयंवरसमवकारे रसविचारः[363]

## प्रमुखशब्द

लक्ष्मीस्वयंवरसमवकारः, वैदिकवाङ्मये रसः, लौकिकवाङ्मये रसः, रसस्वरूपम्, रससम्प्रदायः, श्रृङ्गाररसः, हास्यरसः, वीररसः, शान्तरसः।

## शोधसार

रससम्प्रदायस्य प्रवर्तकः भवति भरतमुनिः। तेन रसस्वरुपनिरूपणाय स्वीये रससूत्रे सूत्रितं यत्-विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः। ततः दर्शनाचार्याः तत्तत् दर्शनानुसारम् अस्य सूत्रस्य व्याख्यामकुर्वन्। तत्र केचन नैयायिका, केचन वेदान्तिनः, केचन मीमासकाः केचन द्वैतिनः। तत्र नैयायिकः श्रीशङ्कुकः रसानुभूतिरनुमितिजन्येति प्राप्यन्यायानुसारेण प्रत्यपादयत्। एतन्मते विभावानुभावव्यभिचारिभ्यो अनुमितः स्थास्यते रसः अनुकार्यं नलादो यत्र गृहितैः विभावादयनुकार्यभिन्न नटे रसस्यानुमानं क्रियते। वेदान्तानुसारी भट्टनायकः काव्यं भावकत्वभोजक-त्वनाम्नी द्वे स्वतत्रे शक्ती अनुपगम्येते प्रक्षुषकयोः साधारणी भावजन्यो अयमिति मनुते स्म। एतन्मते रसास्वादः ब्रह्मास्वादसहोदरः। काव्यानन्द-ब्रक्ष्मा-नन्दयोः अवश्यमेव भेदः यत् काव्यानन्दे चैतन्यं विषयस्थपं भवति न तु ब्रह्मानन्दे। मीमांसकानुसारिणः भट्टलोल्लटयोत्पत्तिवादानुसारं विभावादि-कारणैस्सहृदयमयन्त्यादिदर्शनजन्य नलादिसमवेतरन्युद्बोधस्य स्थायिभावस्य तत्कार्यकटाक्षादिसञ्चारी-तोत्कण्ठादीनाञ्च अनुकार्य नलादिनैव सम्बन्धात्तत्रैव रसमुत्पद्यत नटे तु तत्तदनुकृत्य सादृश्यमूलकारोपी विधीयते। साम्प्रतम् आधुनिकसाहित्ये एकादशरसाणाम् एव गणना क्रियते। यथा श्रृङ्गार-हास्य-करूण-रौद्र-वीरः-भयानक-बीभत्स-अद्भुत्-शान्त-भक्ति-वात्सल्यरसाः च। अस्मिन् शोधप्रबन्धे वेङ्कामात्यप्रणीतः लक्ष्मीस्वयंवरसमवकारे नैकाः रसाः वर्णनमस्ति।

## मूलप्रबन्धः

रसः शब्दः 'रस्' धातोः 'अच्' प्रत्ययान्ते निष्पद्यते। भारतीयसंस्कृतवाङ्मयस्यातीव प्राचीनेषु शब्देषु रसशब्दोऽयमन्यतमः। पुनः रसशब्दस्य जले, वीर्ये, श्रृङ्गारादौ, विषे, द्रवादौ च प्रयोगो दृष्टिपथमवतरति। यथोक्तं हेमकोशे-

रसः स्वादे जले वीर्ये श्रृङ्गारादौ विषे द्रवे।
बले रागे गृहे धातो तिक्तादो पारदेऽपि च।।[364]

वेदवेदाङ्गादिषु शतशः प्रयुक्तं रसशब्दमवलोक्य निःसन्दिग्धतयेदं वक्तुं शक्यते यदा यजुर्वेदीयलौकिकरसाःकाव्यशास्त्रीयालौकिकरसाश्च वेदरत्नाकरादेव आविर्भूता इति। वैदिकवाङ्मये लौकिकवाङ्मये च रसशब्दः भिन्नार्थे प्रयुक्तः।

**वैदिकवाङ्मये रसः -**

१- मधुरार्थे - स्वादु रसो मधुपेयोवराय।[365]

२- सोमरसार्थे - सोमो अर्षति धर्णसिर्दधान इन्द्रिय रसम्।[366]

३- दुग्धार्थे - यो नो रसं दिणसति पीत्वा अग्ने यो अश्वानां यो गवां भरतनूनाम।[367]

---

[363] **Rabindranath Bar**, Research Scholar, Central Sanskrit University, Guruvayoor Campus, Kerala.

[364] ७२-पृ .को.हे .

[365] २२/४४.४.६ .वे.ऋ .

[366] ५/२३.२.९ .वे.ऋ .

[367] २३/२३.७ .वे.ऋ .

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

४- जनार्थे - रसेन समगंस्महि।[368]

५- षड् ऋतुणाम् - नमो वः पितरो रसाय।[369]

६- दधि–मधु–घृतादिशब्दार्थे - तां रसोनाभिर्धताम्।[370]

७- शोणितार्थे-या रसस्य हरणाय।[371]

८- प्राणार्थे - प्राणो वा अङ्कानां रसः।[372]

480 हठप्र0 2/54

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

खोले, दोनों जबड़ों को (दांतों को) आपस में मिला ले तथा सीत्कार की आवाज उत्पन्न कर श्वास अंदर ले तत्पश्चात् यथासंभव कुम्भक करें तथा दोनों नासारन्ध्रों से प्रश्वास करें।

**लाभ –:**

**योगिनीचक्रसम्मान्यः सृश्टिसंहारकारकः।**
**नक्षुधा न तृशा निद्रा नैवालस्यं प्रजायते।।**[481]
**भवेत् स्वच्छन्ददेहस्तु सर्वोपद्रववर्जितः।**
**अनेन विधिना सत्यं योगीन्द्रो भूमिमण्डले।।**[482]

अर्थात् इसका नियमित अभ्यास करने से साधक कामदेव के समान सुंदर हो जाता है। साधक योगिनी समूहों द्वारा प्रशंसित होता है। वह सृश्टि और संहार करने योग्य हो जाता है। इसके अभ्यास से भूख–प्यास संतुलित होती है तथा साधक को निद्रा या सुस्ती नहीं सताती। साधक का अपने शरीर पर पूरा नियंत्रण हो जाता है। वह सभी प्रकार के उपद्रवों से बचा रहकर इस पृथ्वी पर एक महान योगी होता है। इस प्राणायाम के अभ्यास से अम्ल–पित्त आदि की समस्याएं दूर होती है। मुख की दुर्गन्ध एवं पायरिया आदि रोग नहीं होते हैं।

**सावधानी –:** जिन व्यक्तियों को अत्यधिक ठण्ड लगती हो या कफ सम्बन्धी दोश हों उन्हें इसका अभ्यास नहीं करना चाहिए। यह शीत प्रकृति प्राणायाम है इसलिए इसका अभ्यास सर्दियों में नहीं करना चाहिए।

**शीतली प्राणायाम –:**

हठप्रदीपिका में शीतली प्राणायाम का वर्णन करते हुए स्वात्माराम जी ने लिखते है कि –

**जिह्वया वायुमाकृश्य पूर्ववत् कुम्भसाधनम्।**
**शनकैर्घ्राणरन्ध्राभ्यां रेचयेत् पवनं सुधीः।।**[483]

अर्थात् किसी भी ध्यानात्मक आसन में बैठें, धीरे से मुँह खोलें और जीभ को बाहर निकालें तत्पश्चात जीभ को इस प्रकार मोड़े की वह पक्षी की चोंच के समान हों जाए फिर धीरे–धीरे जीभ से ही श्वास अन्दर खींचे, जीभ को अंदर कर यथासम्भव कुम्भक करें तथा दोनों नासारन्ध्रों से धीरे–धीरे प्रश्वास करें। इस क्रिया को बार–बार दोहराए, यही शीतली प्राणायाम है।

**लाभ –:**

**गुल्मप्लीहादिकान् रोगान् ज्वारं पित्तं क्षुधा तृशाम्।**
**विशाणि शीतली नाम कुम्भकोऽयं निहन्ति च।।**[484]

अर्थात् शीतली प्राणायाम के नियमित अभ्यास से वायुगोला, तिल्ली जैसे भंयकर रोग नहीं होते। बुखार और पित्त सम्बन्धी विकार दूर हो जाते हैं। भूख–प्यास नियंत्रित हो जाती हैं। इससे सभी रोग तथा विश का प्रभाव भी, नश्ट हो जाता है। मुँह के छाले, दुर्गंध, दांतो के रोग दूर हो जाते हैं।

**सावधानी –:** जिन लोगों को अत्यधिक ठण्ड लगती हो, कमजोर हो, कफ सम्बन्धी रोग हो उन्हें यह अभ्यास नहीं करना चाहिए।

**भस्त्रिका प्राणायाम –:**

हठप्रदीपिका में भस्त्रिका प्राणायाम का वर्णन करते हुए स्वात्माराम जी ने लिखते है कि –

**ऊर्वोरूपरि संस्थाप्य शुभे पादतले उभे। पद्मासनं भवेदेतत् सर्वपापप्रणाशनम्।।**[485]
**सम्यक् पद्मासनं बद्ध्वा समग्रीवोदरं सुधीः। मुखं संयम्य यत्नेन प्राण घ्राणेन रेचयेत्।।**[486]
**यथा लगति हत्कण्ठे कपालावधि सस्वनम्। वेगेन पूरयेच्चापि हत्पद्मावधि मारुतम्।**[487]
**पुनर्विरेचयेत्तद्वत् पूरयेच्च पुनःपुनः। यथैव लोहकरेण भस्त्रा वेगेन चाल्यते।।**[488]
**तथैव स्वशरीरस्थं चालयेत् पवनं धिया। यदा श्रमो भवेद्देहे तथा सूर्येण पूरयेत्।**[489]
**यथोदरं भवेत् पूर्ण पवनेन तथा लघु। धारयेत्रासिकां मध्यातर्जनीभ्यां विना दृढम्। ।**[490]

अर्थात् भस्त्रिका प्राणायाम को करने से पूर्व सर्वप्रथम साधक पद्मासन में बैठे तथा गर्दन एवं शरीर को बिल्कुल सीधा रखें, मुंह को बन्द रखें तथा नासिका द्वारा श्वास को यत्नपूर्वक बाहर छोड़े। इससे साधक वायु स्पर्श का अनुभव हृदय, कण्ठ और कपाल तक करेगा। इसके बाद साधक वेग से वायु को पूरित करे तथा वेग से ही छोड़े। इस क्रिया को वेग से बार–बार करें, जैसे लुहार धौंकनी को तेजी से चलाता है। जब शरीर थकान का अनुभव करें तो दाएं हाथ से प्रणव मुद्रा बनाकर, दाएं नाक से श्वास अन्दर लें, यथासम्भव कुम्भक करें (जालंधर बंध के साथ) तथा धीरे–धीरे बाएं नाक से श्वास को बाहर छोड़ दे।

---

[481] ह0प्र0 2–55
[482] ह0प्र0 2–56
[483] ह0प्र0 2/57
[484] ह0प्र0 2/58
[485] ह0प्र0 2–59
[486] ह0प्र0 2–60
[487] ह0प्र0 2–61
[488] ह0प्र0 2–62
[489] ह0प्र0 2–63
[490] ह0प्र0 2–64

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

**लाभ –:**

**विधिवत् कुम्भकं कृत्वा रेचयेदिडयानिलम्।**
**वातपित्तश्लेश्महरं शरीराग्निविवर्धनम्।।**[491]
**कुण्डलीबोधकं क्षिग्रं पवनं सुखदं हितम्।**
**ब्रह्मनाडीमुखेसंस्थकफाद्यर्गलनाशनम्।।**[492]
**सम्यग्गात्रसमुद्भूतगन्थित्रयविभेदकम्।**
**विशेशेणैव कर्तव्यं भस्त्राख्यं कुम्भकंत्विदम्।।**[493]

यह भस्त्रिका प्राणायाम त्रिदोश नाशक है अर्थात् वात–पित्त–कफ से होने वाले सभी रोगों का दूर करता है। जठराग्नि को प्रदीप्त करता है। यह प्राणायाम कुण्डलिनी को जागृत करता है, शरीर में स्थित तीनों ग्रन्थियों का भेदन करता है। यह शरीर को ऊश्मा प्रदान करता है। इसलिए इसका अभ्यास सर्दियों मे करना चाहिए। जिन लोगों को सर्दी, खांसी, जुखाम ज्यादा या बार–बार लगता हो उन्हें इसका अभ्यास नियमित करना चाहिए।

**भ्रामरी प्राणायाम –:**

हठप्रदीपिका में भ्रामरी प्राणायाम का वर्णन करते हुए स्वात्माराम जी ने लिखते है कि –

**वेगाद् घोशं पूरकं भृड्.गनादम, भृड्.गीनादं रेचकं मन्दमन्दम्।**
**योगीन्द्राणामेवमभ्यासयोगात्चित्ते जाता काचिदानन्दलीला।।**[494]

अर्थात् किसी भी ध्यानात्मक आसन में शान्त भाव में बैठें। फिर भ्रमर (नर) के समान वेग से गुंजन करते हुए श्वास अंदर ले तत्पश्चात कुंभक करे फिर भ्रमरी (मादा) के समान गुंजन कर धीरे–धीरे प्रश्वास करें।

**लाभ –:** भ्रामरी प्राणायाम के अभ्यास से मन शान्त होता है, आनंद का अनुभव होता है। सभी प्रकार के मानसिक रोग दूर होते हैं। गले में स्थित ग्रंथियों की मसाज होती हैं।

**सावधानी –:** पूरक तथा रेचक करते हुए धीरे–धीर` ही श्वास–प्रश्वास करें। गुंजन करते हुए स्वर को मध्यम तथा एक स्वर में रखें। अत्यधिक तेज स्वर या वेग का प्रयोग न करें। एक चक्र पूरा होना पर एक–दो सामान्य श्वास प्रश्वास करे तभी दूसरा चक्र प्रारम्भ करें।

**मूर्च्छा प्राणायाम –:**

हठप्रदीपिका में मूर्च्छा प्राणायाम का वर्णन करते हुए स्वात्माराम जी ने लिखते है कि –

**पूरकान्ते गाढतरं बद्ध्वा जालन्धरं शनैः।**
**रेचयेन्मूर्च्छनाख्येयं मनोमूर्च्छा सुखप्रदा।।**[495]

अर्थात् सर्वप्रथम किसी भी ध्यानात्मक आसन में बैठें। कुछ देर सामान्य श्वास–प्रश्वास कर शरीर–मस्तिश्क को शान्त करें (आराम दें), फिर पूरक करें तत्पश्चात् दृढ़ता से जालन्धर बंध लगाएं तथा कुछ देर बाद बहुत धीमे–धीमे श्वास को बाहर छोडे।

**लाभ –:** इस प्राणायाम के अभ्यास से अत्यधिक मन को मूर्च्छा प्रदान करने वाले परमानंद की प्राप्ति होती है। यह स्थिति साधक के लिए बहुत ही आनंदकारी होती है।

**सावधानी –:** जो लोग अत्यधिक कमजोर हो, मिर्गी, उच्चरक्तचाप या हृदय आघात से पीड़ित हो उन्हें यह अभ्यास नहीं करना चाहिए।

**प्लाविनी प्राणायाम –:**

हठप्रदीपिका में प्लाविनी प्राणायाम का वर्णन करते हुए स्वात्माराम जी ने लिखते है कि –

**अन्तः प्रवर्तितोदारमारुतापूरितोदरः।**
**प्यस्यगाधेऽपि सुखात् प्लवते पद्मपत्रवत्।।**[496]

अर्थात् किसी भी ध्यानात्मक आसन में बैठें। गहरा, लम्बा पूरक करते हुए उदर को अत्यधिक मात्रा में वायु से पूरी तरह से भर कर कुम्भक करना ही प्लावनी प्राणायाम कहलाता है।

**लाभ –:** हठप्रदीपिका के अनुसार इसका नियमित अभ्यास करने वाला साधक कभी भी जल में नहीं डूबता वह तो जल में कमल के पत्ते के समान तैरता रहता है।

**सावधानी –:** इस प्राणायाम का अभ्यास नियमित प्राणायाम करने वाले साधकों को ही करना चाहिए, अर्थात् जिन साधकों ने पूर्व के प्राणायामों को सिद्ध कर लिया हो। यह अभ्यास प्रारम्भिक या सामान्य साधक के लिए नहीं है।

**सारांश –:**

मानव जीवन के उद्धार के लिए हमारे महान ऋशि, मुनियों ने अनेक उपाय बताए हैं, उनमें से प्राणायाम साधना एक महत्वपूर्ण साधन हैं। प्राणायाम का मुख्य उद्देश्य सम्पूर्ण शरीर में प्राणीक ऊर्जा के प्रवाह को नियन्त्रित करना हैं। प्राणायाम के नियमित अभ्यास से शरीर में स्थित समस्त नाड़ियों का शोधन होता है जिससे

---

491 ह0प्र0 2–65
492 ह0प्र0 2–66
493 ह0प्र0 2–67
494 ह0प्र0 2–68
495 ह0प्र0 2–69
496 ह0प्र0 2–70

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

प्राण का प्रवाह नाड़ियों में सुचारू रूप से होता है जिसके परिणामस्वरूप साधक को भौतिक एवं मानसिक स्थिरता प्राप्त होती हैं। प्राणायाम के अभ्यास से सभी रोगों का नाश होता है साथ ही श्वसन संस्थान पूर्ण रूप से सक्रिय होता है। प्राणायाम के अभ्यास से केवल शारीरिक एवं मानसिक लाभ ही नहीं बल्कि आध्यात्मिक उन्नति भी प्राप्त होती है। इसके अभ्यास से शरीर में सोयी हुयी शक्तियां भी जाग्रत होती हैं। जिज्ञासु साधकों को चाहिए कि एक उचित मार्गद र्शन में ही इनका अभ्यास करें।

## सन्दर्भग्रन्थसूची


- **२००२ - हठयोग प्रदीपिका- स्वामी स्वात्माराम-औत, संस्करण कर्ता- स्वामी दिगम्बर जी, प्रकाशक कैवल्यधाम।**

2013 – हठयोग प्रदीपिका, व्याख्याकार– परमहंस स्वामी आनंदभारती, चौखंबा ओरिएंटालिया,दिल्ली

- **२००५ - आसन,प्राणायाम,मुद्राबंध- स्वामी सत्यानन्द सरस्वती योग पब्लिके न्स ट्रस्ट, मुंगेर,बिहार।**
- 1996 – पातंजल योगदर्शन– आचार्य राजवीर शास्त्री, आर्ष साहित्य प्रचार ट्रस्ट, खारी बावली, दिल्ली।
- 2004 – हठयोग प्रदीपिका, टीकाकार, – निरंजनानन्द सरस्वती, योग पब्लिके न्स ट्रस्ट, मुंगेर,बिहार।


# अङ्गवृत्तपरिभाषा[497]

## प्रमुखशब्दाः

**अङ्गवृत्तपरिभाषा,युष्मभ्यम्, आङ्गाधिकारस्थम्, अनित्यत्वम्, शेषे लोपः, भ्यो भ्यम् ,यूयम्, वयम्।**

## शोधसारः


व्याकरणशास्त्रे परिभाषेन्दुशेखरस्य महत्वं बहु वर्तते। परिभाषा नाम अनियमे नियमकारिणी। अनियमे नियमकारिणीत्वं परिभाषात्वम्। परिभाषेन्दुशेखरे ज्ञापकसिद्धानि,न्यायसिद्धानि, भाष्यवार्तिकयोरुपनिबद्धानि परिभाषारूपाणि निरूपितानि। तासु परिभाषासु परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इत्यादयः अन्यतमाः। अङ्गवृत्तपरिभाषा तावत् एकस्य अङ्गाधिकारस्य प्रवृत्तौ सत्यां पुनरन्यस्य अङ्गाधिकारीयकार्यस्य प्रवृत्तिर्नभवतीति बोधयति। एवमेव किं यत्तदोर्निर्धारणे द्वयोरेकतरस्य डतरच् इत्यत्र द्वयोरिति निर्देशादनित्यैषा। इत्येवंरूपेण परिभाषायाः प्रस्तावः,परिभाषार्थः,परिभाषायाःज्ञापकम्, अनित्यत्वम्, अनित्यत्वे परिभाषायाः फलानि अत्र शोधपत्रे निरूपितमस्ति।


## मूलप्रबन्धः

युष्मच्छब्दात् भ्यस्प्रत्यये इत्यत्र भ्यम् इति पदच्छेदपक्षेभ्यसः भ्यमादेशे कृते, शेषो लोपः इति सूत्रेण युष्मदित्यत्र अन्त्यस्य दकारस्य लोपे युष्मभ्यम् इत्यभीष्टरूपं सिध्यति। अत्र युष्म+भ्यम् इत्यत्र बहुवचने झल्येत् इति सूत्रविहितमेत्वं कुतो न स्यादिति संशयः। अतः पूर्वोक्तस्थले तत्तत्कार्यवारणाय परिभाषेयमारब्धा - अङ्गवृत्तेपुनर्वृत्तावविधिः इति। अङ्गे=अङ्गाधिकारे, वृत्तं = निष्पन्नं


[497] **Dr. G.S.V. Dattatreyamurthy**, Assistant professor in Vyakarana, Department of Sanskrit & Indian Culture

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

यत्कार्यं, तस्मिन् सति पुनरन्यस्याङ्गकार्यस्य वृत्तौ=प्रवृत्तौ अविधिः= अविधानं भवतीति परिभाषार्थः। एकस्मिन् लक्ष्ये एकस्य अङ्गाधिकारीयकार्यस्य प्रवृत्तौ सत्यां, पुनः अन्यस्य अङ्गाधिकारीयस्य कार्यस्य प्रवृत्तिः न भवतीति सारः। अत एव अङ्गकार्ये कृते पुनर्नाङ्गकार्यमि ति व्यवहारः। एवञ्च प्रकृते युष्मद्+भ्याम् इत्यत्र शेषो लोपः अङ्गाधिकारस्थम्। तस्य प्रवृत्तौ सत्यां पुनः अङ्गाधिकारीयस्य बहुवचने झल्येत् इत्येत्वस्य प्रवृत्तिः न भवति, अतो न दोषः।

एषा परिभाषा अनित्या। अनित्यत्वे मानं तावत् ज्यादादीयसः इति सूत्रे आद्ग्रहणम्। तथाहि- अयमनयोः प्रशस्यः इति विग्रहे प्रशस्य शब्दात् द्विवचनविभज्योपपदे तरबीयसुनौ इति सूत्रेण ईयसुन् प्रत्यये, प्रशस्य +ईयसइतिजातेज्य च इति सूत्रेण प्रकृतेः ज्यशब्दस्य ज्यादेशे, ज्य+ईयस्इतिजाते, ज्यादादीयसः इति सूत्रेण ईयसघटकेकारस्य आकारे ज्य +आयस्इतिजाते, सवर्णदीर्घे ज्यायस् इति जाते, तस्य कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां, प्रथमैकवचने सुप्रत्यये ज्यायस् +स् इतिजाते, उगिदचां सर्वनामस्थानेधातोः इति सूत्रेण नुमागमे, सर्वनामस्थाने चासम्बुद्धौ इत्यनेन उपधादीर्घे, ज्यायान्स् स् इति जाते, हल्ङ्यादिलोपे, संयोगान्तलोपे च कृते ज्यायान् इति रूपं भवति।

**अत्र संशयः**-ज्यादादीयसः इति सूत्रे दीर्घोच्चारणं मास्तु, ज्यादईयसः इत्येव सूत्रं पठ्यताम्, बहोर्लोपो भू च बहोः इति सूत्राल्लोप इत्यनुवर्तते। तथा च ज्यशब्दात् परस्य ईयस्घटकेकारस्य लोपो भवतीत्यर्थः स्यात्। तथा च ज्य+ईयसइत्यवस्थायां ईकारस्य लोपे, ज्य+यस्इति जाते, अकृत्सार्वधातुकयोर्दीर्घः इति सूत्रेण दीर्घे ज्यायान् इत्यभीष्टरूपं सिध्यति खलु इति।

**समाधानम्**- पूर्वोक्तरीत्या अभीष्टरूपे सिद्धे सति ज्यादादीयसः इति सूत्रे आकारोच्चारणं (एषा ज्ञापिता। अत्र भाष्यम् -दीर्घोच्चारणं किमर्थं न " ज्ञाजनोर्ज्ञ " इत्येवोच्येत ? का रूपसिद्धिः? जानाति,जायते । अतो दीर्घो यञि इति दीर्घत्वं भविष्यति। एवं तर्हि सिद्धे यद्दीर्घोच्चारणं करोति यज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा "अङ्गवृत्ते पुनर्वृत्तावविधिरिति "। किमेतस्य ज्ञापने प्रयोजनम् ? पिबतेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति।।इति।।)व्यर्थं सत् एनां परिभाषां ज्ञापयति-अङ्गवृत्तेपुनर्वृत्तावविधिरिति। ज्ञापितायां तु अङ्गकार्ये कृते पुनर्नाङ्गकार्यमिति कृत्वा एकस्य अङ्गाधिकारीयस्थ लोपरूपकार्यस्य प्रवृत्तौ सत्यां, पुनः अन्यस्य अङ्गाधिकारीयस्थ अकृत्सार्वधातुकयोरिति दीर्घरूपं कार्यं न भवेदिति कृत्वा, ज्यायान् इत्यत्र आत्वसंपादनार्थमाद्ग्रहणमावश्यकम्। अतः स्वांशे चारितार्थ्यमपि वर्तते।

यद्यपि ज्यायान् इत्यत्र सूक्ष्मदृष्ट्या परिशील्यमाने ज्यात्परस्य ईकारस्यात्वं भवतीत्यर्थकस्य ज्यादादीयसः इति सूत्रविहितात्वरूपाङ्गकार्यस्यस्य स्थानी ईकारः, अजन्ताङ्गस्य दीर्घः स्यात् यादौ प्रत्यये परे नतु कृत्सार्वधातुकयोः इत्यर्थकस्य अकृत्सार्वधातुकयोर्दीर्घः इत्यस्य दीर्घारूपाङ्गकार्यस्य च स्थानी ज्यघटकाकारः इति उभयोः स्थानिभेदस्य स्पष्टत्वात् प्रकृतपरिभाषात्र कथं वा प्रवर्तते इति नाशङ्कनीयम्, कुत इति चेत् ज्यादादीयसः इति ज्ञापकताप्रतिपादनपरक-भाष्यप्रमाण्यात्, धर्मिग्राहकमानाच्च भिन्नस्थानिकाङ्गकार्यविषयेप्येषा प्रवर्तते। अत एव यूयम्, वयम् इत्यत्र यूयवयादेशोत्तरम् अमादेशस्य स्थानिवद्भावेन जश्त्वेन जशःशी इति सूत्रविहिति शीभावे न। अर्थात् यत्र अङ्गकार्यद्वयस्य स्थानिनौ भिन्नौ तत्रापीयं परिभाषा प्रवर्तते इति सारः।

**परिभाषायाः अनित्यत्वम्**- कियत्तदोर्निर्धारणे द्वयोरेकस्य डतरच् (इदमुपलक्षणम्। यत्तदेतेभ्यः, हलि सर्वेषाम् इत्यादेरपि ग्रहणम्) इति सूत्रे द्वयोरिति निर्देशात् इयं परिभाषानित्या।तथाहि- द्विशब्दात्

Since 2010
ISSN- 0976-8645
UGC RN-41039

षष्ठीद्विवचने ओस्प्रत्यये द्वि + ओस् इति स्थिते त्यदाद्यत्वे, पररूपत्वे च कृते द्व+ओस् इति जाते, एत्वे द्वे+ओस् इति जाते अयादेशे द्वयोस् इति जाते, रुत्वविसर्गयोः कृतयोः द्वयोरिति अभीष्टरूपं सिध्यति। वस्तुतः अत्र अङ्गवृत्तपरिभाषया एत्वेन न भाव्यम्। त्यदादीनामः इति सूत्रमङ्गाधिकारस्थम्,ओसि चइति सूत्रमपि अङ्गाधिकारस्थम्। यदीयं परिभाषा नित्या स्यात् द्वयोरिति निर्देशः अनुपन्नः स्यात्, अङ्गकार्ये कृते पुनर्अङ्गकार्यमिति सत्वात्। तथा च द्वयोरिति निर्देशः अस्याः अनित्यत्वे ज्ञापकः।अनित्यत्वबललभ्यार्थमादायैवभ्यसो भ्यम् इति सूत्रे निष्ठितस्य = परिनिष्ठितस्येतिपठन्ति। तथाचायमर्थः पलितः- यदङ्गकार्यप्रवृत्तिमन्तरेणैव प्रयोगस्य परिनिष्ठितत्वं = साधुत्वं तदेवाङ्गकार्यम्, तत्कृते पुनः न प्रवर्तते। प्रकृते युष्मभ्यमित्यत्र साधुत्वं = परिनिष्ठितत्वम् एत्वं विनैव भवति। अतः एत्वरूपमङ्गकार्यमत्र भ्यामादेशरूपाङ्गकार्ये कृते न प्रवर्तते इति । द्वयोरित्यस्य परिनिष्ठित्वं तावत् एत्वं विना नैव संभवतीति कृत्वा तत्र अङ्गकार्यरूपमेत्वं पुनः प्रवर्तते।(एषा च परिभाषा “ ज्यादादीयसः ”, “ ज्ञाजनोर्जा ” इति सूत्रद्वयेपि ज्ञापितेति भाष्ये स्थितम्। अन्यथा हि ज्यादादिति आकारं न ब्रूयात्। “ बहोर्लोप ” इत्यतो लोपमेवानुवर्तयेत्। “ अकृत्सार्व ” इति दीर्घे सिद्धं ज्यायानिति। आजनोश्च जं विदध्यात्य “ अतो दीर्घो यञि ” इति दीर्घो भविष्यतीति। न चैवं द्वाभ्यामित्यत्र त्यदाद्यत्वे कृते “ सुपि च “ इति दीर्घो न स्यादिति वाच्यम् ? द्वयोरेकस्येत्यादि निर्देशेनोक्तपरिभाषाया अनित्यत्वज्ञापनात्।)

**परिभाषायाः प्रयोजनानि**

1. यूयं, वयम् इत्यत्र शीभाववारणं प्रथमप्रयोजनम्। तथाहि- युष्मदस्मच्छाब्दाभ्यां प्रथमाबहुवचने जसि युष्मद्+जस्, अस्मद्+जस् इति स्थिते अमादेशे, युष्मदस्मदोः मर्यन्तस्य यूयवयौ जसिइति सूत्रेण यूय-वयादेशौ, यूय+अद्+अम् वय+अद्+अम् इति जाते शेषे लोपः इति सूत्रेण टिलोपे अदः लोपे यूयम् वयम् इत्यभीष्टरूपे भवतः।शेषे लोपः इत्यत्र टिलोपः इति एकःपक्षः, अन्त्यलोपः इति द्वितीयः पक्षः। सतोः द्वयोः पक्षयोः प्रकृते कतरः पक्षः समाश्रयणीयः इति चेत्, प्रकृते अन्त्यलोपपक्ष एव समाश्रीयते। तदा यूयम्, वयम् इत्यत्र जसः शी कुतो न भवतीति चेत्- प्रकृतपरिभाषया न भवति। तथाहि- (अङ्गवृत्तेपुनर्वृत्तावविधिः इति परिभाषास्वरूपम्। सकृद् अङ्गकार्यप्रवृत्तौ सत्यां पुनः अन्यस्य अङ्गकार्यस्य प्रवृत्तिः न भवतीति परिभाषार्थः। प्रकृते शेषेलोपः अङ्गाधिकारस्थः। तस्य प्रवृत्तौ सत्यां पुनः अन्यस्य अङ्गाधिकारीयस्य शीभावस्य प्रवृत्तिः न भवति। अतो न दोषः।) वस्तुतः आलोच्यमाने इयं परिभाषा अत्र न प्रवर्तते, कुत इति चेत् शीभावस्य अङ्गाधिकारविहितत्वेऽपि अङ्गाधिकरणकत्वाभावात्। अतः यूयमित्यत्र शीभावो दुर्वार इति चेत् समाधानान्तरमुक्तं मूले- ङेप्रथमयोः इत्यत्र मकारान्तरं प्रश्लिष्य अम् मान्त एवावशिष्यते, न तु विक्रियतइति व्याख्यानाद्वा इति।

**अयंभावः**-ङेप्रथमयोरम् इत्यत्र मकारान्तरं प्रश्लिष्यते। अम् च म् चेति द्वन्द्वः। अम्-म् इत्यत्र विशेषणसमासे मस्य प्रथमानिर्दिष्टत्वेन पूर्वनिपातापत्तिः। असमासे संयोगान्तलोपाप्राप्तौ मद्वयश्रवणापत्तिरिति नाशङ्कनीयम्।ङेप्रथमयोरम्म्, शसो न इति संहितापाठे न व्यञ्जनपरस्य अनेकस्य एकस्य वा उच्चारणे विशेषोऽस्ति इति न्यायेन मद्वयोच्चारणेऽपि एकमकारोच्चारणाविशेषात्, वर्णग्रहणे जातिग्रहणम् इति न्यायेन मद्वये मत्वारोपेण अनुस्वाराद्वा।अन्त्यः मकारः संयोगान्तलोपेन लुप्तः। प्रश्लिष्टश्च मकारः अमः विशेषणम्, तदन्तविधिः। मकारान्तः अम् स्यादिति लभ्यते। अमः मकारान्तस्य पुनर्मान्तत्वविधानाद् अम् मान्त एव भवति। न तु तस्य विकारो

Since 2010
ISSN- 0976-8645
UGC RN-41039

भवतीति लभ्यते, अतश्शीभावो न भवतीति भावः। मकारप्रश्लेषस्य भाष्ये अदर्शनात् कथमिदं समाधानं युज्यते इति चेत्, जशश्शी इत्यत्र सकारप्रश्लेषेण सान्तस्यैव जशः शीभावविधानाद्वा यूयं, वयमित्यत्र शीभावाभावे सिद्धे नैषा परिभाषा अनावश्यकी। अतः प्रथमप्रयोजनमन्यथासिद्धम्।

2.पिबति इत्यत्र गुणाभावः द्वितीयं प्रयोजनम्। तथाहि- तथाहि- पा-पाने इत्यस्माद्धातोः लटि, प्रथमपुरुषैकवचने तिपि, पाघ्राध्मा......इत्यादि सूत्रेण पिबादेशे पिबती त्यभीष्टरूपं सिध्यति। अत्र पिबादेशात्परं प्राप्तलघूपधगुणवारणार्थमपि परिभाषा अनावश्यकी। कुत इति चेत् पिबिरदन्तः इति आकरात्। तस्मात् द्वितीयमपि प्रयोजनमन्यथासिद्धम्। अतः परिभाषानावश्यकी।

3. युष्मभ्यम्, अस्मभ्यम् इत्यत्र एत्ववारणमपि न फलम्। इदं तृतीयं प्रयोजनं परिभाषावतरणे निरूपितम्। अतः इदमपि प्रयोजनमन्यथासिद्धम्। तस्मात् नैषा आवश्यकी।

4. क्रियात्, क्रियास्ताम् इत्यत्र रिङादेशोत्तरं अकृदिति दीर्घाभावः प्रयोजनम्। तथाहि- डुकृञ् करणे इत्यस्याद्धातोः आशीर्लिङि रिङ्शयग्लिङ्क्षु इति सूत्रेण रिङादेशे रूपमिदं क्रियात् इति। अत्र रिङादेशात्परं अकृत्सार्वधतुकयोर्दीर्घः इति सूत्रेण प्राप्तदीर्घवारणार्थं परिभाषैषा अपेक्षितेत्यपि नैवाशङ्कनीयम्। यदि कृते रीङि अकृदिति दीर्घः स्यात् तर्हि रीङ्विधिर्व्यर्थः स्यात्। अत एवोक्तं सिद्धान्तकौमुद्यां रीङि प्रकृते रिङ्विधानसामर्थ्याद्दीर्घो न इति। चतुर्थप्रयोजनमपि अन्यथासिद्धत्वात् क्रियात् इत्यत्र अकृदिति दीर्घवारणार्थमपि परिभाषानावश्यकी।

5. श्रीपाय इत्यत्र सुपि च इति दीर्घोत्तरमातोलोपाभावः प्रयोजनम् । तथाहि- श्रीपाशब्दस्य ह्रस्वो नपंसके प्रातिपदकस्य इत्यनेन ह्रस्वत्वे, ङेर्यादेशे, श्रीप-य इति जाते, सुपि च इति सूत्रेण दीर्घे श्रीपायेत्यभीष्टरूपं भवति। अत्र ह्रस्वात्परं प इत्यस्य एकदेशविकृतन्यायेन धातुत्वात् दीर्घे कृते आकारान्तत्वाच्च, यादेशस्य स्वतो यकारादितया, स्थानिवत्वेन स्वादिप्रत्ययतया च तस्मिन् परे भसंज्ञाया अपि सत्वात् आतो धातोः इति सूत्रेण आकारलोपः स्यात्, अतस्तद्वारणार्थं प्रकृतपरिभाषा अपेक्षितेत्यपि नाशङ्कनीयम्। संनिपातपरिभाषयैव तत्र निर्वाहात्। एवञ्च पञ्चमप्रयोजनमपि अन्यथासिद्धत्वात् श्रीपाय इत्यत्र आतोलोप वारणार्थमपि परिभाषानावश्यकीति सिद्धान्तः। अमुमेवार्थं मनसि निधाय केचित्तु इत्यादिना स्वाशयमाविष्कृतवान् ग्रन्थकारः।

अत्र केचित्- केचित्तु अनया परिभाषया न किञ्चिदभीष्टं लक्ष्यं साध्यते। अत एव ज्ञाजनोर्ज्जा, ज्यादादीयसः इति सूत्रयोरेनां ज्ञापयित्वा, किं प्रयोजनमिति प्रश्ने पिबतेर्गुणप्रतिषेध उक्तः स न वक्तव्य इत्येव प्रयोजनमुक्तं न तु सक्ष्यसिद्धिम्। एवञ्चास्मात् भाष्यात् अस्याः निष्पलत्वं लभ्यते। तथाहि- पापाने इत्यस्माद्धातोः लटि, प्रथमपुरुषैकवचने तिपि, पिबादेशे पिबती त्यभीष्टरूपं सिध्यति। अत्र पिबादेशात्परं लघूपधगुणः प्राप्तः तद्वारणार्थं पिबतेर्गुणप्रतिषेध इति वार्तिकमारब्धं श्रीमता वार्तिककृता। वस्तुतः आलोच्यमाने वार्तिकमिदमनावश्यकमेव। पिबतीत्यत्र पिबादेशरूपाङ्गकार्ये कृते पुनः लघूपधगुणरूपाङ्गकार्यस्य अप्रवर्तनादेव = अङ्गकार्ये कृते पुनर्नाङ्गकार्यमित्यस्य सत्वादेव गुणवारणसंभवात् व्यर्थं तद्वार्तिकमिति भावः।तर्हि पिबतीत्यत्र कथं गुणः वार्यते इति चेत् पिबिरदन्तः इति कैयटवचनात्। तथा च पिबतीत्यत्र लघूपधत्वाभावेन गुणो नैव प्रवर्तते। एवञ्च इदमपि प्रयोजनमन्यथासिद्धमिति कृत्वा परिभाषायाः अवसर एव नास्तीति भाष्याभिप्रायः। (अत्रारुचिबीजं तु ‘ युष्मभ्यम्‘ इत्यत्रैव वारणाय ” भ्यो भ्यम् ” इत्यत्र ‘ अभ्यम्‘ इति छेदः, ‘ पिब‘ इत्यत्र स्थानिवद्भावेनाङ्गत्वं स्वाश्रयं लघूपधत्वञ्चाश्रित्य जायमानलघूपधगुणवारणाय पिबादेशो दन्तः, अथवा ‘

Since 2010
ISSN- 0976-8645
UGC RN-41039

कुरुवधपिबां प्रतिषेधो वक्तव्यः ‘ इति स्थानिवत्वप्रतिषेधः, ‘ यूयम्’ इत्यत्र जशः शीवारणाय ” ङे प्रथमयोरम् ” इत्यत्र मकारान्तरं प्रश्लिष्य ‘ अम् ‘ मान्त एवावशिष्यते, अथवा ” जशः शी ” इत्यत्र सकारान्तरं प्रश्लिष्य जशः शी इत्यादि तत्र तत्रानेककल्पनापेक्षया परिभाषाश्रयणमेव वरमिति।)

यद्येवं चेत् युष्मभ्यमित्यत्र कथं एत्वावारणमिति चेत्, भ्यसो भ्यम् इत्यत्र अभ्यमिति पदच्छेदं कृत्वा युष्मद् अभ्यम् इति जाते शेषे लोपः इत्यन्त्यस्य दकारस्य लोपे, झल्परत्वाभावेन एत्वाप्राप्त्या, अतो गुणे इति पररूपे जाते युष्मभ्यमिति रूपं सिध्यति। तस्मात् परिभाषा अनावश्यकीति सिद्धान्तः।

## सन्दर्भग्रन्थसूची


- झा, नरेश सम्पादकः। *धातुपाठः।* वाराणसी : चौखम्वा सुरभारती प्रकाशन, २०१७।
- त्रिपाठी, जयशङ्करलाल सुधाकरमालवीय च सम्पादकौ। *काशिका* (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)। वाराणसी : तारा प्रिण्टिङ्ग वकर्स, प्रथमभागः १९८६, द्वितीयभागः १९८६, चतुर्थभागः१९८४।
- मिश्र, रमाशंकर, सम्पादकः। *अष्टाध्यायीसूत्रपाठः।* दिल्ली : मोतीलाल बनारसीदास, २००५।
- शर्मा, गिरीधर, परमेश्वरानन्दशर्मा च सम्पादकौ। *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्त्वबोधिनी-समेता)। दिल्ली : मोतीलाल बनारसीदासः, प्रथमभागः १९७७, द्वितीयभागः १९८२, तृतीयभागः १९७७, चतुर्थभागः १९७९।


# स्पन्दशब्दप्रियो राजानकः कुन्तकः[498]

## प्रमुखशब्दाः

राजानकः कुन्तकः, प्रत्यभिज्ञादर्शनम्, शैवागमः

## शोधसारः

शारदादेशस्य वरदपुत्रो राजानकः कुन्तकः प्रत्यभिज्ञादर्शनं विद्वान् आसीदिति वक्रोक्तिजीवि-ताख्यो ग्रन्थः सुष्ठु प्रमाणीकरोति। अयमाचार्यः पण्डितमण्डलीनायको नवनिर्माणनैपुण्यनिरुपमान-कविप्रकाण्डः सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दरो ध्वनिसिद्धान्तं खण्डयित्वा ध्वनेः समेषामपि भेदानामन्तर्भावं वक्रोक्तावेवाकार्षीत्।

## मूलप्रबन्धः

शारदादेशस्य वरदपुत्रो राजानकः कुन्तकः प्रत्यभिज्ञादर्शनं विद्वान् आसीदिति वक्रोक्तिजीवि-ताख्यो ग्रन्थः सुष्ठु प्रमाणीकरोति। अयमाचार्यः पण्डितमण्डलीनायको नवनिर्माणनैपुण्यनिरुपमान-कविप्रकाण्डः सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दरो ध्वनिसिद्धान्तं खण्डयित्वा ध्वनेः समेषामपि भेदानामन्तर्भावं वक्रोक्तावेवाकार्षीत्। वक्रोक्तिजीविते लिलेख सः— यस्मादत्र ध्वनिकारेण व्यङ्ग्यव्यञ्जकभावोऽत्र सुतरां समर्थितः तत् किं पौनरुक्त्येन।[1]

साहित्यसौदामिन्यां गोपालभट्टेन कुन्तकाचार्यस्य प्रशंसा इत्थमुपावर्णि—

वक्रानुरञ्जिनीमुक्तिं शुक इव मुखे वहन्।
कुन्तकः क्रीडति सुखं कीर्तिस्फटिकपञ्जरे॥[2]

[498] डॉ.राधावल्लभशर्मा, सहायकाचार्यः, साहित्यविभागे, हरियाणासंस्कृतविद्यापीठम्(नवदेहलीस्थकेन्द्रीय-संस्कृतविश्वविद्यालयेन सम्बद्धम्)बघौला, पलवलम्, हरियाणा

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

वक्रोक्तिजीविते नैकेषु स्थलेषु स्पन्दशब्दस्योल्लेखो व्यधायि काश्मीररत्नेन कुन्तकेन। आदौ तावद् ग्रन्थारम्भे ग्रन्थपरिसमाप्तिकामनया विघ्नविध्वंसकामो मङ्गलमाचरेदिति धिया च वृत्तिभागे मङ्गलमाचरन्नित्थमाह ग्रन्थकारः कुन्तकः—

जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम्।
शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः॥[3]

इह परिस्पन्दशब्दस्य प्रयोगोऽकारि वक्रोक्तिजीवितकर्त्रा। शब्दोऽयं शैवागमे प्रत्यभिज्ञादर्शने वा वर्णितो वर्तते। वस्तुतः प्रत्यभिज्ञादर्शने एकमात्रं परमतत्त्वं वरीवर्ति परमशिवः। शिवोऽयम् अद्वैतो निर्विकारः सच्चिदानन्दस्वरूपश्च वर्तते। शिवदृष्टौ शिवस्वरूपमित्थं न्यरूपि विदुषा सोमानन्देन—

आत्मैव सर्वभावेषु स्फुरन्निर्वृत्तचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः॥[4]

शिवस्य शक्तयोऽनन्ताः। भण्यते शिवदृष्टौ—शक्तयश्चासङ्ख्येयाः।[5] परन्तु प्रामुख्येन शिवोऽयं पञ्चशक्तिषु निर्भरः। प्रोच्यते शिवदृष्टौ— वस्तुत एताश्शक्तयः शिवाद्भिन्ना न शक्तिशक्तिमतोरभेदन्यायात्। शक्तिशक्तिमतो भवत्यभेद-सम्बन्धः। यथा अग्निः तस्य दाहकत्वञ्च परस्परमभिन्नावेव स्तः। शक्तिमानग्निः वर्तते, शक्तिश्च वर्तते दाहकत्वमिति।[6] तथोच्यते—

न शिवेन विना शक्तिर्न शक्त्या रहितः शिवः।
तादात्म्यमनयोर्नित्यं वह्निदाहकयोरिव॥
परस्परस्थितौ सम्पत्फलदौ च परस्परम्।[7]

आचार्यसोमानन्दः प्राह शिवदृष्टौ—

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।
शिवः शक्तस्तथा भावानिच्छया कर्तुमीहते॥
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते।[8]

कूर्मपुराणे गद्यते—

शक्तिशक्तिमतोर्भेदः वदन्त्यपरमार्थतः।
अभेदमनुपश्यन्ति योगिनस्तत्त्वचिन्तकाः॥[9]

परिमलो जगाद—

आलेख्यविशेष इव गजवृषभयोर्द्वयोः प्रतिभासम्।
एकस्मिन्नेवार्थे शिवशक्तिविभागकल्पनां कुर्मः॥[10]

शिवस्य पञ्चशक्तय एतास्सन्ति- चित् शक्तिः, आनन्दशक्तिः, इच्छाशक्तिः, ज्ञानशक्तिः, क्रियाशक्तिश्चेति। तत्र तावत् प्रकाशरूपता चिच्छक्तिः, स्वातन्त्र्यमानन्दशक्तिः, तच्चमत्कार इच्छा-शक्तिः। चमत्कारस्तु इत्थम्बुभूषालक्षण इति, आमर्शात्मकता ज्ञानशक्तिः। ईषत्तया वेद्योन्मुखता आमर्श इति। सर्वाकारयोगित्वं क्रियाशक्तिरिति च।

शक्तियुतश्शिव एव प्रभवितुं शक्तः। शाङ्करभाष्ये वर्ण्यते— नहि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यति।[11] तस्मादभाणि भगवत्पादैः श्रीशङ्कराचार्यैः—

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्।
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि॥[12]

तस्मादुच्यते केनचित्कविना—

न शिवेन विना देवी न देव्या च विना शिवः।
नानयोरन्तरं किञ्चित् चन्द्रचन्द्रिकयोरिव॥[13]

एवञ्च—

परोऽपि शक्तिरहितः शक्तः कर्तुं न किञ्चन।
शक्तः स्यात्परमेशानि शक्त्या युक्तो भवेद्यदि॥[14]

स्पन्दपदार्थः प्रत्यभिज्ञादर्शनस्य साधनापक्षेन सह सम्बन्धं प्रत्याख्याति। परमेश्वरस्य परमका-रुणिकस्य स्वातन्त्र्यशक्तिरेव किञ्चिच्चलनात्मकत्वात् स्पन्दनाम्नाभिधीयते। स्पन्दः परमशिवस्य नित्यः स्वभावो वरीवर्ति। स्पन्दोऽयं शब्दः

Since 2010
ISSN- 0976-8645
UGC RN-41039

स्पदि किञ्चिच्चलने अनेन धातुना निष्पन्नतां याति। यस्यार्थो भवति स्पन्दनम्, परिस्पन्दनं चेति। इत्थं शक्तौ यद्भवति परिस्फुरणं तदेव स्पन्दः इति नाम्ना कथ्यते। वस्तुतः शक्तेः स्पन्द एवेदं जगत्। जगतः सत्ता स्पन्दरूपैव। अतो जगदिदं परमशिवात् पृथक् न तिष्ठति। भण्यते प्रत्यभिज्ञाहृदये—

पराशक्तिरूपा चितिरेव भगवती शक्तिः शिवभट्टारकाभिन्ना तत्तदनन्तजगदात्मना स्फुरति।[15]

स्पन्दप्रदीपिकायाम् उत्पलाचार्यो निरूपयाञ्चक्रे स्पन्दस्वरूपमित्थम्—स्पदि किञ्चिच्चलने इति स्पन्दनात् स्पन्दः। स्पन्दनञ्च निस्तरङ्गस्यास्य तावत् परमात्मनः युगपन्निर्विकल्पा या सर्वत्रौन्मुख्यवृत्तिता।[16] अस्यायमभिप्रायो यत् अद्वैतस्य शिवस्यानेकतायामाभास एव स्पन्द इति।

नन्वयं स्पन्दः शक्तिधर्म उत शिवधर्मः अथवा द्वाभ्यामपि धर्मः। वस्तुतः शिवो वर्तते निष्क्रियः शान्तश्चेति। शान्ते पदे स्पन्दस्याभावः सर्वथा युक्तिसङ्गत एव। शक्तिमानपि शिवः स्वकीयां प्रकृतिं न परिवर्तयति। शक्तिश्च वर्तते त्रिगुणात्मिका। तस्याः स्वभावो वर्तते सर्वथा सक्रियः। अत इच्छाज्ञान-क्रियासु भवति तस्याभिव्यक्तिः। अतः स्पन्दः शक्तावेव भवितुं शक्यः शिवे नैव। वस्तुतः शिवो वर्तते अहं भावः। शक्तिश्च वर्तते इदं भावात्मिका। शक्तिः स्वयमेव शक्तिमान् वर्तते। इदं भावः अहमित्यस्य वृत्तिरूपः। अहम् इत्यनेन विना इदमित्यस्य सत्ता न तिष्ठति। सृष्टिरचनायामनयोर्द्वयोः तत्त्वयोः प्राधान्यम्। अयमेव स्पन्द इति।

स्पन्दस्यास्योपचारतो भेदद्वयं विद्यते। सामान्यः स्पन्दः, विशेषः स्पन्दश्चेति। स्पन्दकारिका-यामस्य सामान्यस्पन्दस्य लक्षणमित्थं निरणायि वसुगुप्तेन—

परमकारणभूतस्य सत्यस्य आत्मस्वरूपस्य अयमहमस्मि अतः सर्वं प्रभवति, अत्रैव च प्रलीयते इति प्रत्ययविमर्शात्मको निजो धर्मः सामान्यस्पन्दः[17]

अनेन सामान्यस्पन्देनास्माभिः परमशिवस्य सत्तायाः ज्ञानमनुभूयते।

विशेषस्पन्दमित्थं लक्षयामास वसुगुप्ताचार्यः—

विशेषस्पन्दः अनात्मभूतेषु, देहादिषु, आत्माभिमानमुद्भावयन्तः परस्परभिन्नमायीयप्रमातृ-विषयाः सुखितोऽहं दुःखितोऽहमित्यादयो गुणमयाः स्पन्दप्रवाहाः संसारहेतवः।[18]

वक्रोक्तिजीविते वक्तोक्तिसिद्धान्तप्रतिष्ठापक आचार्यः कुन्तकः स्पन्दशब्दस्य भूयांसं प्रयोगं चकार। ऐदम्प्राथम्येन तत्र तावत् स्वभावार्थे अस्य प्रयोगः—

1. काव्यमार्गे अर्थः कीदृशो भवितव्य इत्यस्मिन् प्रसङ्गे—

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥[19]

इत्यत्र अर्थश्च वाच्यलक्षणः कीदृशः? काव्ये यः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः काव्यार्थविद-स्तेषामाह्लादमानन्दं करोति यस्तेन स्वस्पन्देनात्मीयेन स्वभावेन सुन्दरः सुकुमार इति। तदेतदुक्तं भवति— यद्यपि पदार्थस्य नानाविधधर्मखचितत्वं संभवति तथापि तथाविधेन धर्मेण सम्बन्धः समाख्यायते यः सहृदयहृदयाह्लादमाधातुं क्षमते। तस्य च तदाह्लादसामर्थ्यं संभाव्यते येन काचिदेव स्वभावमहत्ता रसपरिपोषाङ्गत्वं वा व्यक्तिमासादयति।[20]

2.कविकौशलसन्दर्भे—

वक्रतायाः प्रकाराणामौचित्यगुणशालिनाम्।
एतदुत्तेजनायालं स्वस्पन्दमहतामपि॥[21]

अत्रागतस्य स्पन्दशब्दस्य स्वभावार्थे प्रयोगो रमणीयतमः।

Since 2010
ISSN- 0976-8645
UGC RN-41039

3.रीतिविभाजनं खण्डयित्वा स्वमतोपस्थापनसन्दर्भे—

तया च तदुभयपरिस्पन्दसुन्दरव्युत्पत्त्युपार्जनमाचरति।[22]

4.साहित्यपरिभाषाप्रसङ्गे-

सा काप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा।

अत्र स्पन्दशब्दस्यार्थः स्वभावो वर्तते॥[23]

5.स्वभावोक्त्यलङ्कारनिरूपणप्रसङ्गे-

अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः।

अलङ्कार्यतया तेषां किमन्यदवतिष्ठते॥[24]

येषामलङ्कारकृतामलङ्कारकाराणां स्वभावोक्तिरलङ्कृतिः, या स्वभावस्य पदार्थधर्मलक्षणस्य परिस्पन्दस्य उक्तिरभिधा सैवालङ्कृतिरलङ्करणमिति प्रतिभाति।

6.पदपूर्वार्धवक्रतायाः पर्यायप्रकारे कारणमिति प्रसङ्गे—

यद्यपि वर्ण्यमानस्य वस्तुनः प्रकारान्तरोल्लासकत्वेन व्यवस्थितिस्तथापि परिस्पन्दसौन्दर्यसम्पदेव सहृदयहृदयहारितां प्रतिपद्यते।[25]

7.भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहम् इत्यस्मिन्मेघदूतपद्ये अबलाश्रेणिमोक्षोत्सुकानि इत्यस्य शब्दस्य व्याख्यानसन्दर्भे—

अत्र यः पदार्थपरिस्पन्दः कविनोपनिबद्धः प्रबन्धस्य मेघदूतत्वे परमार्थतः स एव जीवितमिति सुतरां सहृदयहृदयह्लादकारीति।[26]

8.दंष्ट्रापिण्डेषु सद्यः इत्यस्य पद्यस्य व्याख्याकाले—

स्वभावसम्भविनस्तत्परिस्पन्दान्तरस्य इत्यत्र परिस्पन्दस्य स्वभावार्थे प्रयोग इति।[27]

9.द्वयं गतं सम्प्रति शोचनीयतां कुमारसम्भवस्यास्य पद्यस्य व्याख्यानसन्दर्भे—

यस्मात्प्रतिभायां तत्कालोल्लेखितेन केनचित्परिस्पन्देन परिस्फुरन्तः पदार्थाः प्रकृतप्रस्तावसमुचितेन केनचिदुत्कर्षेण वा समाच्छादितस्वभावाः।[28]

अत्र परिस्पन्दशब्दस्य तात्पर्यार्थः स्वभाव एवेति।

10.वाक्यवक्रतावैचित्र्यमासूत्रयितुं वाच्यस्य वर्णनीयतया प्रस्तावाधिकृतस्य वस्तुनो वक्रतास्वरूपनि-रूपणसन्दर्भे—

उदारस्वपरिस्पन्दसुन्दरत्वेन वर्णनम्।

वस्तुनो वक्रशब्दैकगोचरत्वेन वक्रता॥[29]

कारिकायामत्रागतस्य परिस्पन्दशब्दस्य व्याख्यामित्थं प्राकाशयत् कारिकाकारो राजानकः कुन्तकः—

उदारः सोत्कर्षः सर्वातिशायी यः स्वपरिस्पन्दः स्वभावमहिमा तस्य सुन्दरत्वं, सौकुमार्या-तिशयः।

11.वक्रतास्वरूपनिरूपणावसरे—

अयमपरः प्रकारो यत्र स्वपरिस्पन्दकाष्ठाधिरूढेः सातिशयं वस्तु वचसामगोचर इति प्रथयितुं सर्वनाम्ना समाच्छाद्य तत्कार्याभिधायिना तदतिशयवाचिना वाक्यान्तरेण समुन्मील्यते।[30]

12. स्वभावोक्त्यङ्कारखण्डनसन्दर्भे—

उच्यते वक्रोक्तिजीविते—

स्वभावव्यतिरेकेण वक्तुमेव न युज्यते।

वस्तु तद्रहितं यस्मान्निरूपाख्यं प्रसज्यते॥[31]

कारिकायामस्यामागतस्य स्वभावव्यतिरेकेण पदस्यास्य पर्यायमित्थं वर्णयामास वृत्तौ कुन्तकाचार्यः—

स्वभावव्यतिरेकेण स्वपरिस्पन्दं विना निःस्वभावं वक्तुमभिधातुमेव न युज्यते न शक्यते।[32]

13. स्वभावोक्त्यलङ्कारखण्डनसन्दर्भे—

भूषणत्वे स्वभावस्य विहिते भूषणान्तरे।

भेदावबोधः प्रकटस्तयोरप्रकटोऽथवा॥[33]

अत्रागतस्य स्वभावस्य पदस्यास्य व्याख्यामित्थं कुर्वते ग्रन्थकारः—भूषणत्वे स्वभावस्याल-ङ्कारत्वे स्वपरिस्पन्दस्य

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

इति।[34]

14. अप्रस्तुतप्रशंसालङ्कारव्याख्यानकाले— द्विविधो हि प्रस्तुतः पदार्थः सम्भवति- वाक्यान्तर्भूत-पदमात्रसिद्धः सकलवाक्यव्यापकार्थो विविधस्वपरिस्पन्दातिशयविशिष्टप्राधान्येन वर्तमानश्च।[35]

15. ससन्देहालङ्कारसन्दर्भे—

यस्मिन्नुत्प्रेक्षितं रूपं सन्देहमेति वस्तुनः।
उत्प्रेक्षान्तरसद्भावाद् विच्छित्यै प्रतिभावशात्॥[36]

अस्यायं फलितार्थः-यस्मिन्नलङ्करणे सम्भावनानुमानात् साम्यसमन्वयाच्च स्वरूपान्तरसमारोपद्वारेणोत्प्रेक्षितं प्रतिभालिखितं रूपं पदार्थपरिस्पन्दलक्षणं सन्देहमेति संशयमारोहतीति।[37]

16. विचित्रमार्गस्य लक्षणप्रसङ्गे—

स्वभावः सरसाकूतो भावानां यत्र बध्यते।
केनापि कमनीयेन वैचित्र्येणोपबृंहितः॥[38]

कारिकायामस्यां समागतस्य स्वभावः पदमिदमित्थं व्याख्याति वृत्तिकारो राजानकः कुन्तकः-यत्र यस्मिन् भावानां स्वभावः स्वपरिस्पन्दः सरसाकूतो रसनिर्भराभिप्राय इति।[39]

17. औचित्यगुणस्वरूपसन्दर्भे—

यत्र वक्तुः प्रमातुर्वा वाच्यं शोभातिशायिना।
आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते॥[40]

अत्रागतस्य स्वभावेन इति पदस्यास्य व्याख्यानमित्थमाचष्टे वक्रोक्तिजीवितकारः-यत्र यस्मिन् वक्तुरभिधातुः प्रमातुर्वा श्रोतुर्वा स्वभावेन स्वपरिस्पन्देन वाच्यमभिधेयम्।[41]

18.उत्प्रेक्षालङ्कारस्य भेदसन्दर्भे–

प्रतिभासात्तथा बोद्धुः स्वस्पन्दमहिमोचितम्।
वस्तुनो निष्क्रियस्यापि क्रियायां कर्तृतार्पणम्॥[42]

अत्रागतस्य स्वस्पन्दमहिमोचितम् अस्येत्थं व्याख्यानम्—तस्य पदार्थस्य यः स्वस्पन्दमहिमा स्वभावोत्कर्षस्तस्योचितमनुरूपम्।

19. वक्रतानिरूपणावसरे—

यस्मात् स्वाभाविकसौकुमार्यप्राधान्येन वर्ण्यमानस्योदारस्वपरिस्पन्दमहिम्नः सहजच्छायातिरोधानविधायिप्रतीत्यन्तरापेक्षमलङ्करणकल्पनं नोपकारितां प्रतिपद्यते।[43]

20. व्यतिरेकालङ्कारप्रसङ्गे—

सति तच्छब्दवाच्यत्वे धर्मसाम्येऽन्यथास्थिते।
व्यतिरेचनमन्यस्मात् प्रस्तुतोत्कर्षसिद्धये॥[44]

अत्रागतस्य धर्मशब्दस्येत्थं व्याख्यानं प्रस्तुतमस्ति- धर्मसाम्ये सत्यपि परस्परस्पन्दसादृश्ये विद्यमाने।

इत्थमेतेषु स्थलेषु श्रीमद्राजानककुन्तकाचार्येण स्वभावस्य पर्यायार्थे स्पन्दस्य, स्पन्दस्य च पर्यायार्थे स्वभावस्य वर्णनं समपादि।

स्पन्दशब्दस्य धर्मपर्यायरूपे संप्रयोगः

1.रूढिवैचित्र्यवक्रताया लक्षणप्रसङ्गे—

यत्र रूढेरसंभाव्यधर्माध्यारोपगर्भता।
सद्धर्मातिशयारोपगर्भत्वं वा प्रतीयते॥[45]

लक्षणेऽस्मिन् समागतस्य धर्मः इति पदस्येत्थं व्याख्यानम्—यत्र यस्मिन् विषये रूढिशब्दस्य असम्भाव्यः सम्भावयितुमशक्यो यो धर्मः कश्चित्परिस्पन्दस्तस्याध्यारोपः।[46] संश्चासौ धर्मस्य सद्धर्मः विद्यमानः पदार्थस्य परिस्पन्दः।

2. अतिशयोक्त्यलङ्कारलक्षणप्रसङ्गे—

यस्यामतिशयः कोऽपि विच्छित्त्या प्रतिपाद्यते।
वर्णनीयस्य धर्माणां तद्विदाह्लाददायिनाम्॥[47]

कारिकायामागतस्य वर्णनीयस्य धर्माणाम् इति शब्दस्य पर्यायमित्थं लक्षयामास—प्रस्तावाधिकृतस्य वस्तुनः

Since 2010
ISSN- 0976-8645
UGC RN-41039

स्वभावानुसम्बन्धिनां परिस्पन्दानाम्।[48]

3. उपमालङ्कारस्वरूपनिरूपणावसरे—

विवक्षितपरिस्पन्दमनोहारित्वसिद्धये।

वस्तुनः केनचित्साम्यं तदुत्कर्षवतोपमा॥[49]

विवक्षितो वक्तुमभिप्रेतो योऽसौ परिस्पन्दः कश्चिदेव धर्मविशेषः।

4. एकत्रवर्णनीयवस्तुविषयविभागविषये—

भावानामपरिम्लानस्वभावौचित्यसुन्दरम्।

चेतनानां जडानां च स्वरूपं द्विविधं स्मृतम्॥[50]

अत्रागतस्य स्वभावशब्दस्यार्थमित्थं करोति— अपरिम्लानः प्रत्यग्रपरिपोषपेशलो यः स्वभावः पारमार्थिको धर्मस्तस्येत्यादि।[51]

5. प्रकरणवक्रतायाः चतुर्थभेदावसरे—

अविकलाभिनयोल्लासशृङ्गाररूपकादिपरिस्पन्दभ्राजिष्णुः।[52]

6.कविकौशलोपक्रमे—

तस्मादनेन न्यायेन सर्वातिशायिनः स्वाभाविकसौन्दर्यलक्षणस्य पदार्थपरिस्पन्दस्यालङ्कार्यत्वमेव युक्तियुक्ततामालम्बते।[53]

7. दीपकालङ्कारविवेचनविषये—

औचित्यावहमम्लानं तद्विदाह्लादकारणम्।

अशक्तं धर्ममर्थानां दीपयद्वस्तु दीपकम्॥[54]

अत्रागतस्य धर्ममिति शब्दस्येत्थं व्याख्यानम् किं कस्येत्यभिधत्ते— धर्मं परिस्पन्दविशेषमर्थानां वर्णनीयानाम्।

इत्थं विभिन्नेषु स्थलेषु कुन्तकाचार्येण धर्मस्य पर्यायरूपे स्पन्दस्य, स्पन्दस्य च पर्यायरूपे धर्मस्य प्रयोगो विहितः।

परिस्पन्दस्य व्यापारपर्यायरूपे प्रयोगः

1. काव्यप्रयोजनविषये—

व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।

सत्काव्याधिगमादेव नूतनौचित्यमाप्यते॥[55]

अत्रागतस्य परिस्पन्दशब्दस्य व्याख्यामित्थं प्रस्तौति ग्रन्थकारः—

व्यवहारो लोकवृत्तं तस्य परिस्पन्दो व्यापारः क्रियाक्रमलक्षणस्तस्य सौन्दर्यं रामणीयकम्।[56]

2. व्यतिरेकालङ्कारस्य तृतीयभेदस्य निरूपणावसरे—

लोकप्रसिद्धसामान्यपरिस्पन्दाद्विशेषतः।

व्यतिरेको यदेकस्य स परस्तद्विवक्षया॥[57]

अत्रागतस्य परिस्पन्दशब्दस्य व्याख्यानमित्थं व्याख्यायि ग्रन्थकर्त्रा—

लोकप्रसिद्धो जगत्प्रतीतः सामान्यभूतः सर्वसाधारणो यः परिस्पन्दः व्यापारः तस्मादिति।[58]

3. अतिशयोक्त्यलङ्कारप्रसङ्गे—

यस्यामतिशयः कोऽपि विच्छित्या प्रतिपाद्यते।

वर्णनीयस्य धर्माणां तद्विदाह्लाददायिनाम्॥[59]

कस्य- वर्णनीयस्य धर्माणाम्, प्रस्तावादिकृतस्य वस्तुनः स्वभावानुसम्बन्धिनां परिस्पन्दानाम्।[60]

4.एकदेशविवर्तिरूपकव्याख्यानप्रसङ्गे—

यद्वाक्यस्य यत्कस्मिंश्चिदेव स्थाने स्वपरिस्पन्दनसमर्पणात्मकरूपणमादधाति क्वचिदेवेति तदेकदेशविवर्तिरूपकम्।[61]

5. इदमेव परिस्पन्दमाहात्म्यात्सहृदयहारितां प्रतिपन्नमिति साहित्यस्योपयुज्यमानता।[62]

अत्र परिस्पन्दशब्दस्यार्थो भवति व्यापारः।

6.सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी उदाहरणस्यास्य व्याख्यानावसरे—

अत्रासत्प्रतिक्षणं कियदद्य गन्तव्यमित्यभिधानलक्षणः परिस्पन्दो न स्वभावमहत्तामुन्मीलयति।[63]

7.तामभ्यगच्छद्रुदितानुसारी इत्यस्मिन् रघुवंशपद्यस्य व्याख्यानकाले— अत्र कोऽसौ मुनिर्वाल्मीकिरिति पर्यायपदमात्रे

Since 2010
ISSN- 0976-8645
UGC RN-41039

वक्तव्ये परमकारुणिकस्य निषादनिर्भिन्नशकुनिसन्दर्शनमात्रसमुत्थितः शोकः श्लोकत्वमभजत यस्येति तस्य तदवस्थजनकराजपुत्रीदर्शन-विवशवृत्तेरन्तः करणपरिस्पन्दः करुणरसपरिपोषाङ्गतया सहृदयहृदयाह्लादहारी कवेरभिप्रेतः।[64]

विश्लेषणानेन परिस्पन्दस्य व्यापारार्थे प्रयोगो विज्ञातो भवतीति।

स्पन्दस्य विलसितपर्यायरूपे प्रयोगः

1. ग्रन्थारम्भेऽभितदेवतानमस्कारप्रसङ्गे—

वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम्।
देवीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्॥[65]

पद्येऽस्मिन् समागतस्य सूक्तिपरिस्पन्दस्य व्याख्यामित्थमाचष्टे—

सूक्तिपरिस्पन्दाः सुभाषितविलसितानि।[66]

2. प्रत्ययवक्रताया द्वितीयभेदस्य व्याख्यानावसरे—

आगमादि परिस्पन्दसुन्दरः शब्दवक्रताम्।
परः कामपि पुष्णाति बन्धच्छायाविधायिनीम्॥[67]

अत्रेत्थं परिस्पन्दस्य व्याख्यानम्— आगमो मुमादिरादिर्यस्य स तथोक्तः, तस्यागमादेः परिस्पन्दः स्वविलसितं तेन सुन्दरः सुकुमारः।[68]

3.कविकौशलप्रसङ्गे—

आसंसारं कविपुङ्गवैः प्रतिदिवससंगृहीतसारोऽपि।
अद्याप्यभिन्नमुद्र इव जयति वाचां परिस्पन्दः॥[69]
(आसंसारं कइपुंगवेहि पडिदिअहगहिअसारो वि।
अज्जवि अभिन्नमुद्दो व्व जअइ वाआं परिप्फंदो॥)

4.साहित्यपरिभाषाप्रसङ्गे—

पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते।[70]

अत्रागतस्य परिस्पन्दशब्दस्यार्थो विलास एवेति।

एतादृशेषु स्थलेषु कुन्तकाचार्येण परिस्पन्दस्य प्रयोगो विलसितार्थे प्रायोजि।

परिस्पन्दस्य पर्यायरूपे स्वरूपशब्दस्य प्रयोगः

1.चेतनानां जडानाञ्च स्वरूपं द्विविधं स्मृतम्।[71] अत्रागतस्य स्वरूपमित्यस्मिन् विषये वावदीति ग्रन्थकारः— भावानां वर्ण्यमानवृत्तीनां स्वरूपं परिस्पन्दः।[72]

2. पदार्थस्वरूपविश्लेषणसन्दर्भे—

धर्मादिसाधनोपायपरिस्पन्दनिबन्धनम्।
व्यवहारोचितं चान्यल्लभते वर्णनीयताम्॥[73]

अत्रागतस्य परिस्पन्दशब्दविशेषस्य तात्पर्यार्थं विवृण्वनेत्थमाह ग्रन्थकारः— धर्मादेश्चतुर्वर्गस्य साधने सम्पादने उपायभूतो यः परिस्पन्दः स्वविलसितं तदेव निबन्धनं यस्य तत्तथोक्तम्।[74]

3.अस्याः सर्गविधौ इत्यस्य पद्यस्य फलितार्थनिरूपणसन्दर्भे—

अत्र कान्तायाः कान्तिमत्त्वमसीमविलाससम्पदां पदं च रसवत्त्वमसामान्यासौष्ठवं च सौकुमार्यं प्रतिपादयितुं प्रत्येकं तत्परिस्पन्दप्राधान्यसमुचितसम्भावनानुमानमाहात्म्यात् पृथक् पृथगपूर्वमेव निर्माणमुत्प्रेक्षितमिति।[75]

स्पन्दशब्दस्य सञ्चरणार्थे प्रयोगः

ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्॥[76]

अत्र परिस्पन्दस्यार्थः सञ्चरणमिति।

परिस्पन्दस्य स्फुरितत्वार्थे प्रयोगः

सौभाग्यगुणं विवेचयता गुणोऽयमस्माभिः कथं कीदृशं वा सम्पादितव्य इत्यस्मिन् विचारे—

सर्वसंपत्परिस्पन्दसंपाद्यं सरसात्मनाम्।
अलौकिकचमत्कारकारि काव्यैकजीवितम्॥[77]

अत्रागतस्य परिस्पन्दशब्दस्यास्य व्याख्यानमित्थमकारि कुन्तकाचार्येण- सर्वसंपत्परिस्पन्दसंपाद्यं सर्वस्योपादेयराशेर्या

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

संपत्तिरनवद्यताकाष्ठा तस्याः परिस्पन्दः स्फुरितत्वं तेन संपाद्यं निष्पादनीयम्।[78] इत्थं स्पन्दः परिस्पन्दो वा विभिन्नानां शब्दानां पर्यायरूपे सुप्रयुक्तो वर्तते। एते सर्वेऽपि प्रयोगाः दार्शनिकार्थे सङ्गता वर्तन्ते।

स्पन्दशब्दस्य सौन्दर्यार्थे प्रयोगः

1.सुकुमारमार्गस्य लक्षणक्रमे

यत् किञ्चनापि वैचित्र्यं तत्सर्वं प्रतिभोद्भवम्।
सौकुमार्यपरिस्पन्दस्यन्दि यत्र विराजते॥[79]

अत्रागतस्य परिस्पन्दशब्दस्य व्याख्यानमित्थं प्रदर्श्यते— सौकुमार्यमाभिजात्यं तस्य परिस्पन्दस्तद्विदाह्लादकारित्वलक्षणं रामणीयकं तेन स्पन्दते रसमयं सम्पद्यते यत्तथोक्तम्।[80]

माहात्म्यार्थे स्पन्दशब्दस्य प्रयोगः

1.प्रकरणवक्रतायाः तृतीयभेदव्याख्यानावसरे—

प्रबन्धस्यैकदेशानां फलबन्धानुबन्धवान्।
उपकार्योपकर्तृत्वपरिस्पन्दः परिस्फुरत्॥[81]

उपकार्योपकर्तृत्वपरिस्पन्दः, अनुग्राह्यानुग्राहकत्वमहिमेति।

2.प्रकरणवक्रतामवतारयन् वदति कुन्तकाचार्यः—

यत्र निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी।
व्यावृत्तिर्व्यवहर्तृणां स्वाशयोल्लेखशालिनी॥[82]

लक्षणेऽस्मिन् समागतस्य परिस्पन्दशब्दस्येत्थं व्याख्यानं प्रास्तौद् ग्रन्थकारः—निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी निरर्गलव्यवसायस्फुरितस्फाराविच्छित्तिः।[83]

उपसंहारः—

1. शक्तेः स्वभावो वर्तते स्पन्दः। यथा हृदयस्य स्पन्दो हृदयस्वभाव एव भवति अन्यथा स्पन्दसमा-स्यवसरे हृदयस्य जीवितसत्ताऽपि समाप्तिं गता स्यादिति। अतः कुन्तकाचार्यस्य स्वभावार्थेऽस्य प्रयोगो नितान्तं सङ्गत एव।

2. स्पन्दस्य धर्मस्य पर्यायार्थे प्रयोगोऽपि सुतरां साधुत्वमेव भजते। स्पन्दकारिकायामाह श्रीरामकण्ठा-चार्येण टीकाकृता— स्पन्दशब्दश्चायं स्वस्वभावपरामर्शमात्रस्य नित्यस्य शून्यताव्यतिरेचनकारणभूतस्य तावन्मात्रसंरम्भात्मनः शक्त्यपराभिधानस्य पारमेश्वरस्य धर्मस्य किञ्चिच्चलनात् स्पन्द इति।[84]

कुन्तकाचार्यस्यायं प्रयोगोऽपि सुष्ठु एवेति।

3. स्पन्दो व्यापार एव। किञ्च व्यापारो भवति क्रियाक्रमलक्षणः। किञ्चिच्चलनमेव व्यापारः।

इत्थं सर्वेऽपि स्पन्दपर्यायाः प्रासङ्गिकाः सार्थकाश्चेति।

इत्थं वक्रोतिजीवितग्रन्थाध्ययनेदं सुसिद्धं यत् स्पन्दशब्दप्रयोगे राजानककुन्तकस्य महान् कश्चन विशेषानुरागः। वस्तुतः प्रखरप्रतिभाप्रवाहपरिस्पन्दमहिम्ना सतताभ्याससस्वभावगरिम्णा व्युत्पत्ति-प्रतिपत्तिप्रतीतिनिष्ठया च सूरयः कविकर्मकौशलं चारुतया चमत्कारवैचित्र्यमासूत्रयन्तीति प्रसिद्धिः। इमामेव पद्धतिमाश्रित्य भारतस्फारहीरायमाणेन प्रथितचिन्तकेन कुन्तकेनेह नैजं सर्वमभिमतं प्राकाशीत्यमन्दानन्दविषयः।

अनेन प्रतिभासंरम्भजनितसकलसामग्रीसमुन्मीलितं सहृदयहृदयाह्लादकारि स्पन्दपदमत्र यथामति व्याख्यायि।

पादटिप्पण्यः

1.वक्रोक्तिजीवितम्- भूमिकाभागः
2.साहित्यसौदामिनी-प्रस्तावनाभागः
3.वक्रोक्तिजीवितम्-1/1

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021
Since 2010
ISSN- 0976-8645
UGC RN-41039

4.शिवदृष्टिः-1/2
5.तत्रैव-प्रथमाह्निकम्
6.तत्रैव
7.तत्रैव-प्रस्तावनाभागः
8.तत्रैव-3/2-3
9.कूर्मपुराणम्
10.महार्थमञ्जरी(परिमलव्याख्या)-28
11.ब्रह्मसूत्रम्-शाङ्करभाष्यम्-1/4/3
12.सौन्दर्यलहरी-1
13.तत्रैव-भूमिकाभागः
14.तत्रैव
15.प्रत्यभिज्ञाहृदयम्-सूत्रसंख्या-32
16.स्पन्दप्रदीपिका-पृ-2-3
17.स्पन्दकारिका-प्रथमो निष्यन्दः
18.तत्रैव
19.वक्रोक्तिजीवितम्-1/9
20.तत्रैव-प्रथमोन्मेषः
21.तत्रैव-3/23
22.तत्रैव-तृतीयोन्मेषः
23.तत्रैव-1/36
24.तत्रैव-1/11
25.तत्रैव-तृतीयोन्मेषः
26.तत्रैव-प्रथमोन्मेषः
27.तत्रैव-द्वितीयोन्मेषः
28.तत्रैव
29.तत्रैव-3/1
30.तत्रैव-द्वितीयोन्मेषः
31.तत्रैव-1/12
32.तत्रैव-प्रथमोन्मेषः
33.तत्रैव-1/14
34.तत्रैव-प्रथमोन्मेषः
35.तत्रैव-तृतीयोन्मेषः
36.तत्रैव-3/41
37.तत्रैव-तृतीयोन्मेषः
38.तत्रैव-1/41
39.तत्रैव- प्रथमोन्मेषः
40.तत्रैव-1/54
41.तत्रैव-प्रथमोन्मेषः
42.तत्रैव-1/26
43.तत्रैव-तृतीयोन्मेषः
44.तत्रैव-3/33
45. तत्रैव-2/8
46. तत्रैव-द्वितीयोन्मेषः
47. तत्रैव-3/27
48. तत्रैव-तृतीयोन्मेषः
49.तत्रैव-3/28
50. तत्रैव-3/5
51. तत्रैव-तृतीयोन्मेषः
52. तत्रैव-चतुर्थोन्मेषः
53.तत्रैव-तृतीयोन्मेषः
54. तत्रैव-3/1
55.तत्रैव-1/4
56.तत्रैव-प्रथमोन्मेषः
57. तत्रैव-3/35

Since 2010
ISSN- 0976-8645
UGC RN-41039

58.तत्रैव-तृतीयोन्मेषः

59.तत्रैव-3/

60.तत्रैव-तृतीयोन्मेषः

61.तत्रैव

62.तत्रैव-प्रथमोन्मेषः

63.तत्रैव

64.तत्रैव

65.तत्रैव-1/1

66.तत्रैव-प्रथमोन्मेषः

67.तत्रैव-1/

68.तत्रैव-तृतीयोन्मेषः

69.तत्रैव-3/16

70.तत्रैव

71.तत्रैव-तृतीयोन्मेषः

72.तत्रैव

73.तत्रैव-3/10

74.तत्रैव-तृतीयोन्मेषः

75.तत्रैव

76.तत्रैव-1/19

77.तत्रैव-1/56

78.तत्रैव- प्रथमोन्मेषः

79.तत्रैव-1/29

80.तत्रैव- प्रथमोन्मेषः

81.तत्रैव-4/5

82.तत्रैव-4/1

83.तत्रैव-चतुर्थोन्मेषः

84.स्पन्दकारिका-भूमिकाभागः

## सन्दर्भग्रन्थसूची

1.वक्रोक्तिजीवितम्-सुशीलकुमारदे, F.K.L. Mukhopadhyay, Calcutta,द्वितीयसंस्करणम्, 1928

2.सौन्दर्यलहरी-श्रीमती विनोद अग्रवाल, ईस्टर्न बुक लिंकर्स, दिल्ली, प्रथमसंस्करणम्, 1985

3.स्पन्दकारिका-जे.जी चट्टोपाध्यायः, श्रीनगर, काश्मीर, 1913

4. प्रत्यभिज्ञाहृदयम्-जयदेवसिंहः, मोतीलालबनारसीदासः, दिल्ली, प्रथमसंस्करणम्-1973

5.स्पन्दप्रदीपिका-Mark Dyczkowski, वाराणसी, 2000

6.शिवदृष्टिः- पण्डितमधुसूदनकौलशास्त्री, काश्मीर-श्रीनगर, 1936

7.कूर्मपुराणम्-गीताप्रेस, गोरखपुर,1982

8. काव्यप्रकाशः- आचार्यविश्वेश्वरसिद्धान्तशिरोमणिः, ज्ञानमण्डललिमिटेड, वाराणसी, 2005

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 45-46 Vol- II Year 11. Date 18 Dec, 2021 JSEJ/45-46/II/11/2021

Since 2010
ISSN- 0976-8645
UGC RN-41039

## Call for Papers

# Important dates for next Issue-

- ✓ DEADLINE FOR SUBMISSION- 01.02. 2022
- ✓ NOTIFICATION FOR ACCEPTANCE-15.03.2022
- ✓ INAUGRATION-01.04.2022



## Send your paper



**Via Given Link only**

CONTACT

jahnavisanskritjournal@gmail.com